स्वर्गवासी साधुचरित श्रीमान् डालचन्दजी सिंघी

बाबू श्रीबहादुर सिंहजी सिंघीके पुण्यश्लोक पिता

जन्म वि स १९२१ माघ वदि ६ 卐 स्वर्गवास वि स १९८४ पौष सदि ६

दानशील-साहित्यरसिक संस्कृतिप्रिय

स्व. श्रीबाबू बहादुरसिंहजी सिंघी

अजीमगंज कलकत्ता

जन्म ता २८ ६ १८८५] [मृत्यु ता ७ ७ १९४४

सिंघी जैन ग्रन्थमाला

[ग्रन्थांक ५०]

भदन्त गुणप्रभ विरचित

[मूलसर्वास्तिवादीय]

विनयसूत्र

SINGHI JAIN SERIES

[NUMBER 50]

VINAYASŪTRA

OF

MŪLA SARVĀSTIVĀDIN School of Buddhism

by

BHADANTA GUṆAPRABHA

कलकत्तानिवासी

साधुचरित-श्रेष्ठिवर्य श्रीमद् डालचन्दजी सिंघी पुण्यस्मृतिनिमित्त

प्रतिष्ठापित एवं प्रकाशित

सिंघी जैन ग्रन्थमाला

[जैन आगमिक, दार्शनिक, साहित्यिक, ऐतिहासिक, वैज्ञानिक, कथात्मक—इत्यादि विविधविषयगुम्फित प्राकृत, संस्कृत, अपभ्रंश, प्राचीनगूर्जर,-राजस्थानी आदि नाना भाषानिबद्ध सार्वजनीन पुरातन वाङ्मय तथा नूतन संशोधनात्मक साहित्य प्रकाशिनी सर्वश्रेष्ठ जैन ग्रन्थावलि]

प्रतिष्ठाता

श्रीमद्-डालचन्दजी-सिंघीसत्पुत्र

स्व० दानशील-साहित्यरसिक-संस्कृतिप्रिय

श्रीमद् बहादुर सिंहजी सिंघी

BHARATIYA VIDYA BHAVAN LIBRARY BOMBAY-7 44219

प्रधान सम्पादक तथा संचालक

आचार्य जिनविजय मुनि

अधिष्ठाता, सिंघी जैन शास्त्र शिक्षापीठ

निवृत्त ऑनररि डायरेक्टर

भारतीय विद्या भवन, बम्बई

*

ऑनररी फाउंडर-डायरेक्टर

राजस्थान ओरिएण्टल रिसर्च इन्स्टीट्यूट, जोधपुर (राजस्थान)

ऑनररी मेंबर-जर्मन ओरिएण्टल सोसाईटी, जर्मनी, भाण्डारकर ओरिएण्टल रिसर्च इन्स्टीट्यूट, पूना (दक्षिण), गुजरात साहित्यसभा, अहमदाबाद (गुजरात), विश्वेश्वरानन्द वैदिक शोध प्रतिष्ठान, होसियारपुर (पञ्जाब) इत्यादि।

*

संरक्षक

श्री राजेन्द्र सिंह सिंघी तथा श्री नरेन्द्र सिंह सिंघी

व्यवस्थापक

अधिष्ठाता, सिंघी जैन शास्त्र शिक्षापीठ

भारतीय विद्या भवन, बम्बई

प्रकाशक—ज. ह. दवे, ऑनररी डायरेक्टर, भारतीय विद्या भवन, बम्बई, नं. ७

मुद्रक—लक्ष्मीबाई नारायण चौधरी, निर्णयसागर प्रेस, २६-२८ कोलभाट स्ट्रीट, बंबई २.

भदन्त गुणप्रभ विरचित

[मूल सर्वास्तिवादीय]

विनयसूत्र

❀

संपादनकर्ता

त्रिपिटकाचार्य, महापण्डित

श्री राहुल सांकृत्यायन

प्रकाशनकर्ता

अधिष्ठाता, सिंघी जैन शास्त्र शिक्षापीठ

भारतीय विद्याभवन, बम्बई

❀

विक्रमाब्द २०१७] प्रथमावृत्ति [खिस्ताब्द १९६१

ग्रन्थांक ५०] सर्वाधिकार सुरक्षित [मूल्य रु० ८/८०

SINGHI JAIN SERIES

अद्यावधि मुद्रितग्रन्थ नामावलि

१ मेरुतुङ्गाचार्यरचित प्रबन्धचिन्तामणि
मूल संस्कृत ग्रन्थ
२ पुरातनप्रबन्धसंग्रह बहुविध ऐतिहासिक्यपरिपूर्ण
अनेक प्राचीन निबन्ध संचय
३ राजशेखरसूरिरचित प्रबन्धकोश
४ जिनप्रभसूरिकृत विविधतीर्थकल्प
५ मेघविजयोपाध्यायकृत देवानन्दमहाकाव्य
६ यशोविजयोपाध्यायकृत जैनतर्कभाषा
७ हेमचन्द्राचार्यकृत प्रमाणमीमांसा
८ भट्टाकलङ्कदेवकृत अकलङ्कग्रन्थत्रयी
९ प्रबन्धचिन्तामणि – हिन्दी भाषांतर
१० प्रभाचन्द्रसूरिरचित प्रभावकचरित
११ सिद्धिचन्द्रोपाध्यायरचित भानुचन्द्रगणिचरित
१२ यशोविजयोपाध्यायविरचित ज्ञानबिन्दुप्रकरण
१३ हरिषेणाचार्यकृत बृहत्कथाकोश
१४ जैनपुस्तकप्रशस्तिसंग्रह, प्रथम भाग
१५ हरिभद्रसूरिविरचित धूर्ताख्यान (प्राकृत)
१६ दुर्गदेवकृत रिष्टसमुच्चय (प्राकृत)
१७ मेघविजयोपाध्यायकृत दिग्विजयमहाकाव्य
१८ कवि अब्दुल रहमानकृत सन्देशरासक (अपभ्रंश)
१९ भर्तृहरिकृत शतकत्रयादि सुभाषितसंग्रह
२० शान्त्याचार्यकृत न्यायावतारवार्तिक-वृत्ति
२१ कवि धाहिलरचित पउमसिरीचरिउ (अप०)
२२ महेश्वरसूरिकृत नाणपंचमीकहा (प्रा०)
२३ श्रीभद्रबाहुआचार्यकृत भद्रबाहुसंहिता
२४ जिनेश्वरसूरिकृत कथाकोषप्रकरण (प्रा०)
२५ उदयप्रभसूरिकृत धर्माभ्युदयमहाकाव्य
२६ जयसिंहसूरिकृत धर्मोपदेशमाला (प्रा०)
२७ कौऊहलविरचित लीलावई कहा (प्रा०)
२८ जिनदत्ताख्यानद्वय (प्रा०)
२९ ३० ३१ स्वयंभूविरचित पउमचरिउ
भाग १ २ ३ (अप०)
३२ सिद्धिचन्द्रकृत काव्यप्रकाशखण्डन
३३ दामोदरपण्डित कृत उक्तिव्यक्तिप्रकरण
३४ भिन्नभिन्न विद्वत्कृत कुमारपालचरित्रसंग्रह
३५ जिनपालोपाध्यायरचित खरतरगच्छ बृहद्गुर्वावलि
३६ उद्योतनसूरिकृत कुवलयमाला कहा (प्रा०)
३७ गुणपालमुनिरचित जंबुचरिय (प्रा०)
३८ पूर्वाचार्यविरचित जयपायड-निमित्तशास्त्र (प्रा०)
३९ भोजनृपतिरचित शृङ्गारमञ्जरी (संस्कृत कथा)
४० धनसारगणीकृत-भर्तृहरिशतकत्रयटीका
४१ कौटल्यकृत अर्थशास्त्र सटीक (कतिपयअंश)
४२ विज्ञप्तिलेखसंग्रह विज्ञप्तिमहालेख-विज्ञप्तित्रिवेणी
आदि अनेक विज्ञप्तिलेख समुच्चय
४३ महेन्द्रसूरिकृत नर्मदासुन्दरीकथा (प्रा०)
४४ हेमचन्द्राचार्यकृत छन्दोऽनुशासन
४५ वस्तुपालगुणवर्णनात्मक काव्यद्वय
कीर्तिकौमुदी तथा सुकृतसंकीर्तन
४६ सुकृतकीर्तिकल्लोलिनीआदि वस्तुपालप्रशस्तिसंग्रह
४७ विविधगच्छीय पट्टावलिसंग्रह
४८ जयसोमविरचित मंत्रीकर्मचन्द्रवंशप्रबन्ध
४९ गुणप्रभाचार्यकृत विनयसूत्र (बौद्धशास्त्र)

Shri Bahadur Singh Singhi Memoirs

Dr. G H. Buhler's Life of Hemachandrāchārya
Translated from German by Dr Manilal Patel, Ph D

1 स्व बाबू श्रीबहादुरसिंहजी सिंघी स्मृतिग्रन्थ [भारतीयविद्या भाग ३] सन १९४५
2 Late Babu Shri Bahadur Singhji Singhi Memorial Volume
BHARATIYA VIDYA [Volume V] A D 1945
3 Literary Circle of Mahamatya Vastupala and its Contribution to Sanskrit Literature By Dr Bhogilal J Sandesara, M A, Ph D (S J S 33)
4-5 Studies in Indian Literary History Two Volumes
By Prof P K Gode, M A (S J S No 37-38)

संप्रति मुद्रयमाणग्रन्थनामावलि

१ जैनपुस्तकप्रशस्तिसंग्रह, भाग २
२ रामचन्द्रकविरचित-मल्लिकामकरन्दादिनाटकसंग्रह
३ जयपायड तथा चूडामणि शास्त्र
४ तरुणप्रभाचार्यकृत षडावश्यकबालावबोधवृत्ति,
५ प्रद्युम्नसूरिकृत मूलशुद्धिप्रकरण-सटीक
६ कुवलयमाला कथा, भाग २
७ सिंहतिलकसूरिरचित मन्त्रराजरहस्य

भदन्तगुणप्रभविरचितं

[मूलसर्वास्तिवादीयं]

विनयसूत्रम् ।

१. प्रव्रज्यावस्तु ।

§१, श्रामणेरत्वोपनयम् ।

॥ नमो बुद्धाय ॥

अथ निर्याणवृत्तम् [१] । सर्वस्मिन् सन्निपतिते संघे कृतेदं वेशं निपत्य प्रगृहीताञ्जलिमुकुडुकस्थं बुद्धान्तं याचितवन्तं त्रिज्ञप्तिचतुर्थेन कर्मणा सह प्रव्रज्योपसंपदावुपनयेयुरिति पुराकल्पः [२] । निःश्रितस्य कञ्चिद् भिक्षुं तत्रोपाध्यायतया प्रव्रज्योपसम्पदौ [३] । पृष्टान्तरायिकं परिशुद्धाय पूर्वोपाध्यायत्वेनावकाशं कुर्यात् [४] । नानुपसम्पन्नस्य पूर्वमुपासकत्व-श्रामणेरत्व-भिक्षुत्वानामुत्तरम् [५] । शरणगत्यभ्युपगमवचनोपक्रममुपासकत्व-श्रामणेरत्वाभ्युपगमवचनं कुर्वीत [६] । अनन्तरमतशिक्षतिर्त्त(शैक्षता ?)मनभ्युपगमरूपेण [७] । स्वयमुपासकतामुपनीयारोचकाय संघस्यार्पयेत् भिक्षवे [८] । कञ्चि(? चि) त् परिशुद्धा(? द्ध इ)तीति पृष्ट्वा श्रद्धमानयेत् [९] । सर्वसन्निपातेन वा संनिपण्णेनुलयनं वा [१०] । स चेत् परिशुद्ध [इ]तीति सर्वे ब्रूयुः [११] । उपाध्यायं याचेत [१२] । केशश्मश्रूतारयेताचूडम् [१३] । अवतार्यतां चूडेति पृष्टेनानुज्ञाते(त ए)तान् [१४] । स्नायात् [१५] । उपाध्यायः कषायाणि वस्त्राणि दद्यात् [१६] । पादयोर्निपत्य प्रतिगृह्णीत [१७] । उपाध्यायः प्रावृणुयात् [१८] । व्यञ्जनं प्रत्यवेक्षेतासंचेतितम् [१९] । प्रव्रज्यामुपनयेत् शरणगमनोपक्रमम् [२०] । याञ्चानन्तरं वा [२१] । श्रामणेरत्वोपनायिनेऽर्पयेत् भिक्षवे [२२] । कच्चित् परिशुद्ध[इ]तीति पृष्ट्वा श्रद्धमुपनयेत् [२३] । आचार्यः [२४] । रहोनुशंसककर्मकारकनिःश्रयदायकपाठकाश्च [२५] । वृत्तेऽर्थे भूतत्वम् [२६] । अभ्युपगतावुपाध्यायस्य याञ्चायां तदुद्भूतिः [२७] । आवृत्तौ तृतीये शे(र्थे ?)न्त्यायां वृत्तत्वम् [२८] । तद्यथा परोत्कीर्त्तनकाले श्रामणेरत्वस्य [२९] । पश्चिमोत्रोपाध्यायत्वस्य [३०] । पर्यन्ते निःश्रयदानस्यैकरात्रं निःश्रयत्वेन प्रत्यु-

पस्थानम् [७१] । पाठस्य निरेकगाथापरिवर्त्तनम् [७२] । नापाठनाभिप्रायेणोच्चारणे पाठत्वम् [७३] । नान्यर्थैनं उपस[म्पा] दयेत् [७४] । नैवमन्यम् [७५] । नानुक्त्वा सहितमर्थहेतोर्नाम गृह्णामीत्युपाध्यायनाम गृह्णीयात् [७६] ।

॥ [इति] श्रामणेरत्वोपनयविधिः ॥

§ २, उपसम्पद्विधिः ।

संघादुपसंपत् [७७] । उपाध्यायतायामुन्मुखीभूतः कर्मकारकमधीच्छेद् रहोनुशासकञ्च भिक्षुम् [७८] । उपाध्यायं याचेत [७९] । स स्वयमेनं त्रिचीवरमधिष्ठापयेत् [८०] । पात्रञ्चोपदर्श्य मोनमधिकं पा(भा ?)ण्डपेतिति (?) संघे [८१] । सुपात्रमित्यनेवं ब्रूयुः सर्वे [८२] । अपक्रमिते क इत्यारयाप्य रहोनुशासकमुत्साह्य कर्मकारकः संवर्त(?)पेनमनुज्ञापयेत् [८३] । शृणु त्वमहो रहसमनुशिष्यात् [८४] । तिष्ठ मा शब्दिता गमिष्यसीत्येनमुक्त्वा समनुशिष्ट इति संघाय परिशुद्धिं निवेद्य किमागच्छत्वित्यागमनं पृच्छेत् [८५] । स चेत् परिशुध्य(द्ध इ)तीति सर्वे ब्रूयुः [८६] । उपसंपदं कर्मकारको याचयेत् [८७] । ज्ञापयित्वा संघान्तरायिकं पृच्छेत् [८८] । उपसंपदमुपनयेत् [८९] । छाय(? यां) वेदयेतानन्तरं मिताम् [९०] । सं(? शं)वुना चतुरङ्गुलेनैतत् साधु [९१] । पुरुषत्वेनास्य वानुव्यवहारः [९२] । अहोरात्राशपूर्वाह्णादिकम् [९३] । समयश्च पञ्चैते [९४] । हैमन्तिको ग्रैष्मिको वार्षिको मितवार्षिको दैर्घवार्षिक इति [९५] । चातुर्मासिकौ पूर्वौ [९६] । मासः परः [९७] । ततोऽहोरात्रतः [९८] । तदूनमन्यो मासत्रयम् [९९] । निःश्रयानारोचयेत् [१००] । पतनीयान् धर्मान् [१०१] । श्रमणकारकाश्च [१०२] । समप(म्प ?)न्नतां सम्यक्तया च प्रेप्सितस्योद्ग्राह्य शीलसामान्यगततारागणे नियुञ्जीत् (? त) [१०३] । यात्रिकमम्बन्धप्रतिबिम्बने [१०४] । विनीतसंवासतायाम् [१०५] । प्रयोजनानुष्ठाने [१०६] । संपद्यमानतामनाख्यातसमाचपरिज्ञानस्याचक्षीत [१०७] । आदरे नियुञ्जीत [१०८] । सोपायाख्यानञ्च संपादने [१०९] ।

॥ [इति] उपसम्पद्विधि ॥

(क) नि श्रयगतम् ।

नानवलोक्य निःश्रयं निःश्रितः करणीयं कुर्यात् [११०] । मुक्त्वोच्चारप्रस्रावम् [१११] । दन्तकाष्ठविसर्जनं सोपविचारे विहारे चैत्याभिवन्दनम् [११२] । एकान्तं पञ्चाशव्यामपर्यन्ता विरमतो गमनं पात्रचीवरकर्मणो ग्लानोपस्थाने को (? कौ)कृत्यप्रतिविनोदने पापकदृष्टिगतप्रतिनिःसर्गे तीव्रमौत्सुक्यमापद्येता-

होवतारं कुर्यां कारयेयं वेति [७१]। प्रणिघातुकामे संघेऽहो वत संघोऽस्येदं प्रणिधिकर्म न कुर्यादिति [७२]। कृतेऽवसारयेदिति [७३]। परिवासमूलपरिवासमानास्यमूलमानास्यावर्त्तनार्थिनि निःश्रयेऽहो वत संघस्य परिवासादचतुष्कं दद्यादावहेदिति [७४]। सोऽस्यैतदसौ कुर्यादुत्सृज्यावलोकनम् [७५]। नोनदशवर्ष उपसंपदोपाध्यायत्वनिःश्रयत्वानिःश्रितवासान् कुर्यात् [७६]। नासमन्विते केनचिदनन्तरेभ्यः समायोगेन [७७]। ग्लानोपस्थानकौकृत्यप्रतिविनोदनपापकदृष्टिगतप्रतिनिःसर्गानभिरतिस्थानप्रमीलनानां करणकारणे सीमार्थम् [७८]। पा-[प]कै(?)क्षत्वादपञ्चके सशीलवत्ता वाह(हु?)श्रुत्यम् [७९]। पिटकाभिज्ञत्वम् [८०]। ग्रहण एषां प्रतिबलत्वम् [८१]। अधिशीलचित्तप्रज्ञं शिक्षणायाम् [८२]। प्रतिबलत्वं वा शिक्षणायाम् [८३]। एवमध्याचारविनयप्रातिमोक्षम् [८४]। श्रद्धाशीलश्रुतत्यागप्रज्ञासम्पन्नत्वम् [८५]। शीलसमाधिप्रज्ञाविमुक्तितज्ज्ञानदर्शने [८६]। सारब्धवीर्यत्वप्राज्ञत्वं च [८७]। स्मृतिमत्त्वम् [८८]। प्रतिसंलील(?)नत्वम् [८९]। समाहितत्वम् [९०]। शैक्षता [९१]। अशैक्षता [९२]। उत्पत्तिप्रज्ञप्त्यनुप्रज्ञप्तिप्रतिक्षेपाभ्यनुज्ञाभिज्ञत्वम् [९३]। आन्तरायिकानान्तरायिकाभिज्ञत्वं ख्यापितानुशासकत्वम् [९४]। सहग्राहणप्रतिबलत्वेन निःश्रयस्योपनिःश्रयस्य वा [९५]। आपत्ये(त्य?)नापत्तिगुरुलघुताभिज्ञत्वप्रवृत्तप्रातिमोक्षविस्तरत्वम् [९६]। वृद्धाभावे नवकं निःश्रयेत [९७]। सामीचिं केवलं ज्ञापयेत् [९८]। चरेदनिःश्रितः पञ्चवर्षः पश्चिमसम[ा] योगेन समचितजनपदचारिकम् [९९]। नान्यस्त्रैविद्योऽपि [१००]।

॥ [इति] निःश्रयगतम् ॥

(ख) सग्राह्यगतम् ।

सास्ति(सि?) तीर्थ्य इति प्रव्रज्यार्थमुपसंक्रान्तं पृच्छेदुपसम्पादकांश्च [१०१]। नानाराधितचित्तमुत्सृज्य शाक्यमाग्रेयश्च जटिलं तीर्थ्यं प्रव्राजयेयुरुपसंपादयेयुर्वा कृते तत्तीर्थ्यानाराधितादितीर्थ्यान्तरवर्ज[न ?]म् [१०२]। रत्नानां वर्णस्य तीर्थ्यानामवर्णस्य भूतस्योक्तावकुप्यत्वमाराधितचित्तता [१०३]। तदर्थमतद्वन्तमेनं कृतोपासकतान्तं चतुरो मासान् परिवासयेत् संघो दत्त्वा परिवासं कर्मणा [१०४]। संघात् तस्य भक्तम् [१०५]। उपाध्यायाच्चीवरम् [१०६]। कर्त्तृत्वश्च कर्मादानस्य [१०७]। परिपूर्णपञ्चदशवर्षोऽसीति प्रव्रज्यार्थमुपसंक्रान्तं पृच्छेत् [१०८]। नोनमसमर्थं काकोड्डायने समर्थं वा सप्तवर्षं प्रव्राजयेयुः [१०९]। नैकत ऊर्ध्वं श्रमणोद्देशमुपस्थापयेत् [११०]। अरुचिश्चेदनेकध्यं प्रव्रज्यायां प्रव्रज्यातिरिक्तमुपसम्पादयेत् [१११]। ऊनश्चेदन्यस्याप्युपनिःश्रित्यर्थमर्पयेत् [११२]। नासौ तमाछि-(च्छि)द्यात् [११३]। उपसंपादयेदप्रयच्छतो बलादादाय कृ[त]दासः (?) [११४]।

व्यसिस्ते(स्ति ते ?) कस्यचित् किंचिद्देयमल्पं वा प्रभूतं वा [११७] । जीवत्पितृक-मननुज्ञातम् [११८] । ताव्या (?) मदूरदेशं प्रव्रज्यापेक्ष[म् ?] सप्ताहं धारयेत् [११९] । नानारोचितं दूरदेशमप्येनं संघे प्रव्राजयेत् [१२०] । युक्तं प्रव्रज्यापेक्षस्य संघेन भक्त-दानम् [१२१] । कृतानुज्ञातोऽपि मातापितृभ्यामन्ते मुक्त्वा दूरदेशकम् [१२२] । मासि ग्लान इत्युपसंक्रान्तं पृच्छेत् [१२३] । मा ते ग्लान्यं किञ्चिदस्तीति वा [१२४] । विशेषत उपसंपादकाः [१२५] । न ग्लानं प्रव्राजयेयुरुपसम्पादयेयुर्वा [१२६] । कृत-प्राक्प्रणिहितात् [१२७] । नास्त्यस्य ग्रहा(रो ?)हणधर्मतेति च [१२८] । नाशन-मेवं र्त (त ?)स्य लिङ्गिनः [१२९] । निर्मितः [१३०] । पण्डकः [१३१] । पाञ्चवि-ध्यमस्य जात्या पक्षासक्तप्रादुर्भावि(वे ?)र्यापत्कृत इति [१३२] । अन्त्यस्याव दोषभक्तौ नाशनम् [१३३] । तीर्थिकायभ्रा(पक्रा)न्तकः [१३४] । समाचेदं प्रव्रज्यस्य तद्दृष्टेर्निक्षिप्येदं चीवरं तेन ध्वजेन तत्रारुणोद्गमने तत्त्वम् [१३५] । अकृते दोषो (षो ?) न्यथा स्तेयस्य [१३६] । मातृघातकः [१३७] । पितृघातकः [१३८] । अर्हद्घातकः [१३९] । संघभेदकः [१४०] । तथागतस्यान्तिके दुष्टचित्त (त्तेन ?) रुधिरोत्पादकः [१४१] । भिक्षुणीदूषकः [१४२] । चतुर्णां पाराजिकानामन्यतमामापत्तिमापन्नः [१४३] । तेभ्युपपनोः (? भ्य उपपन्नः) स्याच्चेत् सामग्री पुनः प्रणिधानम् [१४४] । अदर्शनोक्तौ मृषा चेत् प्रायश्चित्तिकम् [१४५] ।

हस्तच्छिन्ना व (?) पादच्छिन्ना अङ्गुलीकर्णहस्तकाः ।
अनोष्ठकाश्च चित्राङ्गा अतिवृद्धा अतिबालकाः ॥
खञ्जः काण्डरिकः काणः कुणिः कुब्जोऽथ वामनः ।
गलगण्डमूकजघिराः पीठसर्पि स्त्रीवदी (? श्लिपाटकः) ॥
स्त्रीछिन्ना भारच्छिन्ना मार्गच्छिन्नाश्च ये नराः ।
तालमुक्ता कन्दलिछि(च्छि)न्ना एवं रूपा हि पुरुषाः ॥
—प्रतिक्षिप्ता महर्षिणा ॥

प्रासादिकञ्च (? स्य) प्रव्रज्या परिशुद्धस्योपसंपदा ।
आख्याता सत्यनाम्ना वै संबुद्धेन प्रजानता ॥

॥ [इति] संप्राप्तागतम् ॥

§ ३, क्षुद्रकादिगतम् ।

कृद्राजभटः [१४६] । अननुज्ञातं राज्ञा दूरदेशकम् [१४७] । कृच्छ्रोध(? ध्व)ज-वधकः [१४८] । न रथकारचण्डालपुक्कसतद्विधान् प्रव्राजयेत् [१४९] । निदर्शनं हस्तच्छिन्नादयः [१५०] ।

हरिद्रकेशा हरिकेशा हरितकेशास्तथैव च ।
अवदातकेशाश्च ये नरा नागकेशा अकेशकाः ॥
घा (?घं)टाशिरा बहुशिरा अतिस्थूला[:] लिपाटकाः ।
खरशूकरशीर्षाश्च द्विशीर्षा अप्यशीर्षकाः ॥

हस्तिकर्णा अश्वकर्णा गोणमर्कटकर्णकाः । खरसूकरकर्णाश्च एककर्णा अकर्णकाः ॥
लोहिताक्षा तिवदाक्षाश्चुल्लाक्षातिपिङ्गलाः । काचाक्षा बुद्बुदाक्षाश्च एकाक्षा[अ]प्यनक्षकाः ॥
हस्तिनासा [अ]श्वनासा गोणमर्कटनासकाः । खरसूकरनासाश्च एकनासा अनासकाः ॥
हस्तिजोडा अश्वजोड[ा] गोणमर्कटजोडकाः । खरसूकरजोडाश्च एकजोडा अजोडकाः ॥
हस्तिदन्ता अश्वदन्ता गोणमर्कटदन्तकाः । खरशूकरदन्ताश्च एकदन्ता अदन्तकाः ॥

अतिग्रीवा अग्रीवाश्च स्कन्धाक्षा अपि कुब्जकाः ।
लांगूलच्छिन्ना वाताडा एकाण्डा [अ]प्यनण्डकाः ॥
अतिदीर्घातिह्रस्वाश्च कृशाश्चातिकभासिनः ।
चतुर्भिश्च छविवर्णै चे(?)ला विकटकास्तथा ॥
एवंविधानामपि तं प्रतिक्षेपं प्रधारयेत् ।

न जातिकायदुष्टं प्रव्रजितमुपस्था[प]येत् [१५१] । युज्यते नैकस्यैकोपाध्यायस्यैकेन वचसोपाद[ा]नमा त्रयात् [१५२] । अभीवस्तुल्यसमयानां परस्परं सामीचिकरणस्य [१५३] । संप्राप्ते प्राथम्यम् [१५४] । न द्व्यङ्गुलादूर्द्धमारण्यकः केशान् धारयेत् [१५५] । नैतदर्वाक्त्वाद् ग्रामान्तिकः [१५६] । न गोलोमकान् केशांछे(श्छे)दयेत् [१५७] । मुक्त्वा व्रणसामन्तकम् [१५८] । न चूडां कारयेत् [१५९] । न संबाधे प्रदेशे रोमकर्म कारयेत् [१६०] । व्रणनिमित्तरूढावन्यथा विज्ञान् स्थविरस्थविरानवलोक्य [१६१] । नाङ्गनाडीमनेतन्निमित्तम् [१६२] । नान्यत्र का[र]येत् क्षुरभारं वा नावच्छेदं भजेत वासिमुखं वा [१६३] । नैषां मृ(मु?)ष्टिं भजेत [१६४] । भजेत लेखं मलापकृष्टेन चीवरेण केशश्मश्रवतारयेत् [१६५] । धारयेत् केशप्रतिग्रहणम् [१६६] । अभावे संकक्षिकया [१६७] । न संस्तरे [१६८] । न यत्र सांघिकसंम[ा]र्जनीनिपातः [१६९] । अवतारयेत् प्र[ा]सादादौ जीर्णो ग्लानो वातातपवर्षेषु च [१७०] । तं प्रदेशं परिकर्मयेत् [१७१] । संकीर्णे वालोच्छोरणम् [१७२] । एवं नखच्छेदनम् [१७३] । नानधिष्ठिता भिक्षुण्यैषा पुरुषेणातीतरागा केशांछे(श्छे)दयेत् [१७४] । संरत्यमानामधिष्ठात्री समनुशिष्याद् स्मृतिमुपस्थापय किमस्मिन् पूतिकलेवरे सारमस्तीति [१७५] । मातृसंज्ञां भगिन्या दुहितुर्वेति कल्पकम् [१७६] । स्नानं कृते च कुर्वीत [१७७] । पञ्चाङ्गिकं वा शौचं न नग्नः स्नायात् [१७८] । न भिक्षुणी पुरुषतीर्थे न स्त्रीतीर्थे चूर्णेन [१७९] । कल्पते मुद्गादेग-

(गं)न्धपरिभावितं चूर्णम् [१८०] । प्रतिग्रहणमस्य [१८१] । भैषज्यपरिभावितस्य च ग्लानेन [१८२] । न भिक्षुणी योषिति चूर्णं क्षिपेत् [१८३] । नाग्रथि(स्थि?) ताधस्त्यपूर्वपश्चिमनिवासितंन्नै(?)निःश्रयणीमधिरोहेत् [१८४] । नान्यदैवं स्यात् [१८५] । नाप्रतिच्छन्नवक्त्रया व्यतिभजेत [१८६] । धारयेत स्नानशाटकम् [१८७] । आमक्तिर्द्विपुटे प्राणकानाम् [१८८] । पत्राण्यभावे दत्त्वो(?) पुरतः पृष्ठतश्च प्रतिगुप्ते प्रदेशस्नानम् [१८९] । मोचने सक्तस्य प्राणिनोऽपि गतिः [१९०] । उदकभ्रमिविहार एतत् [१९१] । छोरणं च द्रवस्य [१९२] । करणं स्नानशाटिकायाः [१९३] । इष्टकास्तरस्यास्यां दानम् [१९४] । स्यन्दनिकायाः शोधनम् [१९५] । भ्रमे स्नातावनुत्थानम् [१९६] । नेह नोद्वर्षेण कार्यं शोधयेत् पादाभ्यामन्यम् [१९७] । निदर्शनमेतत् तीक्ष्णशौटीरयोः [१९८] । अग्निना शुक्तेः शोधनम् [१९९] । न किंचित् केनचिदामुष्टि चेलवर्त्यो (?) भिक्षुण्युद्वर्षेत् [२००] । नातपगतसंभावकोदकश्चीवराणि प्रवृणीत [२०१] । धारयेत् कायप्रोञ्छनम् [२०२] । अभावे मुहूर्त्तमुत्कुटुकेन स्थित्वा स्नानशाटकेन प्रोञ्छनम् [२०३] । प्रतिसेवेत जेन्ताकम् (?) [२०४] । करण्डस्य करणमुच्छर्करे साधु [२०५] । बहिःसंवृत्तस्यान्तर्विशालस्य समुद्राकृतेर्वातायनस्य मोक्षो मध्ये [२०६] । जालवातायनकवाटिकाचक्रिकाघटिकाकुचीनाञ्च विनिवेशनम् [२०७] । अजपादकदण्डोपस्थापनञ्च [२०८] । द्वारे कवाटार्गडकटकायामपट्टसमायोजनम् [२०९] । तप्तजलस्थापनार्थमभ्यन्तरपार्श्वकपोतमालाकरणम् [२१०] । अग्निकरणस्थाने भूमाविष्टकास्तरदानम् [२११] । अनिर्वाणाय संवर्त्तनम् [२१२] । तदर्थमायसस्फिजधारणम् [२१३] । ज्वलत्यग्नावक्लमाय प्रवेशपरिहरणम् [२१४] । तमिकानुत्पत्तये सक्तूनां कटुकतैलप्रक्षिता[नाम]ग्नौ प्रक्षेपः [२१५] । दौर्गन्ध्यविनिवृत्तये धूपदानम् [२१६] । चिक्कसपिण्डिकया क्षिप्रधरणे प्रविधानम् [२१७] । आमलकपिण्डिकपाचकक्षपिण्डकोत्रासनम् [२१८] । तृणो भूमेरास्तरणमात्रैरुत्पत्तिनार्द्रत्वेन तेमनेन वा [२१९] । कण्डूयनार्थमायसदर्विकाकरणम् [२२०] । छिद्रेणोपनिवर्त्य सूत्रकेनास्यास्थापनमुपधिधारिकेण गुप्तेन [२२१] । निर्मादिततासंपत्त्यर्थमस्यामग्निकल्पकरणम् [२२२] । अस्नानं तत्र [२२३] । शालायास्तदर्थं करणम् [२२४] । अनाशाय स्नपयच्चीवराणामिष्टकाववर्द्ध (वद्ध ?)गर्तकरणम् [२२५] । उदकभ्रमस्यास्य मोक्षः [२२६] । शिष्टानामत्युष्णितायां जलस्यारोचनम् [२२७] । शीतेनास्य भेदः [२२८] । सेकादयोऽपि [२२९] । पापी (?)गोमयदन्तकाष्ठपरिपूर्णकर्परोपस्थापनम् [२३०] । क्षमता चेत् पुरोभक्तिकाकरणम् [२३१] । मध्यपातेन प्रत्युपतिष्ठमानमज्ञातमत्रैत्(व ?) गतो निर्ज्ञानार्थं पृच्छेत् [२३२] । द्वारपालस्यैतदर्थं स्थापनम् [२३३] । अप्रवेशार्थं च भिक्षोः [२३४] । नाश्रद्धस्यात्र प्रवेशं दद्यात् [२३५] । सार्द्धं विहार्यन्तेवासिकैरत्र परिकर्मकरणम् [२३६] । नवकैरित्यपरम् [२३७] । दीपनकटाहकतैलदन्तकाष्ठगोमयस्य मृच्चूर्णपानीयाद्युप-

स्थापनकाष्ठप्रत्यवेक्षणोद्वर्त्तनस्नेहनस्नापनसंमार्जनसंकरच्छोरणादेव (२३७) । तेषां परस्परेण (२३८) । पीठशुक्तयोश्चौक्षतां कृत्व[ा] निक्षेपो यथास्थाने (२३९) । सर्वत्रैष भाण्डे विधिः सर्वमुपकरं सुगुप्तकेला(ना?)पि तं कुर्यात् (२४०) । अल्पशब्दोऽत्र प्रविशेत् (२४१) । प्रासादिकः (२४२) । सुसंवृतेर्यः (२४३) । संप्रजानन् (२४४) । नाग्रत[ः] स्थित्वा वितपेत् (२४५) । संगणिकावर्जनम् (२४६) । आर्यतूष्णीम्भावालम्बनम् (२४७) । त्रिदण्डकदानमन्ते (२४८) । नैकचीवरः परिकर्म कुर्यात् (२४९) । नैतत् कायस्याश्रद्धेन कारयेत् (२५०) । अतित्वरात्र पूर्वत्र च श्रद्धाभिसंहितम् (२५१) । न सिंहसमशृगालसमसुचिष्ठेत् (२५२) । परमो दुःशीलास्या(?)र्योपाध्यायानुपतिष्ठेत् (२५३) । मातृपितृग्लानांश्चागारिकमपि (२५४) । स्नानं संभारकस्नात्रेण (२५५) । वातदह(हर?) मूत्रगण्डपत्रपुष्पफलकाथस्नानं तदाख्यम् (२५६) । अभ्यङ्क्य(?ङ्गनं) रुक्षार्थम् (२५७) । उपस्नानकेनापगत्यैतस्य (२५८) । पूर्वार्थमन्ते उदकुम्भे द्विस्नेहबिन्दुदानम् (२५९) । स्नायादपोद्रोणिकायाम् (२६०) । धारयेदेनां ग्लानः (२६१) । दद्यादुपर्यस्याः वि(पि)धानकम् (२६२) । ग्रीवायां चात्र गण्डोपधानिकाम् (२६३) । न यत्र क्वचन पादौ प्रक्षालयेत् (२६४) । स्थ[ा]नमस्य प्रनाडीमुखम् (२६५) । कारयेरन् पादधावनिकाम् (२६६) । उपरि विहारस्य पूर्वदक्षिणकोणे (२६७) । कूर्माकृतिं खराम् (२६८) । उपस्थापयेत् कठिल्लं मृण्मयं हस्तपदवुध्नका(?क)र्णिकावन्तम् (२६९) । मध्ये संनिवे(?वि)ष्टया कदम्बपुष्पाकारया खरया च (२७०) । प्रक्षाल्य स्थापनमवाङ्मुखस्य (२७१) । तलकोपरि सांघिकस्य (२७२) । पौद्गलिकस्य लयने कवाटसन्धौ (२७३) । पात्रनिर्मादनादि यत्र प्रदेशे विहारे कुर्यात् तस्या मार्जनमुदकेन प्र[क्षा]लनं वा (२७४) । कुन्तफला(ल?)काकारेण मृदङ्गस्य वा (२७५) । गोमयेन मृद[ा] वा (२७६) । न विद्यते स्नार्थतायां प्रलिप्तेराकारस्य नियमः (२७७) । नापात्रकं प्रव्राजयेयुरुपसम्पादयेयुर्वा (२७८) । नोनेनाधिकेन पाण्डुना वा (२७९) । त्रीणि पात्राणि ज्येष्ठं मध्यं कनीयः (२८०) । शेषेणोर्द्ध(र्ध्व?)भागान्तानन्तराद्कुष्ठोदरात् पक्वतण्डुलप्रस्थस्योर्द्ध(र्ध्व?) वा तद्वये मागधकस्योद्वाहिसमूपव्यञ्जनस्यैतन्न्याय्यम् (२८१) । न भिक्षुण्यूर्द्ध(र्ध्व?) भिक्षुकनीयसो धारयेत् (२८२) । त्रपुमण्डलकस्यानयात्रा (?) निपादे दानम् (२८३) । बोधिवटपत्रस्य पाणितलकस्य वा (२८४) । परिमाणतः (२८५) । भवति स तत्त्वं याचितेन (२८६) । तद्वत् पञ्चकम् (२८७) । न वर्षखपात्रकः स्यात् (२८८) । न जनपदचारिकां चरेत् (२८९) । चरेत् समपतायां कुपात्रकेण (२९०) । प्रव्राजयेदभावे (२९१) । नोत्थितः पात्रं कर्षेत् प्रक्षिपेच्छोपयेद् वा (२९२) । मात्रया परिभुञ्जीत (२९३) । नान्येनात्र निसर्गं प्रक्षिपेत् (२९४) । नानेन संकारं छोरयेत् (२९५) । न चोचं न हस्तमुखोदकं दद्यात् (२९६) । न प्रमदनधर्मणा श्रामणेरेण निर्मापयेत् (२९७) । न सबालुकेन गोशकृता (२९८) ।

नात्यार्द्रं प्रतिशामयेत् [१०९] । नातिशुष्कमध्युपेक्षेत [११०] । न शिलायां स्था[प]-येत् [१११] । नाशुचौ प्रदेशे [११२] । न यत्र क्वचन [११३] । नासिन्निक्षिपेत् [११४] । मालकस्यैतदर्थं करणम् [११५] । उत्तिष्ठतोर्विहारपरिगणयोर्न भित्तेः [११६] । न च कोरकस्यारण्यकैः [११७] । लतामयस्य रज्ज्वा वा [११८] । लिप्तस्य गोमयमृदा [११९] । स तविच(?)विंध पिधानस्य [१२०] । लम्बनमस्य कान्तारिकया वृक्षे साधु [१२१] । न भूमौ स्थापनम् [१२२] । नैनमत्य (न्य?)त्र नयेत् [१२३] । प्रक्षिप्तं स्थविकायां नयेत् [१२४] । न हस्तेन [१२५] । कक्षयास्य नयनमालयनकं दत्त्वा [१२६] । पृथक् स्थविकासु पात्रमैपज्यकोलाहलानि स्थापयेत् [१२७] । धारयेदेनाः [१२८] । न तुल्यावलम्बानामास्यालयनकानां निवेशमुपयुंजीत [१२९] । अविस्तीर्णानाञ्च दुःखा-निच्छुः [१३०] । संकोचासंपत्तये न मतदानं मध्ये [१३१] । स्थानायास्यान्तरान्तरे काकपादके दानम् [१३२] । चक्षुरिव पात्रं पालयेत् [१३३] । त्वचमिव सांघाटीम् [१३४] । शिष्टं च चीवरम् [१३५] । न प्रतिसंस्करणमुपेक्षेत [१३६] । अनुतिष्ठेत् पात्रबन्धनं प्रति गुप्तिप्रदेशे [१३७] । उपस्थापयेत् संघः कर्मारभाण्डिकाम् [१३८] । छिद्रस्यैतद-साधु गुडजतुसित्थत्रपुशीसैः [१३९] । साधु पट्टिका-कीलिका-थिग्गलिका-मकरद-न्तिकाभिः [१४०] । चूर्णिकया लोहस्य पाषाणस्य वा [१४१] । तैलेन घृष्टिरासित्थसाद-श्याल्लीहेत कुरुविन्देन वा [१४२] । उष्णे दानम् [१४३] । अवगुण्ठ्य भूर्जेन मृदानु-लिप्य पाकस्य मध्यस्य [१४४] । घृष्टिस्तैलेन गुडमृद(मृगमद?)मृन्मयस्य भुज्य-मानत्वे पाक्यत्वं मासपक्वान्ते [१४५] । मार्तश्चेत् पक्षस्य [१४६] । वर्षाश्चैतद् विल-क्षणे प्रक्षितत्वेन कार्यान्तरालेऽस्य संयोज्यत्वम् [१४७] । पचनमस्य [१४८] । नैतदा-त्मना कर्तुं युक्तम् [१४९] । कटाहकस्य तदर्थमुपस्थापनम् [१५०] । तच्चोत्पत्तेः [१५१] । कर्वरकस्य वा [१५२] । भसनः पूरयित्वा साधु भेदनं घटभेदनकेन [१५३] । धारणमस्य [१५४] । तेनावछा(?)दनमपलापि धूमम् [१५५] । दत्तमुपमृत्तिकाबहिः लेपेन [१५६] । पिण्याकेन गोमयेन वा लिप्ताभ्यन्तरेण उपगतशेषेण [१५७] । कृत-परिकर्मायां भूमावास्तृततुषायामवकीर्णरुचिरधूमकरकपिण्याकादिद्रव्यायां तस्या-धोविलम् [१५८] । गोमयेन वा पलालेन वावगुण्ठ्यादीपनम् [१५९] । सुशीतलस्या-पनयनम् [१६०] । आनिष्पन्नरङ्गसंपत्तेराबृत्तिः [१६१] । निर्माद्य निर्माद्यारोपन(?ण)म् [१६२] । सामन्तकस्य प्राणकानामनुकम्पया सम्मार्जनं सेकश्च [१६३] । प्ररोहस्य परिव्यञ्जनमज्ञातो वर्षाग्रस्योपसंपद्यङ्गीकरणं व्याजेनास्य प्रत्यवेक्षणम् [१६४] । उच्चनागदन्तकचीवरवंशस्थभावावतारणादिना [१६५] । नोपसंपत्प्रेक्षं वृक्षमधिरोह-येत् [१६६] । न बहिःसीमां प्रेषयेत् [१६७] । दर्शनोपविचार एनमवकाशने स्थापयेयुः गणाभिमुखं प्रगृहीताञ्जलिम् [१६८] । न गृहिणि(णो) निःश्रयानारोचयेत् [१६९] । नोपसंपन्नमात्राय नारोचयेत् [१७०] । वस्तुकर्मोपस्थापकपरिहारेणैनं परीच्छेयुः [१७१] ।

दहरमस्य भावे वृद्धतरमापृच्छेत् (१६५) । भावेऽप्युपनिःश्रयत्वेन (१६६) । नानवलोक्य तज्जातीयं परिकर्मयेत् तेन वात्मानम् (१६७) । निर्दोषमभावे प्रवृत्त-पर्येषन(ण?)स्यानिःश्रितस्य वापि (१६८) । अपञ्चरात्रनिष्ठानात् (१६९) । अर्हत्वञ्च लभे (१७०) । विश्रम्यागन्तुको द्वितीये तृतीये वाह्नि निःश्रयं गृह्णीत (१७१) । नैकाहस्यार्थे (१७२) । अन्यमसान्निध्ये निःश्रितस्यापृच्छेत् (१७३) । निर्दोषमनापृष्टौ गतस्य कर्मादानेऽपरतदागतौ (१७४) । न यस्य तस्यान्तिकात् (१७५) । निर्ज्ञाय वृत्त-ज्ञानपरिवारानुग्राहकत्वं प्रश्नादिनास्य ग्रहणं संवरवत् (१७६) । प्रपीड्योभाभ्यां पाणिभ्यामुभौ पादतलौ (१७७) । परीक्ष(क्ष्य ?) दानम् (१७८) । पुत्रपितृसंज्ञयोः निवे-शनम् (१७९) । तत्रैवोपाध्याये निःश्रितत्वं तस्मादग्रहणमस्य तत् (१८०) । निरपेक्ष-तासंपत्तिरुभयोरान्त(रन्ते ?)निःश्रयध्वंसे कारणम् (१८१) । सन्निपत्ताव(पाते ?)नो-पाध्यायेनाभिमतेन प्रवृत्तिः (१८२) । तेनैव तेन (१८३) । निरन्तरं दृष्टोपाध्याय आसनं मुञ्चेत् (१८४) । त्रिर्दिवसेन निःश्रितमुपसंक्रा(क्र?)मेत् तद्विहारस्थः (१८५) । अरण्यवासी क्रोशे चेत् प्रत्यहम् (१८६) । पञ्चपैरहोभिः क्रोशपञ्चके (१८७) । पौषधे द्वितृतीयैर्योजनेषु (१८८) । न निःश्रितमवसादनार्ताना(?)वसादयेत् (१८९) । पञ्चा-वसादनाः (१९०) । अनालापोऽनववाद उपस्थानधर्माभिषैरसंभोगः प्रारब्धकु-शलपक्षसमुच्छेदो निःश्रयप्रतिप्रश्रम्भणञ्च (१९१) । अश्रद्धस्यैतदर्हत्वम् (१९२) । कुसीतस्य दुर्वचसोऽनादृतस्य पापमित्रस्य च (१९३) । अवसादितसंग्रहेऽन्यस्य स्थूला-त्ययः (१९४) । अनादृतौ भिक्षोः प्रगुणीकरणाय प्रयोगोऽभिज्ञस्य (१९५) । त्यक्त-निमित्तस्य क्षमणं क्षमयतः (१९६) । नानत्ते(नार्त्त?) मवसादयेत् (१९७) । नार्तस्य न क्षमेत (१९८) । नान(नार्तस्य) क्षमेत (१९९) । सर्वथा निष्कासनमकरणीयतायां लप-नात् (२००) । परिश्रावणकुण्डिके दत्त्वा सान्तरोत्तरश्च श्रामणेरस्य (२०१) । उपसंप-त्प्रेक्षश्चेत् पंच परिस्कारान् (२०२) । उपसंपन्नस्य च (२०३) । न सिद्धनिष्ठुरो भवेत् (२०४) । न विघातसंवर्त्तिनं क्रियाकारं कुर्वीरन् (२०५) । पलिगुद्धतापर्युषितत्वमास्यस्य (२०६) । विसर्जयेत् दन्तकाष्ठम् (२०७) । प्रतिच्छन्नम् (२०८) । उच्चारप्रसावक्रिया वा (२०९) । नोपभोगस्यान्ते वृक्षस्य कुड्यस्य वा (२१०) । प्रम[ा]णमस्य द्वादशकादङ्गुलीनां प्रभृ-त्याऽष्टकात् (२११) । आचतुष्कोत्तरादभावे बहुश्लेष्मणः (२१२) । नायुक्तत्वं विजनस्य लपने कठिल्लकस्योपरि (२१३) । नासंपत्तिरत्र गुप्ते प्रणाडीमुखे (२१४) । हस्तसामन्त-कस्यात्रैवंजातीयके संभाव्यर्थम् (२१५) । जिह्वामस्यानु निर्लिखेत् (२१६) । उपस्था-पयेज्जिह्व[ा]निर्लेखनिकाम् (२१७) । शुचिद्रव्या (२१८) । कल्पतेऽत्रार्थे दन्तकाष्ठवि-दलः (२१९) । परस्परमस्याः तीक्ष्णतापै घृष्टिः (२२०) । न तीक्ष्णेन दन्तं जिह्वां कर्ण-श्चोच्छ्लेषे(? छ्लेखे)त् (२२१) । नाशनैः (२२२) । अवाध(धाव ?)यंस्तन्मासम् (२२३) । नाम्र-क्षाल्य दिवं (?) मुखमलेन प्रदेशमनवगुण्ठ्य वा पांशुना दन्त-जिह्वयोः यवनं

छोरयेत् [४२१] । नाविशब्दम् [४२२] । निदर्शनमेतत् [४२३] । उच्चारप्रस्रावखेटसिंघाणकवान्तं विरिक्तमस्य[ा]न्यच्च [४२४] । निर्मादनस्यातोऽपि संपत्तिरूपाटकगोमयादपि [४२५] । चैत्यमनन्तरं कायकरणीयानुष्ठानाद् वन्देत [४२६] । अथ निःश्रितप्रतिपत् [४२७] । अतोऽनन्तरं काल्यमुपसंक्रम्य वन्दनम् [४२८] । वार्तापृच्छनम् [४२९] । ऊपादु(दु)कोदकदन्तकाष्ठोपनामनम् [४३०] । महानसमवलोक्य मारोचनम् [४३१] । प्रियस्योपनाम्यत्वेन मनसि करणम् [४३२] । पात्रनिर्मदनम् [४३३] । पिण्डपातिकश्चेद् द्रावकस्य च [४३४] । सप्रयोजनं परिश्रावणस्यापि [४३५] । सोऽपि चेत् प्रश्नः [४३६] । माह्यं चेदभिरुचितं तेनैव महप्रवेशः [४३७] । विषमादौ पुरतो गतिः [४३८] । प्रणीतस्य तस्मै परिणमनम् [४३९] । असह(?) चेदागत्योपदर्शनम् [४४०] । वरतरस्योपनामनम् [४४१] । मात्राज्ञोऽसौ सर्वत्र स्यात् [४४२] । उदकस्यालकपूरणम् [४४३] । कालारोचनम् [४४४] । भुक्ते पात्रादिनिर्मादनम् [४४५] । स्नापनमस्य [४४६] । चैत्यादिवन्दनायामूपाटकोदकाद्युपनयः [४४७] । पादप्रक्षालनगतानुष्ठानम् [४४८] । शयनासनप्रज्ञपनम् [४४९] । प्रतिनिवासनार्पणम् [४५०] । निवासनग्रहणम् [४५१] । पादोदकाधिष्ठानकठिल्लोपनामनं उपान[त्]प्रोञ्छनम् [४५२] । असम्मतमुत्थानकारकत्वेन गृहीतसम्मार्जनीकं दृष्टाल्पोत्सुकं कुर्यात् [४५३] । गृहीतसूचिकं चासम्मतं चीवरसेवकत्वेन [४५४] । कल्पिकीकरणाल्पहरिततापादनपुष्पफलोच्चयदन्तकाष्ठोपसंहाराद्यपि श्रमणोद्देशे [४५५] । अर्गटकाकोटनेनाभ्यन्तरस्थं बोधयेत् [४५६] । शनैरेतत् [४५७] । नातिवेलम् [४५८] । नाद्येन (?) प्रपीड्येत् [४५९] । शनैः संप्रजानन् प्रविशन्निष्क्रामञ्चासंघर्षयन् द्वारशाखे [४६०] । प्रकृत्यादेनम् [४६१] । आलि (?)पेत् [४६२] । न तद्विरुद्धम् [४६३] । अपत्रपेतातः [४६४] । दक्षोऽस्य कृत्ये स्यात् [४६५] । सत्कृत्यकारी प्रासादिकप्रस्थानः [४६६] । ह्रीमान् सगौरवः [४६७] । सप्रतीशः [४६८] । नीचचित्तः [४६९] । संप्रजा[न]न्न हापयेत् स्वकार्यम् [४७०] । किंकुशलगवेषी [४७१] । विक्रियामापद्यमानं निवारयेत् [४७२] । अवृद्धौ कुशलेनान्यत्र तत्कारके(?कै)रसमर्पणां याचेत [४७३] । निर्ज्ञाय निःश्रयाद्यर्पयेत् [४७४] । पापमित्राद् का(वा?)रणम् [४७५] । कुशले नियोगः [४७६] । तदुपसंहारः व्युत्थापनायामापत्तेरानुलोमिकाजीवितपरिस्कारसंपत्तौ चोद्योगः [४७७] । साद्धविहार्यन्तेवासिकोपाध्यायाचार्यसमानोपाध्यायसमानाचार्यालप्तकसंलप्तकसंस्तुतकसंसमकं ग्लानमुपतिष्ठेत् [४७८] । पूर्वक्रियाभावादुत्तरः [४७९] । पाठाचार्यस्याप्यत्र गृहीतता [४८०] । सा ह्यशक्तौ निःश्रितं येन प्रवृत्तिः [४८१] । प्रव्रजितवदत्र प्रारब्धतल्लिङ्गः [४८२] । न ग्लानसब्रह्मचारिणमभ्युपेक्षेरन् [४८३] । उपस्थायकमस्याभावे ददीरन्नान्तात् [४८४] । कल्पते भैषज्य[म]स्य संघतः [४८५] । केवलस्य ग्लानस्य परिभोगः [४८६] । असत्त्व अतदुपस्थायकः समादापयेत् [४८७] । असंपत्तौ सांघिकं ददीरन् [४८८] । अभावे बौद्धिकमाशरीरगतात् [४८९] ।

यानकच्छत्रारोपणादिकारानेनमुद्दिश्य कुर्युः सांविकात् [४९१] । अभावेऽस्य वोञ्चि-(वोन्दि)कात् [४९२] । देयत्वमाभ्यामार्त्तस्य तेनामृत्यौ सति विभवे [४९३] । नोप-स्थायक एनं नोपतिष्ठेत् [४९४] । नान्यामस्य धर्म्याञ्चाज्ञां विलोमयेत् [४९५] । नाध्यवसानवस्तूपयाचितो विधारयेत् [४९६] । न नाववदेत् [४९७] । नैनं ग्लानो लंघयेत् [४९८] । सांविकादेनमसौ मरणाशंकायां शयनासनादुत्थाप्य पौद्गलिके निवेशयेत् [४९९] । अभ्यङ्गनस्नापनपूर्वकताव्याजेन [५००] । यत्नवांस्तदवस्थापरिच्छेदे स्यात् [५०१] । तत्कार्यत्वं तत्कृतसंक्लेशानां तन्मृतचीवराणां धावनस्य [५०२] । संघस्य तत्स्थविरसंनिपातपूर्वगमः स्यात् [५०३] । गमने विलंबितमुदीक्षेत [५०४] । तेऽप्ये-नम् [५०५] । अनिर्गतश्च दूरं गत्वा [५०६] । ग्रामान्ते च [५०७] । प्रवेशश्चेदत्रानुय-न्तम् [५०८] । द्रुतश्चेत् स्याद् "आगमय यावत् स्थविर [आ] गच्छति" इति तं ब्रूयुः [५०९] । पाण्युदकदाने च गतत्वेऽभ्यवहारायास्ति चेत् कालः [५१०] । असत्य-त्रोपवेशेऽस्यासनं मुञ्चेरन् [५११] । सन्निपण्णतायां बहिश्च प्रत्यवेक्षेत [५१२] । दुःप्रावृ-तत्वे दुर्निवस्ततायां वा सौष्ठवार्थमनयोर्निमित्तमसौ कुर्वीत [५१३] । अप्रतिषेधे न (प?)रेण कारयेत् [५१४] । असंपत्तौ स्वयं नैनान् संलापयेन्नवकान् [५१५] । यत्रैषां विहारारण्ययोर्वृत्तिस्तद् वृत्तं ग्राहयेन्नियुञ्जीत च [५१६] । आगन्तुकं प्रत्यवेक्ष्यावा-सिकानामारोचयेच्छयनासनार्थम् [५१७] । गमिको दिक्सार्थावासशयनासनं सहा-यकांश्च ग्लान्येन सहायित्वेन तोलयित्वा प्रक्रामेत् [५१८] । सर्वं पश्चात् मा कस्य-चित् किञ्चित् प्रमुषितमित्यपेत्य दूरमुत्सारयेत् [५१९] । अनुद्धतानुन्नद(ड?)त्वे नवकान् प्रतिष्ठापयेत् [५२०] । कुलश्चोपगतान् सर्वः सर्वान् [५२१] । संजानीत चाद्येद्यो (? चेद्याद्यो)पदेशादिभक्तलाभग्लानसंविधानादिकरणीयसंपादनेनानुगृह्णीत [५२२] । वर्षोपगतोऽनुसंज्ञाय विहारमप्रतिसंस्कुर्वतः संस्कारयेत् [५२३] । संस्कुर्वतोऽभ्युत्साद-(ह)येत् [५२४] । पर्षद्गतान् सर्वः कथैपितायामानुलोमिकधर्मोपसंहारेणानुगृह्णीत [५२५] । तूष्णीत्वेऽरतानुपेक्षेत [५२६] । गृहिण उपगता[न्] भक्तान् संविभाजयेत् [५२७] । अकरणे निष्ठैवाधर्म्यामेभ्यः "कथं कृत्वेदमस्माकं संविद्यत" इति ब्रूयात् [५२८] । पर्षदं तद्वान् सर्वः प्रत्यवेक्षेत [५२९] । मुधाचारिणं निगृह्णीयात् [५३०] । गमनाद् यत्र यथै[त]त् कुर्यात् [५३१] । अनानातिर्यक्कथस्स्यात् [५३२] । न पुरः पश्चाच्छ्रमण उपगच्छेत् [५३३] । न तिष्ठेत् [५३४] । उक्तो ब्रूयात् संपादयेद् वा [५३५] । नान्तरक-थामवपातयेत् [५३६] । अधर्मं भाषमाणं प्रतिवदेत् [५३७] । धर्ममनुमोदेत [५३८] । उत्पन्नं धार्मिकं लाभं प्रतिगृह्णीत [५३९] । अनुद्धतः कुले स्यादनुन्नडानवस्थितः [५४०] । उत्क्षिप्तचक्षुः [५४१] । धर्म्यां गृहिभ्यः कथां कुर्यात् [५४२] । दानदमसंयमब्रह्मचर्य-वासोपौषधशरणगमनशिक्षापदग्रहणेष्वेनान्नियुञ्जीत [५४३] । सर्वत्रापत्तिमुखभूते प्रस्थाने स्मृतः प्रतिपद्येत [५४४] । न नशिष्टोऽनुगः [५४५] । एहिस्वागतपूर्वप्रिया-

लाप्यभिगते स्यात् [५४८] । उत्तानमुखवर्णः स्मृतपूर्वगमो विगतभृकुटिः [५४९] । गृही चेद् धर्म्यामसौ कथां कुर्यात् [५५०] । अनागच्छत्यत्र ग्रामान्तिकस्संरञ्जनीयं यथाशक्ति प्रवर्तयेत् [५५१] । पानीयामनमुपस्थापयेत् [५५२] । संमार्गशमनासनप्रज्ञपनपानीयस्थापनचारणः भक्तनिःसर्गान्नरकः कुर्यात् [५५३] । उपगच्छेद् विलोमां परिजनक्रियां न चेत् स्वपरोपघाताय [५५४] । असौ चेच्छक्तौ समुच्छिद्यैनां धर्म्यामुत्पाद्य तया संज्ञपयेत् [५५५] । भङ्गे प्रसंगे वा तन्निदानं परिजनस्य प्रतिसंस्करणम् [५५६] । अशक्तत्वेऽन्येन प्रक्रमन(?ण)म् [५५७] । न तत्प्रत्ययं विगृह्य ब्रूयात् [५५८] । संघारामे पराध्यां(?)स्तथा कुर्याद् यथा स्वयंग्राहिकया ग्रहणं गच्छेत् [५५९] । अगच्छत्तमनारोच्य सहसा कस्यचित् कुमारमित्राम[ा]त्यभट्टराजपुत्रपादमूलिकान् [५६०] । ग्राहयित्वा शुद्धिकायां पर्षदि निहन्यात भिक्षुणी भिक्षुस्थाने सर्वस्य प्रवजा(?व्रज्या)याम् [५६१] । उपसंपद्य न्यस्य तद्याचनादौ कर्मकर्तुः अत्राचयस्संघः [५६२] । कथनं भिक्षुण्यन्तरितमान्तरायिकस्य [५६३] । शिक्षमाणात्वं नाम स्त्रियामपरं पर्व [५६४] । निःश्रितायामेव [५६५] । श्रामणेरिकात्वभिक्षुणीत्वयोरन्तराले वर्षद्वयश्चरणस्य कालः [५६६] । तदूनोपसंपत्कालाद्यादिः प्ररोहस्य [५६७] । द्वादशत्वं वर्षाणामुपसंपत्त्व(रू?)ढतायामादिः [५६८] । दानादुत्थानम् [५६९] । भिक्षुणीसंघेन [५७०] । शिक्षासंवृतिरिति दानम् [५७१] । अनन्तरमस्य शिक्षोत्कीर्त्तनम् [५७२] । नालब्धब्रह्मचर्योपस्थानं संवृतेरुपसंपत् [५७३] । रहोनुशासनाद् रूढं तद्दानम् [५७४] । संघेन [५७५] । पृष्टान्तरायिकम् [५७६] । याचितायाम् [५७७] । पञ्चत्वं चीवरेषु [५७८] । निःश्रयेषु वि(?)वृक्षमूलत्वम् [५७९] । अष्टत्वं पतनीयेषु [५८०] । गुरुधर्मारोचनम् [५८१] । पतनीयभ्रमणकरकान्तरात्रे [५८२] । कृतपद्के [५८३] । नास्त्यस्याः प्ररोहणधर्मत्वे(ते ?)ति च [५८४] । उभयव्यञ्जना [५८५] । संभिन्नव्यञ्जना [५८६] । सदा प्रस्र(?स्र)वणी [५८७] । अलोहिनी नैमित्तिकी [५८८] । निमित्तमात्रभूतव्यञ्जना तदाख्या [५८९] । पूर्वं प्रव्रजिता [५९०] ।

॥ क्षुद्रकादिप्रव्रज(?ज्या)वस्तुगतम् ॥

§४, पृच्छागतम् ।

नामनुप(?प्य)गतिकोत्तरकौरवकयोः [५९१] । संवास्य क्षेत्रत्वम् [५९२] । न तृतीयस्यां परिवृत्तो व्यञ्जनस्य [५९३] । न प्रथमयोर्वस्तिः [५९४] । उत्थानं गृह्यमानत्वे [५९५] । अनुपाध्यायकतायां तद्वतः [५९६] । अनुपसंपन्नत्वेऽस्य [५९७] । न जानानेऽस्याभिक्षुत्वम् [५९८] । नैनं प्रत्याचक्षणे [५९९] । नानयोर्नामानुद्भावने [६००] । न संघस्य तद्योनेः [६०१] । नागारिकतीर्थिकध्वजे [६०२] । न नग्नकुपितसुफालिनीषु [६०३] । न निमित्तविपर्ययानभ्युपेतावुत्क्षिप्तकस्य [६०४] । दुम्(?ष्ट्)कृतमात्रमपूर्वसर्व(?)तायाम् [६०५] । अयाज्ञा(?ज्ञा)यामुपाध्यायस्य [६०६] ।

आन्तरायिकेस्याग्रष्णे(?श्ने) प्रतिज्ञातेऽस्यासतो दानम् [६०५] । न पुरुषानुकृतित्वं स्त्रिया स्त्र्यनुकृतित्वं च पुरुषस्य व्यञ्जनान्तरप्रकारः [६०६] । आक्षिप्तत्वमस्य हस्तच्छिन्नादिना [६०७] । पापलक्षणभिन्नकल्पद्वीपान्तरयोः [६०८] । एकनखसमुद्रकलेखपक्षहतलिङ्गशिरो गुल्मकेशान्तर्वहिर्विकुब्जप(?स)र्पहितानङ्गुलियक्ष्मनकुलकिंविलविपरीतमिलितसिक्यकश्मीलिताक्षाक्षाक्षिशालशक्तदद्रूविचार्चिकपीतावदातरक्तनाडीकर्णकण्डूपिण्डस्थूलकच्छ्रण्डलांगुलप्रतिच्छन्नमूर्धजित्वैकहस्तपादनीलकेशहस्त्यश्वगोमेषमृगमत्स्या हि दीर्घवहशीर्षतालकण्ठशूलेर्यापथच्छिन्नेभ्यश्चानावाधिकानां ग्लानेन चेतरेषाम् [६०९] । चौरेण दस्योः [६१०] । पितृवत् पित्राशायत्वे(?)नुज्ञायां राजा [६११] । परिग्रहीत्रोरनुज्ञानधारणारोचनेषु पितृत्वम् [६१२] । नामनुप(?ष्य)गतिकयोः [६१३] । नात आनन्तर्योत्थानम् [६१४] । जनकाभ्यामेतत् परि(?)पत्तव्यम् [६१५] । नाभ्यामपि [६१६] । एतत्कृत्यं मातृघातकादौ तत्रम् [६१७] । दूषकत्वमब्रह्मचर्येण स्वादयतोरपराजितत्वे [६१८] । अर्हत्वं प्रव्रज्योपसंपदोरुपगतौ पुंस्त्वस्य हीनायां योषिति [६१९] । असाधारणं पाराजिकमध्याचरितवत्यम् [६२०] । आवासिकानां स्वयुपसंपादनेऽङ्गत्वम् [६२१] । ध्वंसो भवत्यस्योत्सृष्टः [६२२] ।

॥ पृच्छाप्रायं प्रव्रज्या(? ज्या)वस्तुगतम् ॥

॥ समाप्तं च प्रव्रज्यावस्तु ॥

२. पोषधवस्तु ।

§१, पाराजयिकम् ।

(क) भिक्षुविभग. (१) अब्रह्मचर्यपाराजयिकम् ।

[प्रत्याख्यानविधिः]

न नष्टप्रकृतिकृततां प्रत्याख्यातत्वम् [१] । न तत्रम् [२] । न मूके [३] । नामनुप(?ष्य)गतिके [४] । नाबोधिसत्त्वे [५] । न रहसि [६] । न रहःसंज्ञया [७] । शिक्षां प्रत्याचक्षे बुद्धं धर्मं संघं सूत्रं विनयं मातृकामाचार्यमुपाध्यायमागारिकं मान्धारयश्रमणोद्देशं पण्डकपण्डकभिक्षुणीदूषकं स्तेयसंवासिकं नानासंवासिकमसंवासिकं तीर्थिकं तीर्थिकापक्रान्तकं मातृघातकं पितृघातकमर्ह[द्]घातकं 'संघभेदकं तथागतस्यान्तिके दुष्टचित्तरुधिरोत्पादकमलं मे युष्मद्विधैः ब्रह्मचारिभिः सार्द्धं संवासेन वासभोगेन चेति प्रत्याख्यानवचनानि [८] ।

॥ प्रत्याख्यानविधिः ॥

(क) विभंगगतम् ।

प्रविष्टस्पर्शस्वीकृतौ प्रश्रा(ऽस्रा)वकरणस्य [९] । तत्र [१०] । अविकोपिते [११] । मुखे वर्चोमार्गे वा [१२] । विकोपितेषु स्थूलम् [१३] । अप्रतिबलत्वे ह्रासः [१४] । अहासममनुप(ऽप्य)गतिकत्वयास्लपत्र(ऽ) कतासिवसेव्यसान्तरत्वमृततासु [१५] । असंचेतितनष्टप्रकृत्योरवर्पाकामप्रविष्टत्वे [१६] । प्रकृतायां सेव्यमानस्य [१७] । बहिर्निषर्पपूर्वकत्वेऽनन्तर्मुक्तपरतायाम् [१८] । नाभुप्तो दिवा पार्श्वं दत्त्वा मिद्धमवक्रमेत [१९] । तिस्रो गुप्तयः [२०] । बद्धद्वारपरिवृतस्यत्वमारक्षितत्वं भिक्षूणां ग्रथितत्वमधोनिवसनस्य [२१] ।

॥ अब्रह्मचर्यपाराजिकभङ्गः ॥

ॐ

(ख) क्षुद्रकगतम् ।

न यत्र स्त्रिया काम्येत तत्रोपसंक्रामेत [१२] । न यत्रामनुपो(ऽप्यः) स्पर्शायोद्यतः तत्र निवसेत् [१३] । धारयेत् तीव्ररागो वस्तिम् [१४] । छागचर्मणो मृगस्य मूषिकस्य वा [१५] । कषाय[षा]नमदौर्गन्ध्यार्थम् [१६] । शोचनं शोषश्च [१७] । तत्कालार्थमपरम् [१८] । प्राभृत्येन द्रवीभूतावास्तरदानम् [१९] । वालुकायाः पांशोर्वा [२०] । निक्षिप्य शौचं कृत्वा भोजनचैत्यवन्दनम् [२१] ।

॥ क्षुद्रकगतमब्रह्मचर्यपार[रा]जयिकम् ॥

ॐ

(ग) पृच्छागतम् ।

दन्तात् परं मुखस्यादिः [१२] । वर्चोमार्गस्य विलगण्डिकान्तात् [१३] । चर्मपुटात् प्रस्रावणस्य [१४] । मणेरस्य प्रविष्टता तदन्तः [१५] । प्रदेशस्यास्यादष्टत्वं दष्टता शून्यत्वं क्लिन्नता शटितत्वं खादितता प्राणकैरिति विकोपितता [१६] । न मध्यच्छन्नत्वे गम्यस्याप्यप्रहासः [१७] । अप्रज्ञाने च सन्धेः पाटितस्य मध्यासेव्यस्य पंडितस्य [१८] । प्रज्ञानेऽनन्तरं पर्व [सन्धये] [१९] । स्थूलकृत्वम्पक्वस्य निर्लोम्नः शूकरादेः [२०] । शिरछि(श्छि)न्ने मुखस्य [२१] । पृथक्कृतयोः कायात् सेव्यसेवनयोः [२२] । अन्ययोरपि परकीययोः परत्र समायोजने [२३] । अन्यस्य छिन्ने कायेपि छिद्रस्य [२४] । सेव्यस्य मातन्तरस्य पण्डिकायाम् [२५] । वाह्यस्य सीम्नः परस्तात् [२६] । प्रसेविकायाः [२७] । द्विगुणीकृता स्पृष्टिप्रवेशयोः [२८] । तदन्त्योक्तावन्तरणमभिसंहितं येनान्तरितस्य न सर्वेण सर्वमसंभावनं स्पृष्टेः [२९] । अन्येनान्तरितत्वमस्पृष्टिप्रवेशेन व्याख्यातम् [३०] ।

॥ प्रथमे पाराजयिके पृच्छागतम् ॥

ॐ

(घ) विनीतकानि ।

भिक्षुभावासंचेतनं प्रकृतिनाशः (५१) । द्वयं विकोपितत्वमन्तः बहिश्च (५२) । कुपितत्वं शिक्षायाः सेवां प्रति परस्याभ्युपगतौ (५३) । देयत्वमत्र पुनरस्याः (५४) । स्थूलमस्यां भिक्षोः (५५) । संग्रहगतौ च (५६) । प्रवेशनार्थं व्रणपीडने (५७) । भीतिलज्जयोः संरागासंपत्तेः (५८) । स्फोटादंगजातस्य रसासंवित्तौ (५९) । अकर्मण्यप्रवेशने (६०) । हस्तेन हस्तं पादेन पादं सन्धिना सन्धिं वास्तिना वास्तिमत्यघट्टने (६१) । इङ्गितत्वमात्रके संयुक्तस्य (६२) । दारुदन्तशैलवस्त्रमपथी(?)तिकोपक्रान्ताविन्द्रियमात्रस्य चेदवनामः (६३) । सर्वाङ्गेषु स्पर्शदानेषु मौलम् (६४) । पादस्य सेवार्थमुद्यतेनाङ्गजोक्षेपे (६५) । बहि[:]स्पर्शने सेव्यस्य तन्मात्रपरतयाङ्गजातेन (६६) । पराङ्गपने च सेवायाम् (६७) । न प्रकृत्या कर्मण्यत्वमपक्राम(हास)कृत् (६८) । नाग्रपृष्ठयोद्यतयाम्भस्ततोऽन्यतो निष्ठाने (६९) । न शिष्टैरपि मार्गैरुपक्रमिष्य इति (७०) । तद्भ्रष्टोऽहमित्यभिप्रायः (७१) । न रोगापगत्यर्थता (७२) । न मार्गेऽन्यत्वसंज्ञानं विमतिर्वा (७३) । स्थूलकृत्वमनयोरमार्गे (७४) । [अ]नापत्तिरभिद्रुतस्य स्रुपुपरिनिपाते (७५) । कण्ठे चाकाममार्त्तया च लम्बने (७६) । स्पर्शने चौष्ठेनौष्ठस्य (७७) । न शुन्याः पुरस्तात् प्रश्रा(?स्रा)वं कुर्वीत (७८) । न यत्र प्राणात्ययापातस्तत्रारण्ये प्रतिवसेत् (७९) । न यत्राङ्गजातादानभयं तां नग्नो नदीं तरेत् (८०) । संप्रजानन्नेनां नावा तरेत् (८१) । गवाश्च सव्ये(मध्ये) गच्छेत् (८२) । उदयनं च प्रेक्षेत (८३) । पिण्डाय च ग्रामं चरेत् (८४) । सुप्रत्यवेक्षितं कृत्वा प्रव्राजयेत् (८५) । नेकाक्यभ्यवकाशे पार्श्वं दद्यात् (८६) । नापावृतद्वारेऽगारे भिक्षुणी समापद्येत च (८७) ।

॥ प्रथमे पाराजयिके विनीतकानि ॥

॥ अब्रह्मचर्यपाराजयिकं समाप्तम् ॥

(२) अदत्तादानपाराजयिकम् ।

(क) विभंगगतम् ।

हरणहारणयोः (८८) । दूतेनापि (८९) । अदत्तस्य (९०) । पञ्चमापकादेः (९१) । स्तेयचित्तेन (९२) । मनुप(?प्य)गितकपरिगृहीतस्य (९३) । तत्संज्ञायाम् (९४) । अनापेतत्वं स्वामित्वस्यापहृतत्वेऽनुत्सृष्टतायामाश्रये न (९५) । भवत्यधिष्ठातुरपात्रागतीये स्वामित्वम् (९६) । असत्वमाशयानुबन्धस्याभ्यवहाराय दाने (९७) । नानभियोक्तृस्वत्वमभिप्रयुक्तानां दवदहादिभिरादानार्थं मृगपक्षिसरीसृपाणाम् (९८) । अनिगलने वस्तुतो व्यवस्था (९९) । हारस्थानकालेन मूल्यस्य (१००) । नानभिप्रेतादापत्तिः (१०१) । स्वभावकोऽलिकविश्वासचित्तैः परिविज्ञाप्य (१०२) । अन्यथा विनास्ते-

यचितेन [१०३] । कृपपर्य्या(?)मोचने [१०४] । प्रयोगे दुष्कृतं सर्वत्र [१०५] । स्थूलमसिन्निकाये मूलस्य चेत् [१०६] । अनन्तरे चे(?चै)तत् [१०७] । न्यूनाग्रहतौ [१०८] । अस्वामिकस्य निधेः [१०९] । स्वस्वान्यगतेः [११०] । अस्वीकृतौ च गोपननाशनवधो (?) सङ्गादौ वियोजने [१११] । दुष्कृतं कारुण्यचित्तेन [११२] । न प्रतिकृतापकृतत्वमादेः [११३] । प्रयोगप्रयोगत्वं प्रागामर्शात् [११४] । अहानौ प्रतिपदं भेदः [११५] । प्रतिसत्वं तद्गते [११६] । न कीलान्मोक्षो नावः यष्टिः [११७] । हारो भारस्य तत्कृत्य हरणे [११८] । निकरस्योचित्य [११९] । स्थानोत्तमातिक्रान्तिद्रव्यो तु (?)मेन निमज्जने [१२०] । नयने सा मतिर्यास्मिन् यश्चा(?)द्वारे [१२१] । च्युतिरपकाशने पार्श्वाधारस्य पार्श्वान्तरेण सीम्नः [१२२] । न व्यस्तान्तर्गतस्य तद्वत्त्वे [१२३] । तत्र रूपं चाट-स्फोटिलै(?)रवावर्णान्तरसन्धिव्यवधयः [१२४] । व्यवधित्वं लक्षमाणप्रविभागार्थो प्राणिनि(?) पार्श्वादीनाम् [१२५] । स्तरस्य स्तृतत्वे स्थानत्वम् [१२६] । निक्षिप्तवत् प्ररोहः [१२७] । विवेचनभामुक्तास्य भूम्यातदातिक्रान्तिः शुक्ल(ल्क?)स्य [१२८] । मनुष्यस्य संकेते न चेत् तत्संपत्तिः [१२९] । उत्पाटनं पक्षिणस्तथा चेत् [१३०] । मुक्तिर्वधश्च तिरश्चः [१३१] । अनाभासित्वं निबन्धनोर्यू(?)यनाभ्याम् [१३२] । आभासनं मन्त्रैराकर्षणे [१३३] । पूर्वमनुगच्छदपहरतोर्हानिनिवृत्यप्रक्रमप्रवेशे कोशैर्न तदाचस्य [१३४] । नावः स्थलकुल्याप्रकीर्णोदकः [१३५] । अनुत्स्नातश्च [१३६] । तिर्यक्(?)वा नाभापितायां तीरान्तरस्य [१३७] । तत्प्राप्तिरिति तथात्वे [१३८] । तरपुटकातिक्रमः प्रतिस्रोतः निष्पत्तिः स्वकर्मान्तस्य तदर्थं व्यधिकेतरस्याचछन्देन परकर्मान्तेष्वम्भसः [१३९] । प्रेरणेन वारणे वा [१४०] । लब्धिरंशस्य तदर्थमपहर्तृणां प्रतिपद्वृत्तान्तनिवेदने [१४१] । भूमिचर्यह(?)योः परिक्षेपेण संधिसङ्गतिः [१४२] । जयो विवादेन राजकुले चेत् [१४३] । युक्तकुले चेन्निराकृतप्रयोगत्वं यस्य [१४४] । अस्य प्रयो-गत्वम् [१४५] । अनाशङ्क्यमणध्व(?)स्तेयचित्तस्य शुक्ल(ल्क?)गते दोषोत्थानम् [१४६] । यदाचत्वं भाण्डस्य तस्य देयत्वम् [१४७] । न मुक्तेऽन्यदीयातिक्रामणं न हारः [१४८] । नामुक्तोऽन्येनातिक्रामयेत् [१४९] । नासंचेतितातिक्रामणासंपत्यै न पतेत [१५०] । आरक्षकस्यापनं भिक्षोरनेकस्य [१५१] । समुदानेयत्वं तद्भक्तस्य [१५२] । निवारणं तेन [१५३] । आख्यानं प्रक्षिप्ततायाम् [१५४] । चिह्नकरणमसंभवे [१५५] । पुच्छन(?) मादाने [१५६] । स्पृश्यत्वमसंपत्तावन्यथापनयनस्य [१५७] । निर्यातितत्वमप्रतिपाति-तस्य निश्चयोपगतौ [१५८] । संवर्धनं पित्रोस्तदर्थोन्मुक्त्यै(?क्त्यै) [१५९] । रत्ना-नाञ्च [१६०] । दानमितरार्थादुधारग्रहग(णा)धमर्णम् [१६१] । न सशुल्क-करणीयोन्वाढिं(?)भजेत [१६२] । अतत्वं रक्तस्य गोमयनिष्पीड्येनापि [१६३] । छिन्नदशायामस्य च [१६४] । अरूढिस्तन्मतेरधस्ते [१६५] । न परवृत्तौ

ग्रहरेत् [१६६]। नाविश्वसनीये विश्वस्ततां भजेत [१६७]। तच्चमधरस्योत्तरस्याम् [१६८]। प्रियोऽसौ मनापो गुरुर्भावनीयः पूज्यः प्रशस्यः प्रेताग्रहणेन [१६९]। कृत्या (? कृत्या) प्रतिकर्मणा कर्म पुण्यबुद्ध्या च [१७०]। न भृतिकया [१७१]। न देश-निरुक्तेर्व्यसनम् [१७२]। नापश्रष्टमात्रमतिचिरं धारयेत् [१७३]। उपधिवारिकस्य देयत्वम् [१७४]। संघे तेन प्राव्रजितसंभावनायामुपदर्शनम् [१७५]। अननुमज्ञे स्वामिनः प्रतिसंस्तरोकायामुपनिबन्धनम् [१७६]। नाननुज्ञातात् ग्लानेन तद्भैषज्यं पाचे(यये ?)त् [१७७]।

॥ अदत्तादानपाराजयिके विभङ्गः ॥

(ख) क्षुद्रकगतम्।

न सपरिग्रहमनुज्ञातोऽन्येन कल्पेन स्वीकुर्यात् [१७८]। न स्वीकृतं मोचयेत् [१७९]। याचनं धर्मदेशनया [१८०]। उपार्द्धमूल्येन [१८१]। युक्तं पात्रचीवरस्य स्फुटेनापि ग्रहणम् [१८२]। नासत्संभावना वा ह्युत्सृष्टमित्यमहाजनप्रत्यक्षमधितिष्ठेत् [१८३]। नामनुपा(?प्या)धिष्ठत्वे शवद्रव्यस्यापरिग्रहत्वम् [१८४]। पृष्ठतोऽस्य प्रदुष्टस्य गमनम् [१८५]। अवमूर्त्त(र्ध ?)कं निप[त ?]न्नायोपरिदानं पादान्तात् प्रभृति [१८६]। नाक्षंताद् गृह्णीयात् [१८७]। न स्वयं क्षण्वीत क्षाणयेद् वा [१८८]। प्रतिशमनमेव दन्तकाष्ठे कोशाटुकगोमयमृदां यथासुखकरणमकामं संवद्धेनापहृ(?हि)यमान-(?ण)स्य भिक्षोः श्रामणेरस्य वा [१८९]।

॥ अदत्तादानपाराजयिके क्षुद्रकगतम् ॥

(ग) पृच्छागतम्।

काकणिचतुष्कं मापकः [१९०]। निदर्शनं पञ्चत्वं चतुर्थस्य कार्षापणात् [१९१]। यत्रास्य विंशतिपर्वत्वं तदाश्रित्य [१९२]। हारकालस्थानगणनेनास्य व्यवस्था [१९३]। प्रकर्षपर्यन्तभूतत्वमशक्यकरणमूल्यस्य महत्त्वेन [१९४]। नाल्पत्वेन अस्य न्यूनत्वेन नान्तर्गतत्वम् [१९५]। अतुलरत्नत्वमत्र बुद्धधातोः [१९६]। दुष्कृतं पूजार्थतायाम् [१९७]। निर्दोषत्वं लेख्यस्य [१९८]। विनाश्यापहृतौ तदवस्थस्य हारवस्तुत्वम् [१९९]। अपरिग्रहत्वमुत्तरकुरौ [२००]। वक्य (?) वदेतत् [२०१]। तात्कालिकस्यात्मनः स्वामित्वम् [२०२]। देवत्वं निर्वृतस्य [२०३]। प्रयोगवदनुज्ञातस्य निःसृष्टत्वेनोपभोगः [२०४]। दापनं च मन्त्रौषधाभ्याम् [२०५]। पारार्थ्यं च मौलविधम् [२०६]। कल्पेन च [२०७]। विचयनं च रुचितापहारेछा(च्छा)याम् [२०८]। प्रयोगो व्यसनं द्यूतेन चेत् जितत्वभूतम् [२०९]। एतदत्र हारः [२१०]। तस्य संख्याने [२११]। तत्त्वं लोयाधारोपयो[:] चिह्नस्य [२१२]। स्थानोत्तरे च निक्षिप्ते [२१३]। निष्पत्तिरत्र हारः [२१४]। तद्वद् वर्गान्तरे गणनम् [२१५]। व्यप-

लापश्च पौर्वेसेतरेषु द्वैतरस्य वा पूर्वेषु [११५]। यत्रैतत् सर्वादौ तत्रांशित्वम् [११६]। प्राप्तुयत उद्भावनश्चाप्रभवतः [११७]। अनादिष्टपाचनश्च [११८]। प्रयोगोपलापो वञ्चितकायमित्यकनिष्ठक्षेपाणाम् [११९]। संनिष्टपनं हारः [१२०]। निहितनिक्षेपस्य सह चेद् याचनेन पश्चाच्चातः पुरस्ताच्चेत् प्रयोगान्तरत्वम् [१२१]। नाशनं स्थूरा(?) छेदो मारणञ्च [१२२]। स्थूलकृत्तं सीमाकाशस्य शुक्लमंक्तौ [१२३]। निर्दोषत्वमृद्धि-नयनेऽन्यसीम्नश्च [१२४]। दुष्कृतमुद्योजनस्य [१२५]। मार्गान्तरोपदेशि[नि?]श्च [१२६]। न्यूनमुपायादा (दाय?) हारः [१२७]। पथि वदपथम् [१२८]। अन्यायपनवत् मुखकण्ठे-नान्त्यस्य स्तेयचित्ततापगतावनुष्ठितत्वम् [१२९]। न लिप्यादौ हासः [१३०]। न प्रसज्य भञ्जनं च हारः [१३१]। न सस्थानस्य [१३२]। न मारितत्वं कृतता [१३३]। नैकदेशेन स्थानामुक्तौ [१३४]। शाटनं तेनापनये हारः [१३५]। निर्गमः स्यन्दकर-कृच्छिद्रेण [१३६]। एकत्वञ्चापश्चिमादतोऽत्र द्रव्यस्य [१३७]। प्रत्यादानं राशेः हारभेदः [१३८]। नियोज्यानैक्ये प्रनि(ति?)वदंशम् [१३९]। हर्षणाश्च [१४०]। लभेरन्नेकमत्येत्र हारः [१४१]।

॥ अदत्तादानपाराजयिके पृच्छागतम् ॥

(घ) विनीतस्थानि।

प्रागन्ते मृतत्वे प्रतिनिक्षेप्यत्वम् [१४२]। मृतपरिस्कारत्वं विपर्यये [१४३]। भ्रातृवत् सघो न तदर्थं हारो न स्वीकारः [१४४]। स्वमत् स्व[ा]म्यभेदः [१४५]। नापक्रमणादाननिश्चये वा शैक्षैः हृतौ तद्गत्वम् [१४६]। नांशस्वीकारेच्छानादाना-भिप्रायः [१४७]। न तद्गतकर्मानुष्ठानं न तस्य [१४८]। न सार्द्धविहारित्वं अन्तेवासिता च हारानुत्थाने कारणम् [१४९]। मर्यादार्थे परिक्षेपे तत्रम् [१५०]। न स्थितं मर्यादासचारणस्थानेनाक्षेपः [१५१]। समक्षान्तेऽप्यनाभासित्वं हारो वशीकृतत्व फलाद् ग्रहे मनुष्यस्य [१५२]। नैपात्मनः [१५३]। न हारे यदभिसंहितं तत्संबन्धादना(?न)भिसहितस्यापक्रमः [१५४]। स्थूलं यो यद् गृह्णीते तस्य तदिति व्यवस्थायामन्यहारे [१५५]। सपरिग्रहाच्छ्मशानाद् ग्रहणे [१५६]। सूनक-वाटवाण्टपत्रपुष्पफलाराम[ा]देर्मत्रैर्शप(त्रै.कर्ष?)णे [१५७]। ग्रासानुप्रदानेन यदा-श्रमधिरूढेन चैवमेष हर्त्तव्यमिति कायविप्रकारे [१५८]। नावं च [१५९]। इत इति च [१६०]। मातृपितृभ्र[ा]तृभगिन्युपाध्यायाचार्यस्थू(?स्तू)पसंघादौ संकल्प्य शुक्लकरणीयकरणीयातिक्रमणे [१६१]। याचतो धारयोरदानसकल्पे [१६२]। वण्टने चान्त्यर्थं दत्तस्य [१६३]। परिगृहीतसङ्घिनोऽपरिगृहीते [१६४]। कुल्मासौ (?पौ)-दनसक्थ्यु(क्थु?)मत्स्यमासखाद्यवस्तुकपिण्डपाद(?त)परिग्रहेनाज्ञातेव्य(?प्य)त्र व-स्तुत्वम् [१६५]। नानधी(?)ष्टेन [१६६]। दुष्कृतमनिमन्त्रितभोजने [१६७]। गमने

चापहृत्यै [१६५] । न संप्रधारणाऽस्यातः पृथक्त्वम् [१६६] । निराग्रहमिति स्वप्रत्यवेक्षितं कृत्वा गृह्णीयात् [१६७] । न कायावपा(?सा)दं कुर्यात् [१६८] । न कुलायकं भंज्येत [१६९] । नानुपितस्तत्र वार्षिके चीवरांशे वयतेत [१७०] । न हर्तुर्दानपतिचित्तेन प्रतिग्रहे दोषः [१७१] । नागमस्तेन्यचौराद् ध्वजबंधकाद् गृह्णीयात् [१७२] । शस्त्रलूनं दुर्वर्णीकृत्यातो गृहीतं धारयेत् [१७३] । दानमेवं कृतस्यापि याचने [१७४] । न चक्रकं कुर्यात् [१७५] । न मत्रैर्मोचने दोषः [१७६] । मूषिकापहृतस्य च स्वस्यादानेऽन्यभिक्ष्वर्थस्य तदर्थम् [१७७] । न अभिद्रुतस्य लुब्धके(?कै)मृगस्याश्रमं प्रविष्टस्यादाने [१७८] । मृतस्यास्य तेभ्यो देयता [१७९] ।

॥ अदत्तादानपाराजयिके विनीतकानि ॥

॥ अदत्तादानपाराजयिकं समाप्तम् ॥ २ ॥

(३) वधपाराजयिकम् ।

(क) विभंगगतम् ।

न मरणचेतनानुगुणं ग्लानायोपसंहारे त[दु]पसंहरेत् [१८०] । नाविज्ञ[?ज्ञ]मस्यानुक्तौ मृत्यौ प्रत्यनीकत्वमुपस्थापयेत् [१८१] । न सत्यां गतौ [१८२] । न मरणोपकरणम् [१८३] । मरणार्थादेनमनुष्ठानादुपस्थापको वारयेत् [१८४] । नार्थार्थे परस्य मृत्युनाकांक्षयेत् [१८५] । अकरणीयत्वं चित्तं नाकरणीयकरणानुमोदनस्य [१८६] । जीवितोपरोधे [१८७] । तच्चित्तेन मनुष्यगते(तेः ?) [१८८] । अभेदः कायतत्संबद्धमुक्तपरसमादापनानाम् [१८९] । विषचूर्णगर्तदारुनष्टप्रकृतिप्रेषणोरस्कन्दपत्रकूटवेताडयन्त्रप्रयोगानां पातनस्य [१९०] । जलाग्योः प्रक्षिप्तेः [१९१] । धारणस्य शीतोष्णयोः [१९२] । दौत्यप्रेषणादीनां अल्पत्वस्यानुष्ठाने [१९३] । स्त्रीपुरुषपण्डकत्वे घात्यस्य [१९४] । अन्यदा तन्निदानं मृतौ [१९५] । अनिमित्तत्वं विच्य(?)न्दनात् परस्याम् [१९६] । स्थूलमभिसंहितस्य मातृगर्भयोः कुक्षिमर्दे [१९७] । अधिवासनायास्तु तन्निमित्तं वधप्रवृत्तेः [१९८] । त्वन्नाम्ना मरणोपकरणं ददामीति चोक्तेः [१९९] । अन्यघाते वा तिरश्चो निर्मितस्यापि [२००] । नानुक्तमवलोक्येन ग्लानाय भैषज्यं दद्यात् [२०१] । वे(वै ?)द्यतत्प्रव्रजितक्लिष्टानामत्रावलोक्यत्वम् [२०२] । व्य[ा]धिना च [२०३] । वृद्धवृद्धानां प्रव्रज(?जिता)नां भिक्षूणाम् [२०४] । पूर्वाभावे परस्य [२०५] । अभावो मरणाय हितकामतया भैषज्यानुप्रदाने ह्रासस्य [२०६] । नासह्यभारोऽत्र क्षेपे साहाय्यं भजेत [२०७] । भजेत रूपश्चेत् प्रत्ययो व्यवकीर्णतायां गृहस्थैर्नियुक्ततायां समोत्क्षेपे [२०८] । स्थापनेऽपि समत्वे नियुञ्जीत [२०९] । नेष्टकाः क्षिपेत् [२१०] । न चटितां स्फुटितां वा नारोच्य तत्समर्प्येत [२११] । कुर्यात् तस्करपरिभृत्यै किंकिरम् [२१२] । क्षिपेत् परिकृतां संगण्ठादि [२१३] । अनुवातं च

पांसुघटभस्मकर्परम् [११७] । धारयेत् क्षं(?)पनम् [११८] । न श्रान्तं क्षिपेद् भिक्षुम् [११९] । सनाथ्यस्याप्यकरणम् [१२०] । विश्रामणम् [१२१] । भाण्डिकदानम् [१२२] । अशक्तौ प्राप्तुमावासं समं चेन्न काले भक्तस्य पानकस्य वा [१२३] । पात्रनिर्मादनम् [१२४] । गत्रीस्थापनम् [१२५] । प्रतिग्रहणम् [१२६] । प्रत्यवेक्षणम् [१२७] । काले चेत् प्रत्युद्गमनमादाय [१२८] ।

॥ वधपाराजयिके विभङ्गः ॥

(ख) क्षुद्रकगतम् ।

हस्तच्छेदनं मनुष्यगतिकस्य स्थूलम् [१२९] । दावेऽग्निदाने [१३०] । केशविक्रये [१३१] । राजकुले येन मुषितस्तस्यार्पणे [१३२] ।

॥ वधपाराजयिके क्षुद्रकगतम् ॥

(ग) पृच्छागतम् ।

नियोगोपदेशः [१३३] । निदर्शनं मातृगर्भः [१३४] । स्थूलमात्मनो घाते [१३५] । दुष्कारोऽसाधुरविकृतचित्तस्य कारः [१३६] । नासंहितार्थसंपत्ते[ः] कर्तृत्वम् [१३७] । न जन्मान्तरे कर्मोदयः [१३८] ।

॥ वधपाराजयिके पृच्छागतम् ॥

(घ) विनीतकानि ।

स्थूलं मृत्युरेवं मे भवतीति ब्रुवाणस्याप्रतियता तथात्मसंपादने मृग्य(?त्रि)तामित्यनु[प]स्थानैः ग्लानस्य [१३९] । असंप्रेयाभ्यवहार्यदाने [१४०] । गण्डस्यापरिपक्वस्य पाटने [१४१] । गर्तप्रक्षेपकगाटपीडनादौ पातने [१४२] । प्रपातोत्सर्गोद्बन्धादौ मरणार्थेऽनुष्ठाने [१४३] । न ग्लानाय सहसा शस्त्रकं रज्जुं वा दद्यात् [१४४] । संप्रजानं वैयावृत्यं कुर्यात् [१४५] । मन्त्रचपेटश्च दद्यात् [१४६] । प्रहारश्चादेरपनोदाय तद्भू(?)तं सुप्रत्यवेक्षितं कृत्व(?त्वा) लेखयेत् [१४७] । नाल्पांशो गुरुभारोद्यमं कुर्यात् [१४८] । नावमुर्धको गच्छेत् [१४९] । नाशिक्षितः शिक्षां योजयेत् [१५०] । न प्रहरणमुक्तावाज्ञापयेत् [१५१] । न ग्लानमसमर्थनि(?) नयेत् [१५२] ।

॥ वधपाराजयिके विनीतकानि ॥

॥ वधपाराजिकं समाप्तम् ॥ ३ ॥

(४) उत्तरप्रलापपाराजयिकम् ।

(क) विभङ्गगतम् ।

विनिधाय संज्ञामुत्तरमनुष्यधर्मयुक्ततोक्तात्मनः [१५३] । तत्रं पश्यामि मां पश्यन्ति शब्द[ा]न् शृणोमि मम शृण्वन्त्युपक्रमामि मामुपसंक्रामन्ति सार्द्धमा-

लपामि संलपामि प्रतिसंमोदे सातत्यमपि समापद्ये मया सार्द्धमित्युक्ते [१४७]। देवनागयक्षगन्धर्वकिन्नरमहोरगप्रेतपिशाचकुम्भाण्डकटपूतनप्रतियोकि(?गि)तायाम् [१४८]। स्थूलकृत्यं पांसुपिशाचकस्य [१४९]। अनित्यादिसंज्ञाव्याकरणाप्रमाणारूप्यफलाभिज्ञादिकमुत्तरो धर्मः [१५०]। स्थूलकृत्यं स्वलक्षणग्राहकस्य क्लेशविस्फम्भिनः शमथः निमित्तस्य [१५१]। नानुक्तिस्तद्वत्त्वस्य तद्धर्मकत्वोक्तेः [१५२]। परावदेशत्वमस्त्यसावित्युपसन्धाने स्वस्य [१५३]। नोपसंधाने [१५४]। नासमन्वाहृत्य व्याकुर्यात् [१५५]।

॥ प्रलापे विभङ्गः ॥

(ख) पृच्छागतम्।

नाख्यापनमुत्तरस्य प्राप्तपरिहानिप्रतिपादनम् [१५६]। उत्तरख्यापनच्छन्देन सनामार्थाभिधाने स्थूलम् [१५७]। विपर्ययस्य [१५८]। संसूचनेन च न भूतोत्तरत्वेऽस्य जातत्वम् [१५९]।

॥ प्रलापे पृच्छागतम् ॥

(ग) विनीतकानि।

स्थूलमन्तर्तदन्तोग्र(?)चार्हसि चीवरादिकं ब्राह्मणो वाहितपापधर्मा पञ्चतस्येन्द्रियाणि सुदान्तगुप्तरक्षितभावितानीत्युक्तस्य तूष्णीम्भावेनाधिवासने [१६०]। यदि भदन्तोऽर्हन् पिण्डपातं मे गृहाण प्रविश गृहमासने निषीद हस्तोदकं गृहाण भोजनं प्रतिगृहाण सूपिकं भुंक्ष्वानुमोदस्व निष्क्रामेति तद्वत्संपादने [१६१]।

॥ प्रलापे विनीतकानि ॥

॥ समाप्त उत्तरप्रलापः ॥ ४ ॥

§२, संघावशेषः।

(१) शुक्रमोचनम्।

(क) विभङ्गगतम्।

अभावत्वं स्वप्नः [१६२]। अकृतत्वं तत्फलस्य [१६३]। मोचने [१६४]। तच्छन्देन [१६५]। स्वशुक्रस्य [१६६]। आद्ये [१६७]। अविशेषः सुखबीजभैषज्यमीमांसार्थितानाम् [१६८]। स्पर्शनेन [१६९]। व्यापृत्या [१७०]। अङ्गजातस्य [१७१]। बाह्येनापि सत्त्वसंख्येन स्थितेन तदाहारे [१७२]। विनाप्यभिनिग्रहाभिनिपीडनाभ्याम् [१७३]। विनिर्भोगव्याप(?)कव्यवसर्गसुखप्रत्यनुभवैश्च [१७४]। अनाडीगतस्य [१७५]। अकृतत्वं विधानस्थायां प्रतिविरतो समाप्तेः [१७६]। हासकृत्यं नृत्यस्य(नृत्ती?)नृत्तयोः [१७७]। आकाशे कटिचालनस्य [१७८]। प्रदेशान्तरस्पृष्टेः [१७९]।

प्रतिस्रोतो धारणकस्य [illegible] । प्रतिवातश्च [illegible] । अभिनिर्भोगसुखप्रत्यनुभावोपसंपप(स्पर्श?)तः [illegible] । नाडीगतस्य [illegible] । न मापनार्थत[ा]यां रक्तचित्ततायां स्पृष्टिरप्रयोगः [illegible] । दर्शने दुष्कृतम् [illegible] । धारणे चानुस्रोतोवातम् [illegible] । अनापत्ति[ः] सहसा अतदर्थप्रवृत्तावूरुवस्त्रपरसंस्पर्शकण्डूयनैः [illegible] । अस्पृश्यानुभूतेः [illegible] । स्मरणतस्तस्यापि [illegible] ।

॥ मोचने विभङ्गगतम् ॥

(स) पृच्छागतम् ।

च्यविष्यमाणच्युते[ः] समनन्तरं विद्ध(?)नाडीगते [illegible] । नारम्भमात्रेण प्रयोगत्वम् [illegible] । तद्वत्त्वं निष्प्रयोगायां मुक्तौ स्वादने [illegible] । न पीडमर्दपरिमर्दनाश्चाङ्गजातस्य [illegible] । कर्मण्यस्याप्यपरिमार्गे भैषज्येन मोचनम् [illegible] । परकीय[ा]च [illegible] ।

॥ मोचने पृच्छागतम् ॥

(ग) विनीतकानि ।

विनीलकादौ विघटिति(?) अस्थिशङ्खलकयोः शिरःकर्णनास[ा]सु ग्रि(?ग्री)वान्तपार्श्वपृष्ठक्रोडवलिषु वालान्तरे हस्तांसबाहुषु बाह्वन्तरे कट्यूरुपादजंघासु जंघान्तरे च मोचने मौलम् [illegible] । स्थूलकोचवनमर्त(?ता)चिलिमिनिकविम्बोपधानकमंचपीठवृशिपीठान्तरे घटघटिकाघटविलकरकिनीकठिल्लकशिलालेपलेपान्तरार्गटमांसपेशिषु [illegible] । व्रणपीडने [illegible] । निपीडने स्त्रीकृतस्यारम्भे [illegible] । अङ्गुष्ठस्यात्र प्रक्षिप्तौ [illegible] । उपसंक्रामतो मुक्तौ [illegible] । संक्रामतश्च स्थानात् स्थानम् [illegible] । अयोनिशश्च मनसि कुर्वतः [illegible] । अंगजातं धारयतः [illegible] । अनापत्तिः वस्तिसंघर्षणात् [illegible] । परिष्वङ्गेनापीदानीं पुराणद्वितीयया [illegible] । पादजंघाबाहूर्वंगुल्यादौ च स्त्रिय[ः] ग्रहणे [illegible] ।

॥ मोचने विनीतकानि ॥

॥ मोचनं समाप्तम् ॥ १ ॥

(२) कायसंसर्गः ।

(क) विभङ्गगतः ।

स्त्रिया कर्तृत्वम् [illegible] । इह [illegible] । रहसि, निपद्यास्थानयोः [illegible] । समोजनतायाश्च [illegible] । सह शय्यायां अन्यन्यविज्ञपुरुषया सार्द्धमूढौ [illegible] । उत्तरत्र द्वये [illegible] । देशेने(?)गृहिण्याः पुंसोः सान्निध्यविज्ञस्य [illegible] । सान्निध्येऽप्यकल्पिकायाम् [illegible] । दुष्कृतस्य [illegible] । न्यूनत्वं द्वीपान्तरजविकारभाजः [illegible] । चोदृत्वमस्य [illegible] । व्यर्थं दार्विल्ये(?)परं लिङ्गम् [illegible] । अवताकार(रक?)मत्र [illegible] ।

या (?) ज्ञाते सुभ[ा]षितदुर्भाषितयोरर्थस्य त्रयोऽन्त्येऽन्यत्र प्रतिसेवने मिथुनस्येति प्रतिबलत्वे मौलस्य [illegible] । अनन्तरस्यान्यत्र [illegible] । तद्वत्पण्डिका पण्डिको निर्मिता च [illegible] । इह च त्रये पुरुष[ाः] [illegible] । तत्र सुखानुभवनच्छन्दे चेत् संरागसंप्रयुक्तेनेति [illegible] । गात्रसंसर्गस्वीकारे [illegible] । तद्वत्त्वमत्र वेणोः [illegible] । तत्प्रतिबद्धस्य च चीवरस्य [illegible] । अविशिष्टत्वमामर्षयामंशालम्भग्रहणाकर्षपरिकर्षोल्लिंगावलिङ्गाभिनिपीडानाम् [illegible] । सेव्यकृत्त्वस्य च [illegible] । अनन्तरं चीवरान्तरये [illegible] । अनन्यत्वं दुष्कृतद्वासस्य [illegible] । न भिक्षुणीं स्पृशेत् [illegible] । न स्त्रियम् [illegible] । स्पृशेदंभस्यार्त्तामुत्तारणाय वाहौ केशेषु वा मातृदुहितृभगिनीसंज्ञामुपस्थाप्य [illegible] । वालुकास्थाने चेष्टालाभार्थमवाङ्मुखावस्थापनम् [illegible] । पीठवद् रक्षणम् [illegible] । भुक्तायावलोक्य गोपालपशुपालकानगमनम् [illegible] । प्रत्यवेक्षणं जीवति न वेति पौनःपुन्येन [illegible] । निर्दोषोऽनुकम्पया शुद्धचित्तस्य स्त्रीपरिष्वङ्गः [illegible] ।

॥ कायसंसर्गे विभंग. ॥

(ख) पृच्छागत ।

श्लक्ष्णोष्णमृदुकाभिप्रायत्वे स्थूलम् [illegible] । अनापत्तिरनुकम्पया दुःखात् मोचने [illegible] । मातृदुहितृभगिनीषु तत्संज्ञाने [illegible] । पूर्वसंभुक्तायां संमोदने [illegible] ।

॥ कायसंसर्गे पृच्छा ॥

(ग) विनीतकानि ।

भिक्षापांसुलेड्डुकादेः स्त्रीन्द्रिये प्रक्षिप्तौ स्थूलम् [illegible] । दुष्कृतं पादांशादिना स्त्रीघट्टने [illegible] । तदासनस्य च [illegible] । पिच्छिलितपतितस्युत्थापने [illegible] । अनापत्ति[ाः] स्त्रियाऽप्यैतत्त्रयकरणे ग्रहणे च [illegible] । आलिंगने मात्रा [illegible] । दुहितोत्सङ्गे निपत्तौ (?) [illegible] । स्त्रिया प्रस्रस्योपरिपाते [illegible] ।

॥ कायसंसर्गे विनीतकानि ॥

॥ कायसंसर्गः [समाप्तः] ॥ २ ॥

(३) मैथुनाभाषणम् ।

(क) विभङ्गगतम् ।

मैथुनोक्तौ [illegible] । याद्य(?)र्थेन [illegible] । यत्र वोढुं भव्यता स विज्ञपनेऽन्तः [illegible] । न तद्वतार्थोक्तेऽप्रयोगत्वम् [illegible] । अविशिष्टत्वं वर्णावर्णयात्रोपयात्रापृच्छापरिपृच्छाख्यानाशंसाक्रोशप्रत्यनुभाषणप्रतिपदाम् [illegible] । अनापत्तिरर्थान्तराभिप्रायेण जनपदनिरुक्तिवशात् [illegible] । सदृशार्थत्वस्य वा नाम्नः [illegible] ।

॥ मैथुनाभाषणे विभङ्ग ॥

(ख) पृच्छागतम् ।

स्थूलं छेकांशी(? काऽसी)तिनादे पापिकासीति छेकं ते पापकं वा व्रणमुखमिति संविभागं कुर्विति मां संविभजस्वेति मया सार्द्धं स्वपिहि समागमं वा कुर्विति [६७] ।

॥ मैथुनाभाषणे पृच्छा ॥

(ग) विनीतकानि ।

तथा विकुर्वाणधर्मिकाभाषणे [६८] । यवान्(गुं?) देहि देहि भगिनि मह्यं यत्ते भगिनि पश्यामि तद् देहि यत् ते भगिनि पुरतस्तद् देहि यत् ते भगिनि मनआपं तद् देहि प्रियं ते देयमित्यहमुक्ता किन्ते प्रियमित्युक्ते त्वं मे भगिनि प्रिया [६९] । देहि मे भगिनि पानीयं खाद्यकं यवागुं भोजनं त्वमेवैतदित्युक्तिषु [७०] । गर्दभास्त एतत् कुर्वन्त(?न्तु) [७१] । चारिकां भगिनि चरस्युल्लापयमाना पुरुषान् पिण्डपातम् [७२] । अलातमस्मिन् प्रक्षिप्तेति च [७३] । प्रकृत्या च दौष्टुल्यभाषिणो दुष्टुलया भाषणे [७४] ।

॥ मैथुनाभाषणे विनीतकानि ॥

॥ मैथुनाभाषणं [समाप्तम्] ॥ ३ ॥

(४) सांचरित्रम् ।

(क) विभङ्गगतम् ।

मैथुनेनात्मनः परिचरणस्य वर्णने [७५] । तद्वद्वर्णितानुमोदनार्थं वचनम् [७६] । तदेव प्रत्युच्चारणम् [७७] । तेन मैथुनेन वानुपसंधाने प्रयोगत्वम् [७८] । उभाभ्यां तस्य [७९] । परिचर्यासंवर्णनम् [८०] । संयोगे [८१] । अन्यस्य [८२] । अन्येन [८३] । तदर्थम् [८४] । अनुपनतोपनतेः प्रमत्तैः गृहीतदौतेयस्य संप्रयोज्यतो निवेदि भवतस्तत्रेतरतदुक्ते पूर्वत्र प्रवेदने [८५] । कृतत्वं श्रुतत्वेऽप्यमध्यवृत्तेः [८६] । पृथक्त्वमेषां करणीयतायाम् [८७] । नाकर्तृत्वेऽन्त्यस्य नृत्वेन (?) प्रयोगत्वम् [८८] । न फले क्या(?स्या)त् प्रतिकर्तृसमाप्ते व्यापारस्य लोपः [८९] । स्वत्वमत्र दूतस्य [९०] । संप्रयोज्यत्वं तत्प्रभोः [९१] । ...पत् (?)तत्वमन्यस्य । [९२] । वाक्त्वं लिपिहस्तमुद्रोद्देशं संकेते निमित्तानाम् [९३] । अनुपनतिवेश्यात्वम् [९४] । प्रवत(?)त्वं चास्वत्वेन प्राक् चतुष्ट[य]त् [९५] । भ्रष्टत्वं फलहितत्वे [९६] । तद्वशा चेदभार्यानुश्रावितत्वे प्राणिवत्त्वं तदन्तरसमन्तरकलिहितत्वतिलिन्तिलिकाच्छिन्नद्विनिसर(?सं)करापरितत्वाचारप्रतिनिःसृष्टत्वाभार्यानुश्रावितत्वघण्टा च घुष्टत्वानां दुष्कृतकृत्त्वं त्रयस्यास्यामार्यस्य [९७] । कस्मादयं न प्रतितिष्ठतीयं न गच्छति श्वशुरगृहान्न नीयत इति चोक्तीनाम् [९८] ।

॥ सांचरित्रे विभङ्गः ॥

(ख) पृच्छागतम् ।

स्थूलं गर्धासन्निपतासेवनक्रीडोपनतात्मनां सांचरित्रे[५००] । व्यपदेशे प्रतीष्टतायाम् [५०१] । कलि(?ल)हेन हारणे [५०२] । माऽऽर्यामुक्का(कां) स्त्रियं क्रीणीहीत्युक्तौ [५०३] । दुष्कृतं स्त्रियमिति [५०४] । काचिल्लभे[ते ?]ति च [५०५] ।

॥ सांचरित्रे पृच्छा ॥

(ग) विनीतकानि ।

स्थूलं दत्ततो तामसमाधानेन [५०६] । धर्मोपाधिं पुरस्कृत्य शब्दनेन [५०७] । अन्यार्थामसंहित[ा]श्च [५०८] । नादुष्टताया[ः] सत्त्वस्यान्यत्रेत्यनाक्षिप्तत्वम् [५०९] ।

॥ सांचरित्रे विनीतकानि ॥

॥ [समाप्तं] सांचरित्रम् ॥ ४ ॥

ॐ

(५) कुटिकाविहारगत ।

(क) विभगगत ।

निर्दोषमयात्र ईर्यापथचतुष्कस्य [५१०] । अतत्रत्वं नियुक्तानियुक्तत्वयोः [५११] । स्वत्वं नियुक्तस्य [५१२] । प्रतीष्टा वो यथोक्तकारे कायेन वा वाचा वा [५१३] । एकत्वं कृतेः [५१४] । अकर्तृत्वमङ्गानां भेदस्य [५१५] । याचितेऽनुज्ञाते वा तेन तद्विधेनाशुद्धे [५१६] । वस्तुन्यदेशिते आव[ा]सस्य कारणान्ते [५१७] । अनन्तरेऽप्येतदयाचितत्वम् [५१८] । एकार्थमिति प्रमाणस्य [५१९] । अकल्पिता सारम्भत्वमपराक्रमतेत्यशुद्धिः [५२०] । क्षुद्रजन्त्वाशयवत्त्वं राजकुलतीर्थकावसथसन्नि[ः] सृतत्वाच्छद्यवृक्षत्वमर्वाग्व्यामान्तानन्तर्यतो बहिर्नदीप्राग्भारोदयानावष्टब्धत्वमिति यथासंख्यमेतानि [५२१] । प्राम[ा]णिको हस्तोऽध्यर्धः सुगतवितस्तिः [५२२] । तद्द्वादशकसप्तको (?) प्रमाणामम(?)न्तरम् [५२३] । लब्धदेशनत्वं संघतो देशितत्वम् [५२४] । नाशुद्धस्य याचेत [५२५] । स्वप्रत्ययेन वा गच्छेयु[ः] नियुक्तानां वा भिक्षूणाम् [५२६] । संस्तरेऽप्येतद् [५२७] । अनापत्तिः कृतलाभ-परिभोगयोः [५२८] । पुराणाभिसंस्करणे च [५२९] ।

॥ कुटिकाविहारसंघावशेषे विभंग. ॥

(ख) पृच्छागत ।

प्रयोगत्वमारम्भस्य [५३०] । तद्वदच्छन्नकारणेऽन्तः [५३१] । अनेकार्थं अनि[ः]मुष्टे पौद्गलिकेन [५३२] । विप्रकृतस्य च [५३३] । दुष्कृतमनिर्वाहे याचनादूर्ध्व(?र्ध्वं)म् [५३४] ।

॥ कुटिकाविहारसंघावशेषगता पृच्छा ॥ ५ ॥

ॐ

(६) अमूलकसंघावशेष ।

पाराजयिकाध्याचरणस्य भिक्षोर्ध्वस्तस्याप्यनङ्गमत्र पक्षतः स्वत्वं मृषावादेन कस्यचिद् विज्ञप्तौ [५३] । व्या(?या)चनच्छन्देन [५४] । न तं मूलमन्तरम् [५५] । असत्त्वं प्रमुषितस्य प्रकारणमृषावादित्वेऽर्थनत्वम् [५६] ।

॥ अमूलकसंघावशेषः ॥ ६ ॥

(७) अन्यथाभागीयानुध्वंसने ।

वाच्यान्तरप्रतिष्ठेन वाक्येन मृषा [५७] ।

॥ अन्यथाभागीयानुध्वंसनसंघावशेषः ॥ ७ ॥

(८) अमूलकलेश ।

स्थूलमसेवनेनानुध्वंसने [५८] । अनुग्रहे च नाम्नः [५९] । तथा न तस्यान्तिके दुष्टचित्तरुधिरोत्पादने संघभेदे च संसूचने सन्धाय भाषितमित्यपि दुष्कृतम् [६०] ।

॥ अमूलकलेशपृच्छा ॥ ८ ॥

(९) संघभेदे ।

परपर्षदपकृष्टौ स्थूलम् [६१] । निवारणप्रतिनि[:]सर्गानुष्ठानरूपानुगतिः [६२] । निवारणवत्त्वं ज्ञप्तेः एकक्षणत्वं वाक्यस्य [६३] । पृथक्त्वमावृत्तेः [६४] । न निगमनस्य [६५] । प्रयोगत्वं प्रवृत्तेः [६६] । तस्याः कृतप्रवासनीयचोदनसारणस्य [६७] । अनाज्ञाप्यत्वमस्य [६८] । नैषु न नाज्ञपयेयुर्मेथ(?)केन कर्मणा च [६९] । तदन्ते प्रतिनि[:]सर्गे [७०] । पराक्रान्तित्वस्य [७१] । भेदे [७२] । संघस्य [७३] ।

॥ संघभेदसंघावशेषः ॥ ९ ॥

(१०) अनुवर्त्तने ।

तत्साहाय्यप्रतिपत्तृतायाः [७४] ।

॥ अनुवर्त्तनसंघावशेषः ॥ १० ॥

(११) कुलदूषणे ।

स्वप्रवासनकर्तरि संघे मिथ्याशा येनैषास्यान्न प्रवृत्तिरिति वक्तृत्वस्य मृषा [७५] ।

॥ कुलदूषणसंघावशेषः ॥ ११ ॥

(१२) दौर्वचस्ये ।

चोदितत्वे भिक्षुणाधिशीलमवचनीयत्वस्यान्न भिक्षुरात्मनः कृते [७६] ।

॥ दौर्वचस्यसंघावशेषः ॥ १२ ॥

॥ संघावशेषः समाप्तः ॥

§ ३, नैस्सर्गिकः ।

(१) मारणे ।

नापूर्वेऽहोरात्रेण न[ा]स्त्यस्य सत्त्वम् [५५] । प्रयोगपात्रत्ववासे [५६] । प्रथमारुणादिरेषोऽस्य [५६] । सूर्योद्गमने कर्म दृष्ट(?) ये [५६] । सत्त्वं नै[ः]सर्गिके संज्ञानतः प्राधान्येन [५६] । अपेतत्वमस्य निर्यातितत्वे [५६] । तत्त्वं प्रव्रज्यापेक्षार्थतायां नियमनस्य [५६] । चीवराद् विकल्पनायाश्च [५६] । ध्वंसोऽत्रानुवृत्तत्वस्य [५६] । भ्रंसे(?शे) च प्रकृते [५६] । सतोऽस्यान्यत्रापि तद्वस्तुनि जातत्वम् [५६] । स जातो(?) साप्ताहिके [५७] । नै[ः]सर्गिकत्वस्य तदापत्तिसत्तायां स्वीकृते परिस्कारमात्रे [५७] । नैतदूनत्वे खण्डस्य [५७] । सांघिकस्य च [५७] । निस्तत्त्वमत्र तत्त्रम् [५७] । नेदं त्रयमास्तीर्णकठिनस्य [५७] । सद्भावे सत्त्वस्यानुवृत्तस्य दशरात्रम् [५७] । पराहादौ [५७] । वाससि [५७] । त्रिमण्डलस(?श)छादिपर्यन्तप्रमाणे [५७] । असम्बन्धाधिष्ठानेन [५८] । सम्बन्धे च सानुवृत्तौ अन्यत्राधिष्ठिततद्भोर्ता(?गा)त् प्रभृत्यन्यत्र [५८] ।

॥ मारणे नैस्सर्गिकः ॥ १ ॥

(२) विप्रवासे ।

(क) विभागगत. ।

निर्दोषो निःश(?प)दनेन विप्रवासः [५९] । न प्रमील्य प्रत्यास्तरणं गच्छेन्न चेदन्यैव प्रतिप्राप्तिरिति संख्या [५९] । वासे देवमभिप्रेत्य गतो कालसम्पत्तौ तत्र याचित्वैतत् [५९] । असम्पत्तौ चतुर्गुण उत्तरासंगे बहुतरजागरणेन [५९] । नानर्हे(?)संघाटीनिक्षिप्तेतवसेपक्षाशानि (?) निक्षिपेत् [५९] । न वृष्टौ [५९] । न नद्यन्तरे तद्दे[गा?]गन्तव्यस्य [५९] । नानयोराशङ्कायाः [५९] । भिक्षुकपकवाटकत्वं सहितमावास्य वर्षतो देवस्य वर्षाशङ्किता वा जलान्तरितत्वं गन्तव्यस्येत्यस्याभावेनादत्तसंवृत्तिरनास्तीर्णकठिनः संघाटीं विना न क्वचिद् गच्छेत् [५९] । अन्याधिष्ठानमुत्सृज्य प्रचीवरस्थानात्यसंभवे प्रतिविधिः [५९] । दानमविप्रवाससंवृत्तेः संघाट्या गुरुकत्वे जीर्णं वाधिकयोः [५९] । अधिष्ठितस्यालब्धसंवृत्तेः कर्तृत्वम् [५९] । सोपविचारात् तत्स्थानादन्यत्र स्थितस्यारुणोद्गतौ [५९] । कृतमर्यादे मर्यादास्थानपर्यन्तः [५९] । नैकत्वे परिगृहीतुरवान्तरमर्यादानां भेतृत्वम् [५९] । अविभक्ततायां च धनतो दृष्टितश्च [५९] । शाखोपशाखानामसंसंगे पृथक् स्थानत्वं साधारण्यमूलस्य [५९] । मूलामूलादेश [५९] । संसक्तशाखाविटपवृक्षाणामेकस्थानत्वम् [५९] । तलक इव तत्राधोभागस्य प्रवेशः [५९] । नौ-शकटयोश्च [५९] । निर्मर्यादे व्याप्यङ्ग(म?)पर्यन्तः [५९] ।

उपविचारव्यामस्सामन्तकेन [६०७] । कुड्यपरिक्षिप्ते ग्रामे यावत् पङ्गवयुक्तेन वंशशकटेन स्फुरणमध्वना वा कुक्कुटस्योत्पात्य निलयने वाटपरिक्षिप्तेऽजैडकरजासंप्रकृतिहीमत्पुरुषप्रविचारभूम्यध्वना वा [६०८] । परिखापरिक्षिप्ते द्वादशपदिकया निःश्रयण्या[ः]च्छोरितसंकारस्थूललोष्टाध्वनो वा [६०९] । तत्स्थाने त्रिकरणीयपरिसर्पणातिना मन रजोभिश्च यावतस्तद्गतस्य संभावनम् [६१०] । निर्मर्यादेऽध्वन्यभिन्नगतेर्मनुष्यस्येकान्नं(स्यैकोन?)पञ्चाशद् व्यामाः [६११] । न सीमान्तरं पृथक्त्वं क्रोशान्तान्मध्यतः परस्य [६१२] ।

॥ विप्रवासनैस्सर्गिके विभङ्गः ॥

(क) क्षुद्रकगतः (?)

न पाखण्डतोपगतावधिष्ठानस्य [६१३] । नारूढिनैस्सर्गिके [६१४] । सांधिके [६१५] । भवत्यतो विप्रवासः [६१६] । नान्याधिष्ठानादन्यस्थानत्वहानिः [६१७] । नान्येदं धर्मकयोः दृष्टितश्चेदनाक्षेपः [६१८] । न साधारणैज्वार(?द्वार)कोष्ठकस्य [६१९] । न धनत इति पितृपुत्रयोः [६२०] । विवर्जिताप्येतत् [६२१] । सभोजनत्वे च [६२२] । नोपविचारत्वं ग्रामेऽस्याभवतो विहारस्य [६२३] ।

॥ विप्रवासनैस्सर्गिकः ॥ २ ॥

(३) मासिके ।

(क) विभागगतः ।

पूर्णवदसत्यां पूरकप्रत्यासा(सं?)शायां न्यूनं मासमसामन्तकात् [६२४] । सत्त्वे चाधिष्ठानिकस्य [६२५] । अन्यत्राप्यत्रिंशद्राहा(?त्रा)तिक्रान्ते [६२६] । अपूरकत्वविजातीयस्य वर्णादितः [६२७] । सर्ववर्णत्वं शौक्ल्ये [६२८] । तद्ग्रणाहादो ए(?)ग्रथितत्वं संपत्तौ तस्य [६२९] । पुटद्वयमहतात् संघाटीपर्यन्तः [६३०] । निपदनस्य च [६३१] । एक उत्तरासंगान्तर्वासनो(नः) [६३२] । द्विगुणमृतुहतात् [६३३] । अनियम[ः] पांसुमयेषु [६३४] । दद्याल्लू(?)हत्वे परिचितायां वाधिकानि यावदर्थम् [६३५] । अदेयत्वमधिकस्य [६३६] । नैस्सर्गिककृत्यश्च [६३७] । न न्याय्यमुत्पादयेदत्रैव परिकर्म कृत्वारोपयिष्य इत्यनुसम्पाद्य चित्तम् [६३८] । यथातथोत्पाटितस्य प्राक्सभायोगान्नैस्सर्गिककृत्यम् [६३९] । खण्डसंघाट्यां नव प्रभृत्या पञ्चविंशतेर्युग्मवर्जम् [६४०] । अतः(?)यं कन्या [६४१] । प्रथम एषां त्रिकैः द्वितृतीयमण्डलकत्वम् [६४२] । अर्धचतुर्थमण्डलकं द्वितीये [६४३] । तृतीये पञ्चममण्डलकत्वम् [६४४] । त्रिपञ्चकानि स्वहस्तैः ज्येष्ठान्याधिष्ठानिकानि [६४५] । कनिष्ठान्युभयतोऽर्द्धहस्तमुत्सृज्य [६४६] । अनन्तरं मध्यानां प्रमाणम् [६४७] । अन्तर्वासो द्विपञ्चकमपि द्विचतुष्कश्च [६४८] । आत्रिमण्डल-

च्छादितत्वेऽपि [५४] । कायसप्तांशद्वयं हस्तेऽर्थः [५५] । अकारयति कुसूलक-करणम् [५६] ।

॥ मासिकनैस्सर्गिकविभङ्गः ॥

(ख) पृच्छागतः ।

दुष्कृतकृत्त्वं न्यूनवत्त्व(?द)न्तरे [५७] । अप्रत्याशत्वमच्छादनेऽर्द्धमण्ड-लस्य [५८] । अकल्पिके च [५९] । निरधिष्ठ[ि]नानाञ्च मुखपोचपरिश्रावप्रत्या-स्तरणचिलिमिलिकादीनां परिस्कारचीवराणाम् [६०] ।

॥ मासिकेपृच्छा ॥

॥ मासिकनैस्सर्गिकः ॥ ३ ॥

(४) धावने ।

(क) विभंगगतः ।

प्रतिगुप्तेरन्तर्वर्त्यास्थानम् [६१] । अनुपेक्षणमत्र भिक्षुणीभिः [६२] । पिण्ड-कस्यास्यै दानम् [६३] । ज्ञातिरासप्तमाभ्यां पितृभ्यामन्यतरेणाप्येकपूर्वजः [६४] । संज्ञानस्य कर्तृत्वं प्राधान्येन अन्यदेतत् [६५] । भिक्षुणीत्वतदज्ञातित्वयोः [६६] । उत्तरसिंश्च [६७] । अधिष्ठितस्वपुराणधावनार्हचीवरनिपदनांकस्य निर्धावनरञ्ज-नाकोटनेषु विज्ञप्त्या [६८] । प्रदेशस्यापि कृतौ कर्मणः कृतत्वम् [६९] । कृतत्वे कारितत्वम् [७०] । आफलपर्यन्तादेकत्वम् [७१] । पर्वभूतत्वे फलाना-मैक्यम् [७२] । संज्ञानप्रधानतायां यथार्थे मौलम् [७३] । उपमूलत्वमयथार्थत्वे संज्ञानाद् विमतिः [७४] । सांघिकं क्रियाकारमनुरक्षेत् [७५] । अनिस्सरणमत्रा-गन्तुकत्वं सदसत्त्वरूपनिर्ज्ञानार्थमस्य तेन प्रश्नः [७६] । अनतिनमय्य (?) [७७] । बुद्धोक्तः सांघिकाद् विचालः [७८] । गृह्णीयान्निःसृज्यमानमतिरेकं पात्रचीवर-शिक्यसरितकायबन्धनं संघ उपनिक्षेपाय [७९] । तथोपनिक्षेप[ः] तस्य यथेष्टं तद्विकल्पैरादानम् [८०] ।

॥ धावननैस्सर्गिके विभङ्गः ॥

(ख) पृच्छागतम् ।

नोचारप्रस्रावस्यन्दनिकाकर्दमादिनासितधावनेऽस्त्यपहासः [८१] । दुष्कृतं चिलिमिलिकागृहचोडोपधानकविकल्पितनिःसृष्टसांघिकानाम् [८२] ।

॥ धावननैस्सर्गिकपृच्छा ॥

॥ [इति] धावननैस्सर्गिकः ॥ ४ ॥

(५) प्रतिग्रहे ।

(क) विभंगगत ।

प्रतिगृह्णीयाद् भिक्षुणी महार्हं वासः परिवर्हणाय कुर्याद् भिक्षुण्या सार्द्धं परिवर्तकम् [८३] । तुल्येन तत्तुष्टिकृता वा प्रतिग्रहे [८४] । विज्ञप्त्या चीव-

रस्य [६७] । अनापत्तिः पटकप्रदाने संघाय सौभाषणिकस्य [६८] । उपसंपाद्यमानमुपितयोः [६९] । चित्रश्रद्ध[ा]मुद्धाव्य पुरतः [७०] । स्थापयित्वं[ा] निरपेक्षणं प्रक्रमणे [७१] ।

॥ प्रतिग्रहनैस्सर्गिकविभङ्गः ॥

(ख) पृच्छागत ।

हस्तिभूतत्वं लब्धदाने [७२] । दर्शनोपविचारगततास्यादिः प्रयोगत्वमसन्निहितप्रतिष्ठे [७३] । वैशद्यमयाग्रामसत्त्वं च पटप्रदानादौ तत्रम् [७४] । अनापत्तिस्तावत् कालिकचित्तेन विस्मृत्य मूल्यादाने [७५] ।

॥ प्रतिग्रहनैस्सर्गिकपृच्छा ॥

॥ [इति] प्रतिग्रहनैस्सर्गिकः ॥ ५ ॥

(६) याच्ञानैस्सर्गिक ।

मनुष्यगतिगतो गृहीभूतः प्राण्यज्ञातिरापत्तिकृत् [७६] । उत्तरस्मिंश्च त्रये [७७] । अनाच्छिन्ननष्टदग्धहृतोऽर्द्धचीवरस्य [७८] । विज्ञाने दुष्कृतस्य [७९] । मौलस्य लब्धौ चीवरस्य [८०] । अनूनस्य [८१] । यद्विधस्यार्धवर्णसमतो विज्ञप्तिः [८२] । अनापत्तिरन्यस्य [८३] । न तुकदशिकपोश्च विज्ञ[ा]पने [८४] । न्यूनत्वमोतो(?)स्तानस्य च [८५] । तद्वत् तत्प्रकृतिः [८६] ।

॥ [इति] याच्ञानैस्सर्गिकः ॥ ६ ॥

(७) विज्ञापनार्ह ।

सर्वस्याभावेऽधिष्ठेयस्य विज्ञपनार्हत्वम् [८७] । अस्यापत्यता [८८] । परं गृहिणो द्वादशहस्तकः परकोत्तरमन्तरं सप्तद्विकशाकटः [८९] । भिक्षोः ज्येष्ठे यथोक्तपुटे संघाटीनिवसने [९०] । युग्मस्य विज्ञ[ा]प्यत्वम् [९१] । अन्यतरस्य [९२] । अतिरिक्तस्यातः प्रमाणादविज्ञप्यत्वम् [९३] । पूर्वकस्य च पूर्वलब्धौ उत्तरलब्धावधिकस्य देयत्वम् [९४] । उत्तरलाभ अति(धि ?)कस्य देयत्वम् [९५] । विज्ञप्तावविज्ञप्तस्य दुष्कृतम् [९६] । विज्ञप्तावविज्ञप्यस्य दुष्कृतम् [९७] । लब्धौ मूलम् [९८] । अदाने च देयस्य [९९] ।

॥ [इति] विज्ञपनार्हनैस्सर्गिकः ॥ ७ ॥

(८) सकल्पित ।

संकल्पितमप्रवारितस्य ज्ञातं तुल्यमसंकल्पितेन [१००] । तदेवान्यत् [१०१] ।

॥ [इति] संकल्पितमार्गनैस्सर्गिकः ॥ ८ ॥

(९) प्रत्येक ।

वैशद्य[म]पि दातुः [१०२] । एकत्वं लब्धेः प्रयोगैक्ये [१०३] ।

॥ [इति] प्रत्येकनैस्सर्गिकः ॥ ९ ॥

(१०) प्रेषित ।

प्रेषितमकल्पिकं चीवरमूल्यं प्रतिक्षिप्य परिप्रश्न(?श्न)पूर्वकमुपदिष्टं वैयापृ(?वृ)त्यकरणमादिष्टं दूतेनोक्तो वृत्तान्तत्वाख्यापूर्वकश्चोदयेत् [७१४] । नाशक्त(?)-वत्तायां संप्रधारणे चोदितत्वम् [७१५] । असम्पत्तौ द्वितीयमपि [७१६] । तृतीयश्च [७१७] । तत आवृतीयमुद्देशे तिष्ठेत् [७१८] । असम्पत्तौ दातारं श्रावयेत् [७१९] । वृत्तायामेवं प्रतिनिःश्रि(?सृ)ष्टौ प्रयच्छत उक्तप्रतिनिःसर्गादभ्युपेतत्वात् [७२०] । चित्तग्रहणानुष्ठानात् प्रतिगृह्णीयात् [७२१] । परंचोदनेन स्थानेऽभ्युपेते वा [७२२] । गृहीतौ [७२३] । मनुष्यद्वे(?)त्रयस्य गृहीतत्वे च [७२४] । अनुक्तौ दुष्कृतम् [७२५] । अप्रतिक्षेपे [७२६] । अपृष्टोपदेशे च [७२७] । नैराश्ये चाश्रावणे [७२८] ।

॥ [इति] प्रेषितने.सर्गिकः ॥ १० ॥

(११) कौशेय ।

(क) विभगगत ।

धारयेत् संस्तरम् [७२९] । कृतिकारणयोः [७३०] । को(कौ)शेयस्य [७३१] । संस्तीर्णतादि संस्तरे [७३२] । कृतिनिष्ठानस्य [७३३] । अनापत्तिः कृतलाभे भोगाभिसंस्करणेषु [७३४] ।

॥ [इति] कौशेयने.सर्गिके विभंगः ॥

(ख) पृच्छागत ।

न्यूनत्वन्यूनमिश्रत्वे [७३५] । विनष्टतायाश्च द्रव्यस्य [७३६] ।

॥ [इति] कौशेयने.सर्गिके पृच्छा ॥ ११ ॥

(१२) शुद्धकाले ।

शुद्धकालकैडकरोम्नाम् [७३७] । जात्या [७३८] । तत्त्वं नीलकर्न(?र्ण)मकर्कचश(?)कानाम् [७३९] ।

॥ [इति] शुद्धकालने.सर्गिकः ॥ १२ ॥

(१३) द्विभाग ।

अतिरिक्तत्वेऽर्द्धस्य तेषाम् [७४०] । समांशत्वमितरत्रावदातगोचरकानाम् [७४१] । पार्श्वपृष्ठग्रीवजं पूर्वम् [७४२] । शिरपादोदरजमुत्तरम् [७४३] ।

॥ [इति] द्विभागनैस्सर्गिकः ॥ १३ ॥

(१४) षड्वर्ष ।

दैर्घ्यविस्तारयोरतिमात्रत्वे छेदनम् [७४४] । वर्त्तनं ह्रस्वसंवृतत्वयोः [७४५] । छेदे संबन्धनम् [७४६] । प्रतिवायो भेदे दौर्बल्ययोः [७४७] । दुष्प्रतिसंस्करत्वे दानम् [७४८] । अलब्धसम्वृत्तेः सत्यन्यत्र स्वकमत्यक्ते यानतिक्रान्ते [७४९] ।

षड्वर्षसंगतौ कृततायां संस्तरस्य (७०) । सच्चवदारम्भे विप्रकृच्चम् (७१) । नान्तगतौ प्रयोगस्यानापत्तिकृच्चम् (७२) । पृथक्त्वं प्रव्रजा(ज्या)न्तरस्य (७३) ।

॥ [इति] षड्वर्षनैःसर्गिकः ॥ १४ ॥

(१५) वितस्ति ।

अदत्तपुराणनिपदनसुगतविद्(ित)स्तैर्नवनिपदनस्य परिभोगे (७४) । सचैतत् (?) (७५) । एतावतापि (७६) । शक्यप्रतिसंस्कारेणापि (७७) । संदर्भसमुदागमने वा (७८) ।

॥ [इति] वितस्तिनैस्सर्गिकः ॥ १५ ॥

(१६) ऊर्णोढि ।

सति वोढर्यसति च योजनत्रयादूर्ध्वमेडकोर्णवहने (७९) । क्रोशोऽध्वनि गतेरात्मा (८०) । प्रयोगस्यार्द्धं दुष्कृतमृद्धेरन्येन नभसा हरणे निर्मिते च (८१) । निर्दोषं खोलापूलालेप्यकायष्कुञ्चकलोढकनप्रसुचिकार्थं तन्मात्राणाम् (८२) । परमाण्वण्वब्लोहशर[ा]विगोमातायनच्छिद्ररजोलिक्षयूकयवाङ्गुलीनां षट्पूर्वमुत्तरम् (८३) । पद्(?) चतुरङ्गुलो हस्तोऽर्धचतुर्थः हस्तकः पुरुषश्च चतुर्हस्तकं धनुस्तत् शतपञ्चकं क्रोशः (८४) । तदन्तादि चरण्यस्य न कायभारं वहेत् (८५) । न पार्श्वपृष्ठकटिशिरोभिः (८६) । अनाशङ्क्यमसिन्नसाधारणत्वम् (८७) । नार्द्धभागादूर्ध(?र्ध्व)मुत्पाटयेत् (८८) ।

॥ [इति] ऊर्णोढिनैस्सर्गिकः ॥ १६ ॥

(१७) ऊर्णपरिकर्म ।

पुराणचीवरस्य स्थाने एडकरोमाणि (८९) । विचटनमाकोटनस्य (९०) ।

॥ [इति] ऊर्णपरिकर्मनैस्सर्गिकः ॥ १७ ॥

(१८) जातरूपरजते ।

स्वीकृते रत्नस्य (९१) । गम्यतायां तत्पूरिः (९२) । स्वस्य चाकृतकल्पस्य (९३) । स्पृष्टो(?)स्पर्शेन च (९४) । यथाकथञ्चित् (९५) । पात्रिकताम्रस्य दुष्कृतम् (९६) । अनापत्तिरन्यस्य (९७) । त्रपुसञ्जशी(?सी)सलोहानां श्रामणेरयोश्च (९८) । दानपतेः स्वामित्वाधिमोक्षो वैय्य[ा]ट(?वृ)त्यकरस्य स्वामित्वाधिमोक्षौ वैय्यावृत्याकरस्य (९९) । स्वामित्वाभ्युपगमनमधिष्ठानमितिकल्पाः (१००) । नाविद्यमानधर्मार्थप्रत्ययादन्यत्र रुद्दि(?रूढि)ः (१०१) । न दूरत्वे स्वामिनो ध्वस्तिः (१०२) । कल्पते कारणमात्मार्थं भोजनस्य (१०३) । तत्करे चार्प्पणाय कार्पापणग्रहणम् (१०४) । पथ्यदनस्य चारना(?णा)त् (१०५) । उपस्थापयेदभ्यर्थि(?र्थी) सूर्यकान्तम् (१०६) । नैनमगुप्त[ः] स्थापयेत् (१०७) । नादत्तादायिनोऽर्प(?र्प)येत् (१०८) । फलमुत्पाद्य[ा]-

स्यासौ दद्यात् [७८९] । उदकार्थि(?र्थी) चन्द्रकान्तम् [७९०] । समानः पालन-विधिः [७९१] । अनन्तः कृतत्वमुपस्कारानुज्ञाने रत्नस्वीक[ा]रस्य [७९२] । न रीति(रि?)ताम्रकंसदारुपात्रं स्वीकुर्यात् [७९३] । स्वीकृतस्यास्यान्यस्य वा परिभोगश्चेद् भैषज्यशरावकपरिभोगेण [७९४] । द्वयमधिष्ठानिकमायसं मृन्म(?ण्म)यञ्च [७९५] । मणिमुक्त[ा]वैदूर्यशंखशिलाप्रवालरजतजातरूपअ[ा]स्म(?श्म)गर्भमुसारगल्लोहि-तिकादक्षिणावर्तप्रभृति रत्नम् [७९६] । न्यूनत्वमयाचिके [७९७] । अनन्तरेऽपि [७९८] । छिन्नभिन्नखण्डदग्धाग्रचरितपूर्वानाहतिलक्षणप्रतिरूपकमेतत् [७९९] ।

॥ [इति] जातरूपरजतने.सर्गिकः ॥ १८ ॥

(१९) रूपिक० ।

लाभेऽस्यो(?)रापत्तिः [८००] । गृही[तृ?]त्वेऽपरस्याज्ञातित्वे मौली [८०१] । उत्पत्तौ वृद्धेः [८०२] । अनन्तरे च [८०३] । पणेन रत्नेन वा व्यवहारात् [८०४] । एकत्वं प्रयोगे [८०५] । प्रयुञ्जीत रत्नार्थम् [८०६] । आरामिकोपासकयोः सत्त्वे नियोगेत [८०७] । बन्धकं द्विगुणमादाय साक्षिसम्वत्सरमासदिवससंघस्थविरो(?)वारिक ग्रहीतृधन-लाभानारोप्य पत्रे [८०८] । ज्ञातवानेतदि[ति] तस्मै प्रवेदयेत् [८०९] ।

॥ [इति] रूपिकव्यवहारनै.सर्गिकः ॥ १९ ॥

(२०) क्रयविक्रय० ।

अन्येन दद्यात् सांचिकं संघभक्त्योपक्रीणते धान्यं मूल्येन [८१०] । तस्यैव चेत् सविशेषम् [८११] । क्रीणीयात् क्षये संघः [८१२] । नवश्च [८१३] । पुराणं चिक्रीय निष्प्राणकं चेत् [८१४] । न मूल्यं कुर्यात् [८१५] । न गृहिव्यवहारेषु हस्तं प्रक्षिपेत् [८१६] । गृहिणा क्रायणम् [८१७] । असम्पत्तावात्रयाद्वा निश्चारणम् [८१८] । अकरणं परार्थेऽप्युत्सृज्य रत्नत्रयं पणापणोः [८१९] । न बन्धकं कुर्यात् [८२०] । संघेन तदर्थं संघकर्मिकेणोधि(?)स्य दानम् [८२१] । नापृष्ट्वा वृद्धां(?द्धान्) संघार्थमुद्यच्छेत् [८२२] । यत्राभिलिखितता सम्पत्तिमस्यानुतिष्ठेत् [८२३] ।

॥ [इति] क्रयविक्रयने.सर्गिक. ॥ २० ॥

(२१) पात्रधारण० ।

पात्रस्याधिष्ठितस्य [८२४] । निस्सृष्टत्वं प्रव्रज्यापेक्षार्थतायां नियमने [८२५] । अकल्पिकत्वं पाण्डुशुक्लाधिकानां न्यूनता श्यामस्य [८२६] । निर्दोषत्वं कुपात्र-कस्यैकस्य [८२७] ।

॥ [इति] पात्रधारणनै.सर्गिकः ॥ २१ ॥

(२२) पात्रपरिष्टि० ।

नाधि(?ति)लोभं कुर्वीत परिस्कारेऽत्यध्यावसानं न पात्रादस्तधा(?)न्येत् [८२८] ।

याचेत्(?त) पात्रमप्यभावे (७१) । सत्त्वेऽस्य (७२) । आचतुर्बन्धनं तदर्हो (७३) । क्षमस्य परिभोगे (७४) । परीष्टौ विज्ञप्त्या गृहितो ज्ञातेः (७५) । उत्तरत्राप्येतद् द्वये (७६) । चातृदात्रान्येषु (७७) । अदोषमज्ञाता च वृद्धिपात्रयोः ज्ञातेः (७८) । दुष्कृतं मौलम् (७९) । ततो निषधौ(?) (८०) । सम्मतावसत्त्वेऽपहासः (८१) । स्वपरिस्कारैः सत्त्वे चैषाम् (८२) । परिवर्त्त[ने] श्रेष्ठच्छन्देन (८३) । संघेऽस्य निःसर्गः (८४) । एकस्यानेकत्वेऽभिप्रेततमस्य (८५) । योज्यत्वमन्यस्य (८६) । इदं प्रव्राज्या(?)के (८७) । प्रत्यवस्थासौ दानम् (८८) । चारणेन निष्कर्षः (८९) । सम्मतेन (९०) । श्वोऽस्य करिष्यत्तायां तेनारोचनम् (९१) । संघे सामग्रिवेलायां श्वोऽहमायुस्म(?प्म)न्त उन्नतं पात्रं चारयिष्यामि युस्मा(?प्मा)भिः स्वकस्वकानि पात्राणि गृहीत्वा संघमध्येऽवतरितव्यमिति (९२) । सन्निसाधा(? पाता)र्थमनुष्ठानम् (९३) । रोचनोपसंक्रममुपनामनम् (९४) । स्थविर इदं पात्रं स्वच्छं परिमण्डलं परिभोगक्षमं स चेदाकांक्षसि गृहाणेति यथा गुणं रुच्या ग्रहणं अयाचनं गृहीतस्यान्तरितेन (९५) । अदानत्वयोर्वाचोर्णोत्तरस्यामत्याज्यतानाधिष्ठानिकद्वयोरापन्नस्य प्रवेदनम् (९६) । उपयोजनमस्याभेदान्मन्दमन्दम् (९७) । उभाभ्यामनेन संव्यवहरणम् (९८) । अत्र साधुतरस्य विनिर्युक्तिरुपकरस्य (९९) । लघुतरेऽस्य प्रमासे (१००) । नैव भोजनकरणत्वे (१०१) ।

॥ [इति] पात्रपरिष्टिनैःसर्गिकः ॥

(२३) वायन० ।

विना मूल्येन विज्ञप्त्यान्येनापि वायने (१०२) । न पात्यतायामतत्कृतत्वम् (१०३) ।

॥ [इति] वायननैःसर्गिकः ॥ २३ ॥

(२४) उप्यमानवर्द्धन० ।

ततो(? त) औद्देशिकत्वं पानीयस्य (१०४) । भूयस्तायां वा दुर्नियोगतः सौष्ठवे वा (१०५) । क्षयश्चेद्दातुः (१०६) । अदानं विनिश्चयस्य (१०७) । अनभ्यनुज्ञातै[:] तदर्थत्वं दात्रेति कर्तृणि (१०८) । मौलस्य सम्पत्तौ (१०९) । प्राग्पतित[त]दौद्देशिकानुष्ठानं दुष्कृतस्य (११०) । तत्त्वमप्रचारितस्योपसंक्रान्तेः (१११) ।

॥ [इति] उप्यमानवर्द्धननैःसर्गिकः ॥ २४ ॥

(२५) आच्छेद० ।

भिक्षुत्वं वियोज्यस्य (११२) । अस्वकृत्त्वमाच्छेद्यस्य (११३) । चीवरत्वं तस्य (११४) । समस्तयोर्व्यस्तयोर्वा कायवाचोराच्छेदार्थं प्रवृत्तिस्तस्य (११५) । तन्नियुक्तस्य चेति कर्तृणि (११६) । अन्त्यस्य समाप्तौ पृथग्भावस्य कायतः (११७) । प्रयोगे दुष्कृतस्य (११८) । प्रतिदेयत्वमस्य (११९) । अनङ्गमत्र स्वार्थत्वम् (१२०) ।

निष्कर्षवदनुपसम्पन्ने [८७०]। स्वतापना(?)यनभूतस्यात्रावरोध आच्छेद्यस्य [८७१]। असम्मतिकृतस्यानुच्छवित्वम् [८७२]। अनर्थाहितकृत् प्रवृत्तिविघ्ननार्थेनापत्तिः [८७३]।

॥ [इति] आच्छेदनैःसर्गिकः ॥ २५ ॥

(२६) पड्रात्र०।

स्वस्थानवत् समयतायामारण्यकस्यैकत्र चीवरे क्रमः [८७४]। विप्रवसेदतोऽसावन्तर्गृहगतादर्थवशेनापष्ठमह्नः [८७५]। अप्रसन्धिरूढम् [८७६]। अदोषोऽन्तरायवशेनागतौ [८७७]। अनङ्गमत्रातिवाह्यत्वे पड्रात्रस्य प्रक्रान्तौ संकल्पः [८७८]।

॥ [इति] पड्रात्रविप्रवासनैःसर्गिकः ॥ २६ ॥

(२७) वर्षाशाटी०।

स्वोपगमाहपूर्वमासादिप्रभृति वर्षाशाटीं(?टीं) परीच्छेत् [८७९]। आस्ववर्षोर्ध्वार्द्धमासान्तं धारयेत् [८८०]। पूर्वपरयोरतः कालयोः कर्तृत्वम् [८८१]। धारणे परस्य पूर्वस्य परीष्टौ दुष्कृतस्य [८८२]। अन्त्यस्य संपत्तौ [८८३]। न्यूनत्वं विलीने [८८४]। यथोपगति तदनुगम् [८८५]।

॥ [इति] वर्षाशाटीनैःसर्गिकः ॥ २७ ॥

(२८) आत्ययिक०।

वार्षिकलाभस्य कर्तृत्वम् [८८६]। अन्तर्वर्षे स्वीकृतौ [८८७]। उत्सृज्यान्त्येऽत्ययवशाद् दशाहे लभ्यमानस्य [८८८]। विभक्तौ चास्यापि [८८९]। अविभक्तौ च [८९०]। अन्तरेण दात्रुक्तिवशता [८९१]। अनन्तरे प्रवारणादिवशाद् द्वयसम्मततद्गोपकानाम् [८९२]। नैनं न सा(सं) मन्येरन् [८९३]।

॥ [इति] आत्ययिकनैःसर्गिकः ॥ २८ ॥

(२९) परिणामन०।

पुद्गलेऽन्यत्र संघे वा संकल्पितस्यान्येन चीवरस्य जानतात्मनि परिणामतो लब्धौ [८९४]†। परिणमने दुष्कृतम् [८९५]। अन्यत्र चात्र [८९६]। तत्फले च [८९७]। अन्यस्य च [८९८]। असत्त्वसंख्यातत्वे वियोज्ययोज्ययोः [८९९]। एकप्रदेशत्वे च [९००]। अनापत्तिरलाभे पर्येषविघसखादकतिर्यगादेः [९०१]। कल्पते या (?यद्)च्छया प्रतिनिध्यन्तरे सुगतस्य दानम् [९०२]। दुष्कृतं संकल्प्यादाने [९०३]। बहिः सीमां गत्वा सांघिकाधिष्ठाने [९०४]। व्यग्रैर्भाजने [९०५]। अनधिष्ठायाम् [९०६]। एकस्य द्वयोः त्रयाणां वा संघादा भवतो लाभस्यादाने [९०७]। अनया योत्रान्येषां मंशिकृतस्य [९०८]। हारत्वं स्तेयचित्तेन [९०९]। न सहसैव निरावासताकरणं विहारस्य [९१०]। सानुनयस्य तत्रावलोकं(?)दाने [९११]। अनुपनतौ दशवर्षाण्यतिनमनः [९१२]। पञ्चपिण्डपातेन [९१३]। अनुद्भूतावत्र काले दानपतेरपराणि सामन्त-

† अत्र दृष्टिभ्रमेणायं सङ्ख्याङ्कः ९०२ स्थाने ९०१ मुद्रणतां गतः। पाठकैः सशोध्य पठनीयम्।

कविहारेण सार्द्धम् [११] । हिदुक्पो(?)पधैकलाभतायाः करणं कर्मकरणा[त्] [१२] । सामन्तकविहारेषु प्रमीलने वस्तूनां निक्षेपः [१३] । आवासिते दानम् [१४] । न स्थानान्तरीयं द्रव्यं स्थानान्तरे दद्युः [१५] । दासत्वमेषामप्रतिलम्भने [१६] । दानत्वेऽपि गृहपतेर्नियतेरभङ्गः [१७] । बलाददाने ग्रहणम् [१८] । दद्युर्याचितकत्वेन [१९] । स्थानान्तरीयं द्रव्यं स्थानान्तरे [२०] । निर्दोषमसम्पत्तौ चैत्यान्तरे तल्लाभस्य परिणमनमुत्सृज्य बोधिधर्मचक्रमहाप्रातिहार्यदेवावतरणानामेभ्योऽन्यत्र [२१] ।

॥ [इति] परिणामननैःसर्गिकः ॥ २९ ॥

(३०) साप्ताहिक० ।

व्यतीतं दिवसमधिष्ठितस्य साप्ताहिकस्य भिक्षुं श्रा(?)येत् [२२] । मुक्त्यर्थं धारणे [२३] । अस्य [२४] । अष्टमारुणोद्गतौ [२५] । अत्यये ऽह्ने कल्पिकस्याभ्यवहार्यस्य भुक्तिवदित्यत्र व्यवस्था [२६] । यस्यात्रार्थे कल्पनं तं प्रत्यनापत्तिः कल्पितेनास्याभङ्गयोः सन्निहितम् [२७] ।

॥ [इति] साप्ताहिकनैःसर्गिकः ॥ ३० ॥

॥ समाप्तश्च नैस्सर्गिकः ॥

§ ४, प्रायश्चित्तिकम् ।

(१) मृषावादे० ।

संज्ञाय संघसन्निधावधर्मस्य धर्मतो धर्मस्य चाधर्मतः परिदीपनं स्थूलात्ययः [२८] । कश्चित् स्या [अ]त्र परिशुद्धा इत्यातृतीयपरिग्रहा(श्रा)त् पोषधे शुद्धसंज्ञस्य तूष्णीम्भावेनातिनामनाया दुष्कृतम् [२९] । आभ्यां पाराजिक-संघावशेषाभ्यां चान्यस्मिन् मृषावादे [३०] । भापमान्(?ण)त्वेऽपि संज्ञालाभेऽस्योत्थानम् [३१] । न शपथं कुर्वीत [३२] ।

॥ [इति] मृषावादप्रायश्चित्तिकम् ॥ १ ॥

(२) पैशुन्य० ।

भिक्षोः [३३] । अनन्तरे च [३४] । ऊनतोद्भावनच्छन्देन [३५] । श्लक्ष्णेन परुषेण वा [३६] । यस्य कस्यचिदच(वा?)राभिमतस्योक्तौ [३७] । अजातेऽपि मङ्गुत्वे [३८] । अन्यस्य क्षत्रियताब्राह्मण्यादेः दुष्कृतम् [३९] । अनुवादः [४०] । पैशुन्यच्छन्देनामुकोक्तमित्युक्तौ [४१] । नाम्ना चेत् [४२] । भिक्षुता चास्य दुष्कृतमन्यथा [४३] ।

॥ [इति] पैशुन्यम् ॥ २ ॥

(३) खोटने० ।

न हित(?)वायां सम्यक् संघेन [४४] । भिक्षोश्चाधिकरणतायां खोटने [४५] ।

नैवासिककर्मकृच्छन्ददायकानामेव मौलस्य [१५५] । दुष्कृतस्यैव दृष्टाविष्कर्तागन्तुकयोः [१५६] । तद्वत्त्वमधिकरणान्तरत्वेनाधिकरणस्य संज्ञाने [१५७] । अर्द्धत्वं कर्मफलगतस्यातत्त्वेन समुदाचारे [१५८] ।

॥ [इति] स्फोटनम् ॥ ३ ॥

(४) देशना० ।

देशनायाम् [१५९] । धर्मस्य [१६०] । पष्ठात् पदादूर्ध्वम् [१६१] । जानत ऊर्ध(?र्ध्व)तायाम् [१६२] । पञ्चमात् पञ्चपदिकोपक्रमे [१६३] । न पण्डितकृतोत्तरोत्तरपरिप्रण्(?श्न)निर्न(?र्ण)ये परिवर्तनिकास्वाध्यायनिकापरिपृच्छनिकोपवासदानदक्षिणादेशनेषु [१६४] । अकृतत्वं स्थानान्तरे पूर्वस्याः [१६५] ।

॥ [इति] देशना ॥ ४ ॥

(५) वाचना० ।

सममनुपसम्पन्नेन हीनं वा नेत्रीभूतस्योच्चारणे धर्मस्याक्षरस्यापि [१६६] । उत्सृज्याकामसम्पत्तिम् [१६७] । अनुशास्य पाठनम् [१६८] । स्वाध्यायनिकां परिवर्तनिकां परिपृच्छनिकां च [१६९] ।

॥ [इति] वाचना ॥ ५ ॥

(६) कुलदूषणम्० ।

संमन्येरन् पापयोर्भिक्षुभिक्षुण्योः कुलप्रतिसंवेदकम् [१७०] । शृण्वन्त्वायुष्मन्तो (?न्तः) कुलेषु कुलदूषका आश्रमेष्वाश्रमदूषकास्तद्यथा सम्पन्ने शालिक्षेत्रेऽशनिर्विचका निपतेद् यावदेव तस्यैव शालेरुत्सादाय विनाशायानयेन व्यसनाय संपन्ने वा इक्षुक्षेत्रे मञ्जिष्ठिका नाम रोगजातिर्निय(?प)ते[द्] यावदेव तस्यैवेक्षोरुत्सादाय विनाशायानयेन व्यसनाय मा यूयमायुष्मन्तोऽनेन भिक्षुना(?णा)नया भिक्षुण्या शासनं प्रमिणुत एष भिक्षुरेषा च भिक्षुणी दग्धेव धाना अप्ररोहणधर्मा अस्मिन् धर्मविनये भगवन्तं पश्यत स्थविरस्थविरांश्च भिक्षून् भि(?इ)ति कुलेषु कुलप्रतिसंवेदको ब्रूयात् [१७१] । अनुत्सहमाने ज्ञप्तिं कुर्युः [१७२] ।

॥ [इति] कुलदूषणम् ॥ ६ ॥

(७) दुष्कृतारोचने० ।

अप्रतिसंविहितानुपसंपन्नत्वयोः श्रोतुः [१७३] । आख्यातो(?तौ) पाराजिकसंघावशेषयोः [१७४] । अकृतसम्मतेः [१७५] । अज्ञप्ते संघे [१७६] ।

॥ [इति] दुष्कृतारोचनं ॥ ७ ॥

(८) उत्तरमनुष्यधर्मारोचने० ।

सत्यतायाम् [१७७] । अदृष्टमत्येऽनुपसम्पदि [१७८] । नागारिकपुरस्ताद् ऋद्धिं विदर्शयेद् [१७९] । न भिक्षुणी शास्तुः [१८०] ।

॥ [इति] उत्तरमनुष्यधर्मारोचनम् ॥ ८ ॥

(९) अवबादे० ।

स्वयेण चेदर्थो ज्ञप्तिपूर्वकमर्थं कुर्युः [१८] । दत्तमहस्य [१९] । पुद्गलभिक्षुसंघाभक्तलाभस्य मिथ्यापरिणामकत्वेन भिक्षोरन्यत्राप्यनाज्ञा चोक्तौ [२०] । अभूतार्थतायाम् [२१] ।

॥ [इति] अवबादप्रायश्चित्तिकम् ॥ ९ ॥

(१०) वितण्डना० ।

विनयप्रतिसंयुक्तभाषमाना(?)वध्यानभूतायामुक्तौ [२२] । सूत्रान्तस्य दुष्कृतम् [२३] ।

॥ [इति] वितण्डना ॥ १० ॥

(११) अनुपरतावच्छेदने० ।

छेदयेन्नवकर्मिको वृक्षं स्तूपसंघार्थम् [२४] । प्राक् ततः सप्ताष्टेषु दिवसेष्वतस्तस्य मण्डलकगन्धपुष्पदीपधूपबलिदानत्रिदण्डकं भाषणदक्षिणदेशनां कृत्वा या देवताऽस्मिन् वृक्षेऽध्युषिता साऽन्यद् भवनं समन्वेषत्वनेन वृक्षेण स्तूपस्य संघस्येतिकरणीयं भविष्यतीत्युक्ता जानीहि वादेन [२५] । विकारश्चेदग्निमोक्षरुधिरस्यन्दनशाखाकम्पनपत्रशटनादिरुद्दृ(?दि)श्येत पक्षेऽत्र दानमात्सर्ययोः संवर्णनविवर्णनं कुर्यात् [२६] ।

॥ [इति] अनुपरतावच्छेदनम् ॥ ११ ॥

(१२) बीजप्ररोहनाशने० ।

अविनष्टतायाम् [२७] । अकृतकल्पबीजप्रोद्भेदयोः [२८] । ओशीरकादौ विनाशने [२९] । यथाकथञ्चित् [३०] । धूननेनापि [३१] । अवष्टम्भेनापि तृणशादपांसुप्रभृतिभिः [३२] । उत्सर्गादिनापि [३३] । वातातपेऽपि स्थापनेन [३४] । शुष्केऽपि स्थण्डिले [३५] । तच्छन्देन स्वयमन्येन वा [३६] । विनष्टो मूलीनां विनष्टापरिमाणानाम् [३७] । गण्डतः [३८]† । दुष्कृतानां प्रयोगे [३९] । प्रतिप्रहारमस्यात्र भेदो न वस्तुतः [४०] । अन्तत्वं विरो(?रू)ढत्वेऽपि निर्मुक्तेः [४१] । तत्रमुद्या(?द्वा)रे जलाच्छेवालकटभयोः [४२] । अधःसंपुटितास्थिनिगिलनं कारस्य [४३] । साधु स्याद्यद्यं छिद्येतेत्युक्तेर्नियुक्तिः [४४] । अकारत्वमृद्धेः [४५] । तद्वत्त्वं बीजान्तरत्वेन बीजस्य संज्ञाने [४६] । त्वक्फल्गुपाण्डुपत्रपुष्पितपुष्पपक्वफलानामर्द्धमृततया व्यवहारः [४७] । नानपेतस्यैषां प्रकृतेर्मूलभूतस्य [४८] । अर्द्धजाततयोप्तस्यासंजातमूलस्य बीजधान[योः] [४९] । क्षुप्यपर्यच्छन्नककाचिकागालचीवरादिपुष्पाणामर्द्धप्रोद्भूतत्वेन [५०] । तप्तपूपादिकोरणचंक्रमणशाखाद्याकर्षणमण्डलकामा ज्ञानतदभिप्रायतायामनापत्तिः [५१] । छेदने च कुशादेरापद्यवधेन तेनासम्भवे मोक्षः [५२] । अतश्चैकेनानेकत्वे [५३] । नाबीजधर्मणो

† अत्रापि दृष्टिभेदेनायं संख्याङ्को द्विरुक्तत्वं प्राप्तः ।

दो[प ?]कृत्वम् [९७] । संस्पर्शोऽग्निना क्षतिः शस्त्रनखशूखैर्म्लान्युत्पाटन उत्(?द्)दल-नभिदुच्छित्तिरिति कल्पाः [९८] । नाबीजत्वगते कल्पनेऽपेक्षत्वम् [९९] । नानग्नित्व-मत्र वाष्पस्य [१००] । सम्यक्त्वसंख्यामग्निना कल्पने फलानां कल्पने समुदाय-रूपस्य तन्त्रीकरणम् [१०१] । नैकतः प्रदेशात् समुदायस्य सम्भावनोत्थानम् [१०२] । कृतत्वं कल्पानां भिक्षुकृत्यता [१०३] । भूमौ(?मौ) चाकल्पिकायाम् [१०४] । नान-भुक्षितं शीतेन वारिणा साप्ताहिकं यावज्जीवकमभ्यवहरेत् [१०५] । नाभिन्न-मेतेन यामिकम् [१०६] ।

॥ [इति] बीजप्ररोहनाशनम् ॥ १२ ॥

(१३) क्षेपणे ।

द्वादशानां पुद्गलानां कर्तृत्वम् [१०७] । असम्मतानामपि [१०८] । प्रतिस्रब्ध-प्रयोगानां च [१०९] । अवध्याने वा स्वगतेनार्थेन सश्रुतं क्षेपे वा परव्यपदे-शेन [११०] । मौलस्य गणिते [१११] । अन्यत्र दुष्कृतस्य [११२] । नासमर्थमल्पस्या-प्यधिवासनायामीरयेत् [११३] । न स्वयमेनं द्वेष्यः कर्मणि युञ्जीत [११४] ।

॥ [इति] क्षेपणम् ॥ १३ ॥

(१४) आज्ञाविहेठने ।

न न गणयेयुश्चोदनगताज्ञा तूष्णींभावविहेठकोक्तपुद्गलसमु(म्मु)खावधायक-परव्यपदेशक्षेपकान् [११५] । ज्ञापनेन [११६] । भिक्ष्वाज्ञाविहेठने [११७] । तच्छ-न्देन [११८] । अन्योक्त्या दुष्कृतं तूष्णीम्भावेन [११९] । न स्मरामीति च [१२०] । न चेद् दुःखमाख्येयम् [१२१] । तस्माद् वध्यदर्शनपरिप्रश्ने वितप तावत् पानीयं तावत् पिब विश्राम्य तावन्न पश्यामि न खं वा परमार्थतः सत्त्वं न पश्यामि वध्यश्चेत्युक्तावनापत्तिः [१२२] । न यत्र साक्षित्वेन करणमापतेत् तत्रावस्थानं भजेत [१२३] । नाकृतोवघातद्वारबन्धः साक्षेपं दद्यात् [१२४] ।

॥ [इति] आज्ञाविहेठनम् ॥ १४ ॥

(१५) शयनासने ।

मञ्चपीठवृशिकोचकविम्बोपधानचतुरस्रकमिति शय्यासनम् [१२५] । एकान्न (?कोन)पञ्चाशद् व्यामास्तदुपविचारः [१२६] । द्वारकोष्ठकात् परिवृते [१२७] । तदतिक्रमाय विस्मृत्यापि प्रस्थानमन्तश्च स्वप्नसमापत्त्यादिना विपरोक्षीभावः [१२८] । प्राक् संभेदात् प्रयोगः [१२९] । संभेदेऽतिक्रमश्च निष्ठानम् [१३०] । नैते कृतकारितो (?णो)द्वारस्य [१३१] । नावलोकितभिक्षौ न संकटप्राप्तस्य [१३२] । कारकवद् भोगः [१३३] । द्वयोरेकत्र निषादे पथादुत्थायिनः करणीयवत्ता [१३४] । समं चेन्नवकस्य [१३५] । तुल्यतायामुभयोः [१३६] । अलजिमान्तरजीर्णग्लानानुपसंपन्नानामनवलोक्यत्व-

मत्र (५७)। एष विहारः पश्य चेदं शयनासनं गृहाण चापावरणीदानमित्यवलोकनानि (५८)। संभेदात्त्रयो वातेन परिवर्त्तनं वृष्ट्या पुटान्तरप्राप्ति[:] दीपिकाभिश्च (५९)। शयनासनत्वं सांविकता तस्य स्वयंनियुक्तकृततोपनिक्षेपस्याभ्यवकाश इति कर्तृणि (६०)। मौलस्य निष्ठाने (६१)। प्रयोगे दुष्कृतस्य (६२)। एतत् तावत्कालमन्तरमन्येनाधिष्ठिते (६३)। पादगलिके च (६४)। उत्तरत्र च चतुष्के (६५)। नैवास्पृश्यतायाम् (६६)। पिण्डाय चेत् प्रविष(भ?)ज्याग्रविष्टे वातवर्षमागच्छेद् विहारस्थाः प्रवेशयेयुः (६७)। आहृत्य प्रविष्टं आगच्छेत् (६८)। नैतदर्थतायामदोषो हासो वा (६९)। विस्मृत्य चेद् बहुसमतिक्रान्ताध्वनो गतो वा स्मृतिं लभेत न भूय एवं करिष्यामीति चित्तमुत्पादयेद् वाचं च भाषेत (७०)। प्रतिपथितश्चेद् भिक्षुमारागये(?)दुधारायैनं प्रार्थयेत् (७१)। कर्तृत्वं प्राप्ततायामत्र येन प्रतिज्ञातं प्रक्रमिपन्नावसादसंकटप्राप्तोऽभिसंक्षिपेत् शयनासनम् (७२)। प्रस्फोट्य मलिनश्चेत् (७३)। अर्पयेतैनम् (७४)। अवलोकनमन्य एव कुर्वीत भिक्षोः (७५)। अभावे श्रामणेरस्य (७६)। तस्यापि गृहपतेः (७७)। सर्वाभावे चतुर्दिशं व्यवलोक्यापावरणीं गोपयित्वा प्रक्रामेत (७८)। अन्तरमार्गे चेद् भिक्षुं पश्येत् तं प्रदेशमसौ ब्रूयात् (७९)। द्वारे चेदन्तर्गृहोपनिमन्त्रणायां वध(?बन्धः) आगच्छेत् कुड्यस्य मूले वृक्षस्य वा निधायाध्वनि प्रविशेत् (८०)। दद्युस्तत्रासनानि (८१)। न स्वयमानयेयुः (८२)। आगारिकः श्रामणेराणामेतत् (८३)। अभावे चावलोक्य गृहिणमानयनार्थमागमनम् (८४)। स्थापयेयुः गच्छन्(तः) वयमानेष्याम इति ब्रुवत्सु (८५)। नि[:]श्रयकरणीयैस्तैरनानीतावानयने (८६)। अभावे स्वयम् (८७)। सर्वतायां गण्डिमाकोट्य (८८)। दद्युर्विहारे (८९)। निमन्त्रणकरेभ्यः स्वार्थं याञ्च[ा]यामासनानि (९०)। भिक्षुश्चे(?श्चै)पामारक्षायै स्थापयेयुः (९१)। एकान्तेऽसौ तिष्ठेत् स्वकर्म कुर्वन्नवधानदानश्च (९२)। प्रक्रान्तेषु प्रवेशनम् (९३)। शोचनं नाशितानां वकसेनाद्भिः (९४)। स्नेहिनोपस्नानेन (९५)। अशुचिमा मृदोपाङ्केन गोमयेन वा (९६)। छिन्नितस्तुद्धं वातस्य (९७)। गृहिणा निपाद्य प्रवेशितस्य दृष्टः प्रवेश्यत्वम् (९८)। जीर्णश्चेद् ग्लानो वोपधिवारिकस्य (९९)। आख्येयत्वं तस्य (१००)। ग्लानमवलोकयेत् सर्वः (१)। निषद्य (२)। न तत्रासनं गृहीत्वा गच्छेत् (३)। उपस्थापको ग्लानस्य तत्रासनान्युपस्थापयेत् (४)। कुशलपक्षापगच्छत्याचार्योपाध्याये न चेदन्यथा वृद्धिः कुशलपक्षस्य पृष्ठतो गच्छेत् (५)। स्वयमस्यासनं नयेत् (६)। नापृष्ट्वा गतिम् (७)। स्वयमेव चैतदानयेत् (८)। अभ्यवकाशधर्मश्रवणे वातवर्षप्रवेशनं शयनासनस्य (९)। स्वयमशक्तो गुरुतया वृद्धानां नवकैः सह परिवृत्तिः (१०)। पाकेन सार्द्धं स्थापयेयुः (११)। दद्युर्विहारान्तरे याच्यमानं शयनासनं वस्त्रश्च (१२)। न चेद् वृष्टिर्वर्षाशङ्किता वा (१३)।

वातवर्षश्चेदन्तर्मार्गे स्याद् वृक्षस्य मूले कुड्यस्य वा स्थलं कुर्युः [१०]। प्रच्छादयेयुश्च वस्त्रेणैकेन प्रत्यवरेण [१०]। विहारं नीत्वा वस्त्राणां शोषणम् [१०]। दग्धावुद्धौ च सांघिकस्यापि निष्कासनम् [११०]। वृत्ते स्वपात्रचीवरनिष्कासने [११]। निष्कासितस्य भिक्षुमारक्षायै स्थापयेयुरसमर्थतरम् [११]। नासाह्यतायां प्रविशेयुः [११]।

॥ [इति] शयनासनप्रायश्चित्तिकम् ॥ १५ ॥

(१६) संस्तरे।

कृतं संस्तरमन्तर्गृहे छोरयेयुरवलोक्य गृहपतिम् [११]। अरणे विकोपयेयुर्वा [११]। कृतत्वमस्य शिरोन्ते पादान्ते वा कृतत्वे [११]। चीवरशोषना(?णा)यापि तृणप्रज्ञप्तेश्छोर्यताम् [११]। दानं मृगयते प्रतिज्ञातच्छोरणाय [११]। प्रज्ञापयेयुर्चं(श्वं?)क्रमेषु घृष्टोतलयोस्तृणानि [११]। तेषामपि छोर्यताम् [११०]। उत्सर्गे छोर्यस्य छोरणमगतस्याकरणीयताम् [११]। अन्यदा कालेन कालं प्रत्यवेक्षणं परिवर्तनञ्च [११]। स्निग्धमधुरमृत्तिक[म?]न्वहम् [११]। अनुपक्षमन्यत्र [११]। अवबध्य रज्ज्वा वृक्षेऽवलम्ब्य चंक्रमेषु कक्षपिण्डकानां स्थापनम् [११]। कर्परे गोमयं स्थापयेत् [११]। प्राग् गतं प्राक् प्रक्रमिष्यन्त्यस्मात् तुल्यत्वं साह्योपभोगे [११]। तत्पतीनाञ्चासांघिकेऽवलोक्यत्वम् [११]। सांघिकविहारत्वमगडवालुकालि(सि?)कताद्यात्मकत्वं तत्र शूचा(?)दिनवयोग्यत्वं भूमे[:] स्वयंनियुक्तकृतसंस्तरस्योतकर्तृणि [११]।

॥ [इति] संस्तरप्रायश्चित्तिकम् ॥ १६ ॥

(१७) विहारे।

भिक्षुत्वसांघिकविहारत(त्व?)योः कर्तृत्वम् [११०]। न चेत् तत्संबाधसंघसंक्षोभजन्मानुपशमप्रतिचिकि(की?)र्षणे [११]। परेणापि परानुवृत्त्या च [११]। शिक्षमाणश्रामणेरश्रामणेरिकाणां दुष्कृतस्य [११]। आसां च [११]। हास्येन च [११] गृहिणामपुण्यस्य बहुनः [११]। निष्कर्षणम् [११]। वृत्। आरूढतायाम् [११]। भिक्षुणा सांघिकविहारस्थानस्य [११]। अनुप्रस्कन्द्य मुक्त्वा ग्लान्यभयवशतामारूढौ [११०]। निदर्शनमेतद् विहेठनच्छन्देन भिक्षोर्विहेठनानाम् [११]। अनुप्रस्कन्द्यापातः [११]। सांघिकविहारोपरिष्टतलकत्वं कर्तृ [११]। न चेत् परिणामिकत्वं फलकतद्विधच्छदनता वा [११]। कीलपादकत्वं चाक्रमणीयस्य [११]। मुक्तोत्तानताम् [११]। दत्तप्रतिपादकत्वञ्च [११]। आक्रान्तौ [११]। वृता। आहार्यपादकारोहः [११]। स्वपरिभोगार्थं ततोऽन्यत्र [११०]। सप्राणकोपभोगः [११]। द्वारकोश(ष्ठ?)दानं संपादयेत् [११]। अर्गडकानाञ्च [११]। वातायनानां मोक्षम् [११]। विहारस्य कर्तृत्वम् [११]। चतुष्पयसेर्पापथानां मात्रस्य [११]। न चेत् सर्वत्वेन शैलः पक्वशैलो दारुमयो वा [११]। छादनञ्चोदकत्राणेन [११]। कृतं पश्यामि निश्चितं चेत्यनुक्तस्य दान-

पतिना [६] । त्रयादूर्ध्वमिष्टकापर्यायदानसंपादने [७] । परेणापि [८] । तद्दिने [९] । 'अन्यत्रापि निष्कर्दमात् [१०] । अमुक्तत्वे चोदकभ्रमाणाम् [११] । अदत्तत्वे चाखातमूलपादस्य [१२] । औपरिष्टस्य वा द्वारकोश(ष्ठ ?)स्य [१३] । निर्दोषमाद्यात् पूर्वः [१४] ।

॥ [इति] विहारप्रायश्चित्तिकम् ॥ कृत ॥ १७ ॥

(१८) असम्मतावबादे ।

अपराजितं सूत्रविनयमातृकाधरमनूनविंशतिवर्षं नागरलपितमुपनामितकायत्वे भिक्षुण्याः कृतप्रतिक्रियां भिक्षुण्यवबादकं संमन्येरन् [१५] । पोषधे पञ्चदशा[ना]मन्त[:]सीम्नि [१६] । अभावे सूत्रादिधरस्य प्रवृत्तप्रातिमोक्षम् [१७] । तस्यापि पाराजयिकसंप्रकाशनम् [१८] । गुरुधर्माणां वा [१९] । पश्चिमकः कश्चिद् वो भगिन्यः [२०] । समग्रो भिक्षुणीसंघः परिशुद्धसमवेतोऽनवद्यो मा वः कश्चिदसंमतः संघेन पुद्गलोऽवबदते संघाद्ध आगच्छति पुद्गलोऽवबादको न वः कश्चिदुत्सहते भिक्षुरवबदितुं संघाद् वोऽवबादानुशासनी अप्रमादेन भगिन्यः सम्पादयेतेत्यस्य [२१] । मुक्त्वोत्तरधर्मप्रभावबन्तम् [२२] । एकेनापि विनातस्स(नाऽस?)म्मतस्य च भिक्षुण्यवबादेन पूर्वं सम्मतस्यासम्मतत्वम् [२३] । निर्दोषमपूरो(?) संघस्यार्हस्य याञ्चायाम् [२४] । तस्याश्च [२५] ।

॥ [इति] असम्मतावबादः ॥ कृत ॥ १८ ॥

(१९) अस्तमितावबादे ।

अस्तमितायाम् [२६] । मुक्त्वा सर्वरात्रिकं धर्मश्रवणं भिक्षुण्यवबादे [२७] । न चेदपावृतद्वारस्तदा तद्भूतस्याग्रतो विहारस्य वर्षकः [२८] ।

॥ [इति] अस्तमितावबादः ॥ १९ ॥

(२०) आमिषकिञ्चित्कावबादे ।

कुर्याद् वैशारद्याय धर्मपरिपृच्छायां भिक्षु[:] भिक्षुण्यामिषोपसंहारम् [२९] । अष्कुञ्चकपरट्टिकिलोठकमुरुचिकानाञ्च [३०] । गृहीतादौ भिक्षुः [३१] । भिक्षोरतथाभूतस्यामिषकिञ्चित्कहेतोर्भिक्षुणीरवबदतीति विवादे [३२] ।

॥ [इति] आमिषकिञ्चित्कावबादः ॥ २० ॥

(२१) चीवरकरणम् ।

अज्ञातिकतायां भिक्षुण्याः [३३] । स्युतौ चीवरस्य [३४] ।

॥ [इति] चीवरकरणम् ॥ कृत ॥ २१ ॥

(२२) चीवरप्रदाने ।

दत्तौ [३५] । अपटकप्रदाने [३६] । न चेत् मुषितायै सौभापणिकस्योपसंपद्यमानायै परिवर्त्तकेन वा [३७] ।

॥ [इति] चीवरप्रदानम् ॥ २२ ॥

(२३) भिक्षुणीकजलयानोढौ ।

[स]भिक्षुणीकजलयानोढौ वाहयेयुः पाथेयम् [१] । कल्पकारकल्पकारी-श्रामणेरश्रामणेरिभिः [२] । न्याय्यमितरेतरपाथेयग्रहणं भिक्षु-भिक्षुणीनाम् [३] । अन्योऽन्यप्रतिग्राहणश्च [४] । न ग्लानम् [५] । सब्रह्मचारिणोऽध्वनि छोरयेयुः [६] । वहेयुरेनम् [७] । एवं भिक्षुण्यः [८] । कुर्युरत्र परस्परं साहाय्यम् [९] । शिरोन्तग्रहणेन [१०-११] । ग्रामप्राप्तानामदोषं प्रक्रमणम् [१२] । समुदानीय ग्लानभैषज्यपिण्डपातश्च [१३] । एकं च सरूपमुपस्थायकं स्थापयित्वा [१४] । मुक्त्वौ(?मुक्तौ) सभयतायां मार्गस्यैकसार्थपालमभिन्नप्रयाणतायामेकभिक्षुण्यापि सङ्घातिवाहने [१५] । प्रतिक्रोशम् [१६] । प्रतितदर्द्ध (दुर्द्ध ?) दुष्कृतम् [१७] । सभिक्षुणीकाध्वोरूढि (?) [१८] । सान्तरायतायामुभयकूलस्योच्छृज्या (त्या ?)सन्निधौ युगपदेकनावा तिर्यक्पारसंतरणादन्यत्र [१९] । वङ्कवटवर्त्तपरिहृतिकर्णयष्टिदण्डवंशावभङ्गकर्णधारवशाच्च तदर्थारूढौ प्रस्थानान्तरात् [२०] ।

॥ [इति] भिक्षुणीकजलयानौढिः ॥ २३ ॥

(२४) एकस्थाने ।

स्वयेकाकितारहस्त्वमप्रवृत्तजनप्रचारतया प्रदेशस्य [२१-२२] । साधारणत्वमन्तर्व्यामता वेति कर्तृणि [२३] । निषदने [२४] । आनिषादप्रतिष्ठापनमेतत् [२५] । एकनिषद्या [२६] । भिक्षुण्यास्थाने [२७] ।

॥ [इति] एकस्थानम् ॥ इति ॥ २४ ॥

(२५) पाचितोपभोगे ।

भिक्षुणीपरिपाचितायाम् [२८] । अभूतैर्गुणैः [२९] । अकृतनिमन्त्रणके [३०] । कृते चातिरिक्तस्य [३१] । अभ्यवहार्यस्य [३२-३३] । प्रतिपत्तिसंपत्त्या [३४] । तच्छृतेन वा [३५] । अभ्यवहारे कण्ठेन तदेपः [३६] । ह्रासकृत्वं परार्थस्य [३७] । देहि चोक्ते पिण्डाय प्रविष्टे [३८] ।

॥ [इति] पाचितोपभोगः ॥ २५ ॥

(२६) परंपराभोजने ।

अधिवासयेद् भक्तोपनिमन्त्रणमन्तर्गृहेऽपि [३९] । कालं ज्ञात्वा प्रविशेयुः न सात्र (यं ?) कालम् [४०] । गण्डीं दत्त्वा [४१] । स्वपर्षदं तत्रावलोकयेत् [४२] । आगन्तुकं स्थविरः [४३-४४] । न सहस (सा?) भक्तच्छेदं कुर्यात् [४५] । तिष्ठेयुर्याचमानाः पानकाय [४६] । समं पश्चाद् यानुपेतचीवरलाभद्वितीयनिमन्त्रणलब्धिः [४७] । भोजनीयेन [४८] । अन्तर्गतेन पञ्चके [४९] । अनेनैव चेदन्यत् [५०] । अग्लानस्याकृतकर्मणोऽनूढस्याध्वनि [५१] । अधिवासनायां दुष्कृतस्य [५२] । अभ्यवहारे मौलस्य [५३] । समसामन्तकात् पर्यन्तभूतं चीवरम् [५४-५५] । अध्यार्द्धयो-

जनम् [५१] । अन्यत्रापि [५२] । अत्र वा नौगमने वा [५३] । संमार्जनं किलिञ्च-मात्रस्योपलेपो गोपिटकमात्रस्येति कर्म [५४] । सांघिकता स्तौपिकत्वे चास्य [५५] । अशक्तिर्ग्लान्यस्य परिमाणम् [५६] । अनियन्त्रणकत्वं प्रज्ञप्तेः [५७] । संदर्शनस्य च [५८] । असत्त्वं विहेठनकृतस्य [५९] । सांघिकस्य चाह (?) दौद्देशिकस्य निक्षेपे चान्यत्र पञ्चके [६०] । धर्मत्वमस्य [६१] । ग्रहणेऽप्यन्यस्य स्वीकरणं दुःभिक्षो यावत् संपत्तिनिमन्त्रणकानाम् [६२] । भुक्तिश्च [६३] । दानं वा [६४] । अनभिरुचि-संभावने दातुर्द्वित्रिग्रासाभ्यवहारादूर्ध्वं गृहपते[ऽ]यं भिक्षुः पिण्डकेन विहन्यते नुमोदस्वास्मै ददामीत्यभिरोच्य [६५] ।

॥ [इति] परंपर[ा]भोजनम् ॥ २६ ॥

(२७) आवसथपरिभोगे ।

अनेदंधर्मकः सगृहिस्वामिको(कः ?) सर्वपाषण्डिक आवसथः [६६] । अग्ला-नस्याप्रवारितस्य दानपतिना [६७] । भुक्तवतस्तदीयमभ्यवहारं मौलस्य [६८] । उषितवतो वासे दुष्कृतस्य [६९] । अस्वामिकश्च [७०] । तीर्थ्यवत्त्वमत्रैदं प्रव्र-ज्य(व्राज)स्य [७१] । ज्ञातेश्च [७२] ।

॥ [इति] आवसथपरिभोगः ॥ २७ ॥

(२८) अतिरिक्तग्रहणे ।

प्रवारयतः [७३] । अपरिमितम् [७४] । अकृतयथासुखस्य [७५] । गृहिणः [७६] । अर्धपञ्चमानां पक्वतण्डुलमागधकप्रस्थपरिमाणानां प्रस्थानामुत्सृज्य व्यञ्जन-मूर्ध्वं सहापि सहायप्रत्यंशेन पिण्डपातः [७७] । अभ्यवहृतावुत्कृष्ट[ः] [७८] । अत्र दुष्कृतस्य [७९] । परकृते च [८०] । अन्यथानापत्तिः [८१] । असंष्कृ(स्कृ?)तस्य च [८२] । ग्राह्यात् प्रभूतं चेद् भिक्षुं संविभजेत [८३] ।

॥ [इति] द्विपात्रपूर्णातिरिक्तग्रहणम् ॥ २८ ॥

(२९) निरिक्तकरणे ।

भुञ्जीत यावदाप्तम् [८४] । नोत्तिष्ठेद् विप्रकृतामिषः [८५] । याव[त्]स्तावतो यस्य कस्यचिदालवणमभ्यवहार्यस्यादाने तद्विधत्वम् [८६] । स्थानोत्सर्गः प्रवा-रणम् [८७] । निपण्णस्य [८८] । विप्रकृतमूलखादनीयाद्यामिषस्य [८९] । मूलगण्डपत्र-पुष्पफलखादनीयेभ्योऽन्यपै(पि?)याच्च कल्पिकमसंसृष्टमकल्पिकेनाभ्यवहार्यमभि-संभावनीयप्रदेशस्य प्रतिग्राहयतो निवाणं(?) कृत्वा [९०] । देहीत्यस्यैतत् [९१] । गच्छेत्यपि [९२] । भुक्तमिति च [९३] । न च तावत् शब्दोपसन्धाने [९४] । पर्याप्तमित्यपि [९५] । स्थानस्य कलाचिकया ऊर्ध्वमसंपादकत्वे यवाग्वाः पेयत्वम् [९६] । तर्पणस्याप्रज्ञायमानपञ्चाङ्गुलस्य [९७] । अप्रतिग्राहणत्वं विहेठ-नस्य [९८] । न बहिःसीमानभिसंभावनीयप्रदेशानग्रतस्ये निरिक्तकरण-

स्रोत्थानम् [१५] । नापाणिस्थं करणीये [१५०] । अकरणीयत्वमकल्पिकस्य संसृष्टस्य वा तेन [१] । अनुत्सृष्टस्य स्थानस्य कर्तृत्वम् [२] । कृतव्रतोऽपि संकल्पमभोजने [३] । याचितस्य [४] । गच्छ तवैव भवत्विति वचनं करणम् [५] । यथासुखं परिभुंक्ष्वेत्येके [६] । द्विस्रानभ्यवहृत्यालोपम् [७] । न निर्वृतक्रियः परिभुञ्जीत [८] । भुञ्जीतान्यस्य कृतनिरिक्तम् [९] ।

[इति निरिक्तकरणम्] ॥ वृत् ॥ २९ ॥

(३०) एकासनभोजने ।

प्रवारितत्वाकृतनिरिक्तत्वयोः [१५०] । अभ्यवहृतौ [११] । आमिषमात्रस्य [१२] ।

॥ [इति] एकासनभोजनम् ॥ वृत् ॥ ३० ॥

(३१) प्रवारितनियोगे ।

नियोगे[ऽ]स्य भिक्षोः [१३] ।

॥ [इति] प्रवारितनियोगः ॥ वृत् ॥ ३१ ॥

(३२) गणभोजने ।

प्रतिनियतभक्तावासकेभ्योरन्यैरन्तःसीमस्थैर्भिक्षुभिः संघभूतैरसहभक्तता-याम् [१४] । सहितस्य [१५] । सहभोक्तृतया [१६] । त्रयादिना [१७] । भिक्षूणां यद्वि-धस्याचीवरद्वितीयभक्तलब्धेरनूहस्य च नावा [१८] । महासमाजादन्यत्र [१९] । अन्यास्यानिर्दं लिङ्गप्रव्रजितभक्तात् [१५०] । अभ्यवहारे स्थिततत्रागन्तव्यतानाम-न्तःसीमास्थानामपि पृच्छागतत्वम् [११] । भुक्तिरर्द्धातिक्रमः [१२] । संचारणे स्तोक-स्यापि [१३] । यस्य कस्यचिदेकभक्तत्वम् [१४] । न गमिकागन्तुकग्लानतदुपस्थाय-कोपधिवारिकादन्यो यवनोपन्वाहारादभुक्तवायां सर्वैरुत्कृष्टं भुञ्जीत [१५] ।

॥ [इति] गणभोजनम् ॥ ३२ ॥

(३३) अकालभोजने ।

स्वमध्याह्नपर्यन्तारुणोद्गत्यन्तरमकालः [१६] । तत्त्वे [१७] । वृत् । खादनीय-भोजनीयाभ्यवहारे [१८] ।

॥ [इति] अकालभोजनम् ॥ ३३ ॥

(३४) सन्निहितवर्जने ।

पूर्वभक्ते प्रतिगृहीतं पश्चाद् भक्ते तत्र यामातिक्रान्तमिति सन्निहितम् [१९] । नोद्गृहीतं गिलेत् [१५०] । न पक्वमु(म्बु)षितं चान्तःसीम्नि [१] । भिक्षुपक्वञ्च [२] । सोऽत्र पाको य आमस्य [३] । तत्त्वमसृदूनां प्राक् त्रिभागात् स्विन्नत्वात् [४] । पर्णपरिवृत्तेर्मृदूनाम् [५] । द्रवाणां द्वितीयमुत्थितत्वात् [६] । नार्पिना (सर्पिषा?) कल्पकरणं पाकः [७] । न अन्यायत्तनिर्मितत्वं वासस्यानुषितत्वम् [८] । प्रदेशस्यत-

यापि पात्रस्य तद्भूमिपक्वता [१०]। न पक्वस्तद्गतत्वेन [११०]। नाग्नेरपात्रत्वम् [११]। न ततो निष्कृष्टनिर्गतयोस्तत्त्वम् [१२]। वासत्वमुपविचारस्य [१३]। च्यामम् [१४]। ऊर्ध्वञ्च नियतस्संभाव्यस्य [१५]। अभ्यन्तरस्य च [१६]। तत्त्वं पुरान्तरस्योपरिष्टस्य [१७]। नान्याधिष्ठितत्वेऽन्यवासत्वम् [१८]। न यावज्जीविकानामुद्गृहीतान्तःपक्वभिक्षुपक्षेषु तत्प्रतिषेधे संशितत्वं कालं प्रति [१९]। अर्धामिषं परिशुद्धे [११०]। पानादयो मलस्यास्ये [११]। बहिरस्य गोमयेन मृदा वा परिघृष्टोदकेन सम्मार्गो निर्मादनम् [१२]। अन्तर्द्विग्रोदकगण्डूषक्षोरणम् [१३]। निर्मादितत्वमाशयतो द्वित्रयधिकं दाने विखनतोऽपि पात्रस्य [१४]। निर्दोषं विरलने [१५]। निष्परिगोधे च संस्पर्शे [१६]। प्रक्षालितस्य च त्रिरुपगोमयमृत्तिकान्यतरेणास्निग्धतायाम् [१७]। अपनेयत्वमुत्थितस्य [१८]। तस्यैव प्रदेशपरिगोधे प्रक्षाल्यत्वम् [१९]। निःस्नेहतायै स्निग्धस्य च घटादेर्गम्भीर उदके ह्रदे निधानम् [११०]। आमत्स्यकच्छपमण्डूकशिशुमारवृक्कैर्निर्लेहाधारणम् [१]। दारुतोऽपि निःस्नेहतापत्तिः [२]। निर्मादने निःस्नेहितस्योपाङ्केन गोमयेन वा शुद्धत्वम् [३]। अर्धत्वं लवणक्षारकलुषोदकभूतस्य लवणादेः [४]। कल्पमानता च सर्वस्याकाले [५]। असत्त्वमकरणे लवणक्षारयोः स्वकार्यस्य [६]। उत्पत्तौ प्रतिविम्बस्योत्तरस्य [७]। कटकफलेनाम्भसः स्वाच्छ्यो(च्छ्यो?)पगमनम् [८]। क्षारेण सक्तुपिण्ड्या [९]। स्नेहनमविशरणायास्याः [११०]। नाप्रज्ञायमानस्य सत्संख्यत्वमाकरेष्वनुप्रविष्टस्य [११]। प्रदेशव्यवकरे तस्यैवापनेयत्वम् [१२]। चञ्चुना काकेन स्पृष्टतायां सामन्तकस्य [१३]। न तत्संयुक्तभारास्पृष्टौ न तस्य स्पृष्टता [१४]। न भ्रान्त्या स्मृतिप्रमोषेण वा [१५]। नाम्यां च्यावितस्य स्थापने [१६]। स्वल्पतरमन्तरं स्थानमुपनयेत् [१७]। न वैतरिके नोद्गृहीतत्वं प्रतिग्राहित[ा] वा [१८]। नानयेत प्रतिग्राहणार्हसम्बन्धस्य ग्रहणम् [१९]। सम्बद्धत्वं तेनान्तररज्वादिसंबद्धतायाम् [११०]। एकत्वं सन्निहितप्रतिगृहीतेषु तुल्ययो[ः] संवरेणाभिन्नदृष्ट्योः [१]। परेण चावरस्य [२]। गृहिवत् स्त्री-पुंसोः परस्परम् [३]। श्रामणेरिय स्पृष्टवा(?)गोपनात् तद्द्रोपकारी [४]। न सापेक्षेण दत्तस्योत्सृष्टत्वम् [५]। अर्द्धत्वं निरपेक्षोत्सृष्टस्य सापेक्षतायां तस्मान्नैतद् याचेत [६]। न गृह्णीत जानन् [७]। नाकल्पिकत्वं भागनयने स्पृष्टौ नीतस्य प्रवेशने तद्रूपेषु प्रत्ययेषु [८]। वाहासनं शकटे वर्ज्यत्वम् [९]। पूर्णेऽपि [११०]। ग्लानाधिरोहे च [१]। कर्णस्य नावि [२]। आसनस्य च तद्धारणार्थस्य [३]। सांघिकौपधयोश्चोद्बलतोर्घट्टनापनयनेनाग्निनिर्वापणेन चीवरकर्णकादिभिर्वा तदानेनेत्यादौ प्रयतनम् [४]। कल्पिकमसम्पत्तौ विधेर्नदीसंतारणार्थे नेतरि च संप्रापणार्थमुद्गृहीतमभावेऽन्यस्य पथ्यदनम् [५]। उत्साहनमभावे वोढुरस्य दानपतेः [६]। वहनमसम्पत्तौ स्वयम् [७]। संपादनञ्च तत एव दान-

परिवर्त्तग्राह्यस्य [१२] । भोज्यत्वमस्याप्यसंपत्तावन्यस्य [११] । अप्रतिग्राहितस्य च प्रतिग्राहकाभावेऽस्य चान्यस्य वा कृतभक्तच्छेदस्य [१४०] । प्रथमेऽह्नि व्याप्तमुष्टेः [१] । द्वयोः द्वितीये [२] । तृतीये यावदाप्तम् [३] । भोज्यत्वं फलानामकालेऽप्यकृत-कल्प[ा]नामप्यप्रतिग्राहितानां च [४] । निर्भक्तस्य [५] । तैव्रये क्षुदः [६] । मूलानाञ्च [७] । स्वयं च पातनोत्पाद्यते साह्यत्वं च [८] । उत्तरकौवर(रव ?) प्रसिद्धेः सर्वत्राप्रतिगृहीतोपभोगादौ प्रारिप्सायामभिध्यानम् [९] । न करके पानीयं पिबेत् संभवे हस्तनिर्मादनप[ा]त्रयोः [१४१] । असम्भवे चाप्रतिग्रस्तम् [११] । नास्य सजलतायामपि तत्त्वं भजेत [१२] । त्रैविध्यमस्य पिधानके [१३] । काष्ठमयं शैलमयं मृण्मयमिति [१४] । धारयेत् करकस्थालकम् [१५] । काष्ठमयं शैलमयं वा [१६] । निर्दोषं भाजनत्वोपयोगे पत्राणामप्रतिग्राहितत्वम् [१७] । अविशेषोऽत्र मुक्तामुक्तयोः [१८] । उपयोजनमसम्भवेऽन्यस्यामुक्तानाम् [१९] ।

॥ [इति] सन्निहितवर्जनम् ॥ ३४ ॥

(३५) प्रतिग्राहितभुक्तौ ।

भुञ्जीत त्यक्तमाशयतो दात्रान्यप्रतिग्राहकाभावे स्वयं प्रतिगृह्य [१४२] । सम्मुखान्तः-सीङ्यतिसंभवनीये प्रदेशेऽवस्थितौ नोत्तानपाणिना कार्ये तत्संबद्धे चोद्ग्रहणसम-र्थतोऽनुपसंपन्नादमनुष्यादपि दित्शे(त्से?)याङ्गेन तत्संबन्धेन चोत्सृष्टस्य प्रतीष्टिः प्रतिग्रहः [१] । जैगुप्स्यतायां जनपदस्योपनिक्षिपेत्युपदर्शिते मण्डलकेऽपि [२] । ऐक्यं पात्रतदधिष्ठानयोः [३] । गोचरः शाखामर्कटानां न ततस्तान् प्रत्यनभि-संभवनीयत्वं भूमेः [४] । न फलानां प(म ?)ञ्चपीठिकोत्संगपात्राधिष्ठानैः प्रति-ग्रहप्रतीष्टेरन्याय्यत्वम् [५] । निःश्रितैरेषां प्रत्यवेक्षणं तूष्णींभावेन [६] । समप्रवृत्तिं चारकं रचयेयुः [७] । न्याय्यं भिक्षोश्चारकत्वं प्रतिग्राहित्वस्य [८] । घृततैलमधुफाणितघटांश्चारयंस्तृणपत्रप्रभृति[भि]श्चीवराणि व्यवदध्यात् [९] । पृथक् चार्ये ज्येष्ठमध्यमकनीयसां करणम् [१४३] । पृथक्कृत्य मृष्टाग्राणां चारणम् [१०] । चारकस्याचार्य उपाध्यो (ध्यायो) वा प्रतिगृह्णीयात् [११] । अप्राप्यप्राप्तावनन्तरस्थानः (नम् ?) [१२] । अनेकत्वे यावतामासनमुक्त्वा प्रतिग्रहीतुं शक्तिः [१३] । लुठितस्य शक्यतायां स्वयममुक्त्वा स्थानं ग्रहीतुमध्वंसः प्रति-ग्राहस्य [१४] । स्पृष्टस्य च मक्षिकाकीटिकादिभिः [१५] । अन्येनास्य मुक्तस्य भिक्षुणा [१६] । ध्वंसकृन्मूषिकः [१७] । न प्रतिग्राहितत्प्रतिग्रहणमन्याय्यम् [१८] ।

॥ [इति प्रतिग्राहितभुक्तिः] ॥ ३५ ॥

(३६) अप्रतिग्राहितभुक्तौ ।

अप्रतिग्राहितायाम् [१४४] । उत्सृज्योदकदन्तकाष्ठमाहार्यस्य [१] । मुखेनाभ्यव-हारे [२] । अनुत्तरकुरौ [३] । प्रतीष्य(ष्ट्छे)द् ग्लानोऽनुपसम्पन्नेन भोजनमभाव उपसंपन्नस्य [४] । भोजयेदनुपसंपन्नम् [५] ।

॥ [इति] अप्रतिग्राहितभुक्तिः ॥ ३६ ॥

(३७) प्रणीतविज्ञापने ।

क्षीरं दधि नवनीतं मत्स्यं मांसं वल्लूरा इति प्रणीतभोजनम् [१] । एतत्कर्तृत्वं अज्ञातिगृहीता च दातुः [२] । स्वविज्ञप्त्याभ्यवहृतौ विज्ञप्तौ कारितत्वे चास्या दुष्कृतस्य [३] । अग्लानस्याकृतयथासुखप्रपारणस्य [४] । तस्माल्लभमानस्यापि चेदन्यल्लूहं प्रणीतं वा समं प्रकृष्टं वा विज्ञप्तिः [५] । अर्थताऽस्मिन् लूहस्य [६] । यथासुखप्रपारणत्व भिक्षयादाय निर्गतेनं तूष्णीं तिष्ठतः प्रतिक्षिप्तो वा तत्किं याचस इति प्रश्नस्य [७] ।

॥ [इति] प्रणीतविज्ञप्त(?ज्ञाप)नम् ॥ ३७ ॥

(३८) सप्राणकोपभोगे ।

(क) विभङ्गगतम् ।

स्वोपभोगार्थत्वे प्रवृत्तिप्रवर्त्तनयोः [८] । वृत् । सप्राणितायाम् [९] । उदकसर्प्पिस्तैलमधुफाणितक्षीरदधिनवनीतशुक्तशुलुकदधिमण्डकांजिकफलसाद्यकादेरुपयोज्यस्य [१०] । दृश्यैः [११] । मृतौ [१२] । प्रतिप्राणि उपभोगः शरीर उपयोगः [१३] । तद्यथा स्नानं पानं दन्तकाष्ठविसर्जनं हस्तपादप्रक्षालनम् [१४] । उपकार्ये स उपयोगो य उपकरणेषु [१५] । अभ्यवहार्यपात्रचीवरस्थानदन्तधावनाग्निप्रभृतीनि शरीरोपकरणानि [१६] । तेषां मृद्गोमयरङ्गतृणकाष्ठप्रभृति [१७] । तेषु उपयोगस्तद्यथा निर्मार्दनं भावनं रञ्जनं सेकः सम्मार्ग उपलेपः [१८] । यूषमण्डयवागूनां करणम् [१९] । बन्धमोक्षयोरुदकमार्गस्य [२०] । काष्ठपुत्रयोः क्षेपाकर्षणोत्पाटनानाम् [२१] । अकपलसकादन्येन रोमविधादिना स्नानम् [२२] । तेनास्य हि रिक्तप्राणकधातावुदक इति प्रयोगः [२३] ।

॥ [इति] सप्राणकोपभोग', विभङ्गगत' ॥

(ख) क्षुद्रकादिगतम् ।

धारयेद् दण्डपोणम् [२४] । दत्तप्रत्येष्टयभाण्डि(?)त्रमाकाशावस्थाप्याकीर्यमाणपव्यजलप्र(?)प्रत्येष्टयपवित्यसंयमार्थं(?)लोहकण्डकस्त्रिदण्डस्तदाख्यः [२५] । स्नानार्थं जलस्यास्तृतेः परिश्रावणे दानम् [२६] । वालुकया गोमयेन वा [२७] । धारणपात्रस्य वा [२८] । मृत्ताम्र[ा]यसयोरन्यतरस्य [२९] । त्रिदण्डयष्टयामस्य बन्धनम् [३०] । संगृह्य रन्ध्रे स्त्रेण पूर्वस्य [३१] । उत्तरस्य श्लक्ष्णशृङ्खलिकया [३२] । धारणमस्य [३३] । कम्पिकया मुहुर्मुहुरदानेस्त्र(?)परिश्रावणस्य पराघातः [३४] । अल्पप्रयत्नेन रव(?)णम् [३५] । धारणमस्य [३६] । मृदस्ताम्रस्य वा [३७] । कुम्भकृत्येतदधोनाडिषु पुस्त(?)स्वदन्तरविवरम् [३८] । नदुक्तेषु शोधकत्वम् [३९] ।

परिश्रावणमुपस्थापयेत् [८८]। खल्लगं ध(च?)र्मकरकं मोचनपट्टकं वा [८९]। आत्युहायां कल्पिकजलस्य संभावदा(?)याश्च करककुण्डिकाभ्यामेतत् तद्वत्त्वम् [९०]। न सान्तरेण सार्द्धम् [९१]। तद्रूपश्चेत् प्रत्ययः क्षमयित्वा कार्यकरणेऽस्तित्वमास्तित्वम् [९२]। तस्मात् तद्वत्त्वमत्र दाने प्रतिज्ञातेऽन्येन [९३]। नैतज्जनपदचारिक(का?)यां वियुक्तौ दानाप्रतिज्ञाने संश्रयेत [९४]। नाविघातकृदन्तरसंचारश्चारिका [९५]। क्रोशपञ्चकस्यैत[त्तद्?]त्त्वम् [९६]। न प्रमील्य गतस्य स्थाने तद्वत्त्वाभावे कामजः [९७]। नैकेनानेकस्य तद्वत्त्वासंपत्तिरासंघात् [९८]। नाविघातकृत्त्वं शीघ्रस्रोतसः [९९]। क्रोशमनु गच्छतोऽस्यामनुस्रोतोऽनुसंहितं प्रत्यवेक्षणात् तेन प्रवृत्तिः [१००]। सम्भेदश्चेदत्रोदकान्तरेण प्राक् ततः [१०१]। व्यामस्य परितः प्रत्यवेक्षितत्वम् [१०२]। चक्षुषा शुद्धत्वमुदकस्य शुद्धिः [१०३]। प्राकृतेन [१०४]। निष्कम्पत्वे प्रत्यवेक्षणमरजसः [१०५]। पूर्णत्वे घटस्य [१०६]। नातिक्रियासंख्यामत्र चिरतां कुर्यात् [१०७]। तूलिकया सुकरं प्राणकानां दर्शयनं श्लक्ष्णया [१०८]। नैनां कुमके ध्वन्या किरेत् [१०९]। नान्याम् [११०]। प्राणकपतनम् [१११]। चेत् प्रदीपे तत्करणेनास्य प्रच्छादनम् [११२]। पञ्जरं वंशविदलिकानां शुक्लवस्त्रस्य वेष्टितमभ्रपटलेन वा तदाख्यम् [११३]। शताक्षश्च [११४]। आद्यकृतित्वा कर्परं वा घटादेश्छिद्रितम् [११५]। न वालपाशेन सर्पं बध्नीयात् [११६]। अच्छटाशब्दं कृत्वा भद्रमुखादर्शनपथे तिष्ठेति वदेत् [११७]। अस्थितावजपदकेन दण्डेन शनैष्कुम्भे कुण्डके वा प्रक्षिप्य छिद्राणि कृत्वा मुखं पिधाय निष्कासनम् [११८]। असंम(?प)त्तौ पट्टिकया लोठिकया मुरुचिकया वा रज्जु(ज्ञ)पाशेन वा नतु(?दु)के वेष्टितेन ग्रीवायां बद्धा [११९]। प्रक्षेपेऽप्येषां विनियोगः [१२०]। न दवे छोरयेत् [१२१]। आशयप्रवेश(?)तिष्ठेत् [१२२]। नदुके यूकानां स्थापनम् [१२३]। शुषिरे तस्य [१२४]। शाद्वले मत्कुणानाम् [१२५]। शीतले वा [१२६]। मोचनघटिकायाः पूर्वावतारणार्थं वारणम् [१२७]। तेनैव वा परिश्रावणेनावतारणम् [१२८]। मोचनं परिश्रावणस्य लग्नप्राणकापनीतावुपायः [१२९]। भावनं मलस्य [१३०]। शोष्य(?प)णं योन्यानुपगतेः [१३१]। निष्पीडनस्य द्वयेऽप्यसिद्धुपकरत्वम् [१३२]। निरावद्यालंभप्रत्ययसंघपुद्गलपरिश्रावणप्रवणप्रत्ययेन प्रवृत्तिः [१३३]। आद्यूर्वोदयात् गृहीतोदपानयोः प्रत्यवेक्षितानुवृत्तिः [१३४]। पादधावनिकां रिक्तामुच्छोच्य पूरयेत् [१३५]। उपस्थापयेदन्यभाण्डम् [१३६]। भाण्डगोपकस्य तद्गतः सांघिके व्यापारः [१३७]। नात्र दानग्रहणयोः नान्तर्भावः [१३८]। दानं गृहिणे याचितकत्वेन [१३९]। परिभुक्तस्य तत्सत्त्वे [१४०]। नानेन दानपतीनां विहारे देयत्वस्य नोक्तता नवस्य भिक्षवे निर्दे(?धे)यत्वेन [१४१]। भाण्डार्थे लयनस(स्य?) नियोजनम् [१४२]। पृथक्त्वेन मृत्तान्नभाण्डिकयोर्निक्षेपः [१४३]। उपस्थापनं पानीयस्य [१४४]। न यत्र क्वचन स्थापनम् [१४५]। मण्डपस्य तदर्थं करणम् [१४६]। दक्षिणपश्चिमे विहारस्य पार्श्वेऽभ्यन्तरतः [१४७]। वातापनमोक्षेष्टकान्तरदानोदकभ्रम-

मोक्षद्वारकरणकपाटकटकदानम् [७७]। वंशस्य च परिश्रावणस्थापनार्थम् [७८]। काष्टम्मञ्जि(ष्ठमञ्जि?)कासु स्थापनम् [७९]। इष्टकपिण्डिकायां वा [८०]। आधारकेषु [८१]। चौक्यं पानीयभाण्डमापा(?प)रिभोगार्थान्(र्थं?) कुर्यात् [८२]। शुचि [८३]। पानीयञ्च पेयम् [८४]। नाकल्पिकैरे[त?]द्वस्त्रचीवरैश्चारयेत् [८५]। कालेन कालमुदकभाण्डानामन्तःशोचनम् [८६]। गम्भीराणामुशीरकुर्चकेन पत्रविभङ्गकेनत्रकेन वा यष्ट्यामुपनिद्धेन [८७]। नातोऽरम्भृत्यमामिषोपदेहस्य [८८]। शोषणञ्च [८९]। तदा विघातार्थमपहत्वे(?)न [९०]। नि[:]श्रयकरणीयानामुदकगतो व्यापारः [९१]।

॥ [इति] सप्राणवजलसवद्धक्षुद्रकादिगत॰ ॥ ३८ ॥

(३९) निषदने।

प्रवृत्तावौन्मुखे वा [९२]। सन्निपाते [९३]। स्त्रीपुन्सयोः(?पुंसोः) [९४]। गृहित्वे [९५]। अन्यस्थानतायाम् [९६]। योग्यत्वे च [९७]। निरस्यत्वे संप्रयुक्तेः [९८]। प्रत्यक्षकल्पेन निषदने [९९]।

॥ [इति] सभोजने निषदनम् ॥ ३९ ॥

(४०) स्थाने।

स्थाने रहःकल्पेन [१००]। सावरणस्य [१०१]। न चेद् भयवशात् [१०२]। दुष्कृतस्यासंवेद्यसंवेत्तृत्वे [१०३]। अवधाने च स्थानान्तरे [१०४]। गोचरान्तात् दृष्टेः स्थानान्तः [१०५]। अन्तर्गततं गन्ज(ञ्ज)स्य [१०६]। भिन्नत्वं गृहान्तरस्य [१०७]।

॥ [इति] सभोजने स्थानम् ॥ ४० ॥

(४१) अचेलदाने।

स्त्रिया पुरुषस्य वा [१०८]। उत्सृज्य ज्ञातिं प्रव्रजा(ज्या?)पेक्षं ग्लानं च [१०९]। अनिर्दलिङ्गप्रव्रजितस्याचेलकस्य काये कायसम्बन्धे वा [११०]। खादनीयभोजनीययोः [१११]। स्वस्य तस्य च [११२]। उत्सृज्य पापकदृष्टिगताद् विवेचनार्थताम् [११३]। स्वयं दाने [११४]। अकल्पिकयोः दुष्कृतम् [११५]। दापने [११६]। संविभागे च [११७]।

॥ [इति] अचेलदानम् ॥ ४१ ॥

(४२) सेनादर्शने।

युद्धाभिनन्दिसेनादर्शनार्थतया [११८]। उत्सृज्य राजदेवीकुमारामात्यभटबलाग्रनैगमजानपदोक्तिम् [११९]। अन्तरायोपपातवशतां च [१२०]। प्रस्थापितस्य [१२१]। उपविचारान्तातिक्रमे दृष्टौ [१२२]।

॥ [इति] सेनादर्शने [प्रायश्चित्तिक]म् ॥ ४२ ॥

(४३) सेनावासे।

विनैते तत्र रात्रिन्दिवद्वयपरिपूरेरूर्ध्वं वासे [१२३]। अनिमित्तं च पूर्वत्रापि [१२४]।

॥ [इति] सेनावास॰ ॥ ४३ ॥

(४४) युद्धाङ्गप्रत्यनुभवे ।

युद्धाङ्गानां कर्तृत्वम् [१३] । अनन्तरायवशगतस्य [१४] । समस्तव्यस्तानाम् [१५] । सञ्जीकृतानाम् [१६] । मौले मौलस्य [१७] । दुष्कृतस्य प्रयुक्तौ [१८] । असञ्जीकृतानाम् [१९] । उभयत्रापि दुष्कृतस्यैव [१९०] । स्पृष्टिरुद्यूथनं प्रस्थाय दर्शनार्थमुपविचारान्तातिक्रमे दृष्टिरिति मूलानि [१] । न्यूनत्वमनुद्यतत्वे [२] । न हस्त्यश्वकुक्कुटलावकवर्चकस्त्रीपुरुषयुद्धादि कुर्यात् कारयेन्निरीक्षेत वा [३] ।

॥ [इति] युद्धाङ्गप्रत्यनुभवः ॥ ४४ ॥

(४५) प्रहरणे ।

कलुषचित्ततया [४] । कायतन्त्रिःसृष्टसम्बद्धैर्येन केनचिदन्ततः पादाङ्गुष्ठसर्षपतूलिक[ा]भिः प्रहृतौ [५] । भिक्षोः [६] । परस्य [७] । उत्तरेषु त्रिषु [८] । स्पृष्टो(ष्टौ?) [९] । प्रतिनिपात्यम् [१९१०] । अनिपाते दुष्कृतम् [११] । नान्यत्र प्रहर्त्तव्येऽन्यत्र प्रहरेत् [१२] । न स्तम्भे प्रहारं दद्यात् [१३] । न भित्तौ भूम्यां वृक्षेऽन्यत्र वा [१४] ।

॥ [इति] प्रहरणम् ॥ ४५ ॥

(४६) अवगुरणे ।

प्रहारावगुरणे [१५] । प्रतिद्रव्यम् [१६] ।

॥ [इति] अवगुरणम् ॥ ४६ ॥

(४७) अवद्यप्रतिच्छादने ।

पाराजयिकसंघावशेषयोरुत्सृज्यास्पर्शश्रामण्यब्रह्मचर्यान्तरायसंघक्षोभार्शकवशताम् [१७] । प्रतिच्छादने [१८] । अन्तेऽहोरात्रस्य [१९] । प्राग् दुष्कृतम् [१९१०] । अन्यस्याश्वापत्तेः [२०] ।

॥ [इति] अवद्यप्रतिच्छादनम् ॥ ४७ ॥

(४८) भक्तच्छेदकारणे ।

संचिन्त्य मुक्त्वा रोगप्रतिक्रियार्थतां गृही दातृभक्तच्छेदस्य कारणे [१] ।

॥ [इति] भक्तच्छेदकारणम् ॥ ४८ ॥

(४९) अग्निवृत्ते ।

न सिंहं स्पृशेत् [२] । शास्तृधर्मसंघसब्रह्मचारिणां धर्म्यकरणीयतापेक्षा पात्ररंगकर्मणोश्च समयाधिष्ठानम् [३] । अधितिष्ठेद् दीर्घम् [४] । क्रीडायां चापरया चन्द्रसूर्यालातचक्रादिकरणतश्च [५] । अग्निना [६] । अनधिष्ठितसमयस्य अग्लान्यवशतार्थस्य स्पृष्टौ [७] । स्वयन्त्रियोगतो वा [८] । प्रज्वाल[न]निर्वापणस्पृष्टास्पृष्टेन्धनसमवधानयुक्तनिष्कर्षणांङ्गारसमावर्त्तननिष्कर्षणेषु [९१०] । अर्द्धस्तमितत्वं कुकूलस्य [११] । ज्वालानां च [१२] । समवधाननिष्कर्षणे तत्रेन्धनस्या-

ग्र्यन्तरवृत्तम् [११] । केशरोमास्थिनखखेटसंघाणकवान्तविरिक्तमुद्गमाषतिलतैलमधुसर्पिषामर्द्धेन्धनत्वम् [१२] । अन्यस्य करणीयेऽन्यस्येत्यधिष्ठानमर्द्धाधिष्ठानम् [१३] ।

॥ [इति] अग्निवृत्तम् ॥ ४९ ॥

(५०) छन्दप्रत्युद्धारे ।

भिक्ष्वर्थार्थे कर्मणि [१४] । वृत्तस्य महदानास्य(?) प्रत्युद्धारार्थायां वापि [१५] ।

॥ [इति] छन्दप्रत्युद्धारः ॥ ५० ॥

(५१) [शयने] ।

नाचन्द्रसूर्यालोकवत्यवग्रहदेशे शयीत [१६] । मुक्त्वा ग्लान्यग्लानोपस्थानवशताम् [१७] । प्रायश्चित्तिकमत्रेत्येके [१८] । अर्द्धत्वमनिपत्तेः पृथक्त्वञ्चाह्नः [१९] । यद्रूपः (यः ?) परिवारितमगारपर्यन्तः [२०] । तद्गतत्वं संबद्धस्य तद् द्वारपार्श्वोपचारस्यागारभूतस्य [२१] । पुरान्तरस्य च तद्गतद्वारस्यानन्तरस्य च [२२] । न सोपचारात् परस्य लयनमात्रात् पृथग्भूताध्यासितस्य [२३] । अर्द्धत्वं वृक्षमूलकुड्यशुशि(?सुपि,रवृत्ते(?) मूलानाम् [२४] ।

[इति शयनप्रायश्चित्तिकम्] ॥ ५१ ॥

(५२) स्त्रीसहस्वप्ने ।

सगहनानां स्त्रीसहस्वप्ने [२५] । अध्वनोऽत्र कुक्कुटस्योत्पाल्य निलयनेऽन्तरमभूतत्वम् [२६] । सर्वस्य सान्तरसंचारस्य निरनगारान्तरत्वे छदनस्यैकत्वम् [२७] । पृथक्त्वं स्वभागगतबधनबन्ध(?)त्वे द्वारस्योपचारस्यापि [२८] । तद्रक्षितत्वं भिक्षुणापत्तेः [२९] । गुप्तत्वं च स्वामिना मातृग्रामस्य [३०] । उद्धृतत्वं च निश्रयणेः पुरान्तरे [३१] । हासोऽनगारत्वेऽन्यभूतात् [३२] ।

[इति स्त्रीसहस्वप्नम्] ॥ ५२ ॥

(५३) अनुपसम्पन्नसहस्वप्ने ।

अनुपसंपन्नेन सार्द्धमगारे तृतीयस्यां रात्रौ स्वप्ने [३३] । अन्ते [३४] । प्राग् दुष्कृतं निर्दोषमध्वपरिश्रान्तस्य क्लान्तौ [३५] । तथास्यान्तेऽपि [३६] । अकल्पिनि च भिक्षोः करणीये तत्संपादकेन सार्द्धं ग्लानस्य तदुपस्थायिनश्च [३७] । श्रामणेरेण च तद्वतः सन्निहिततायां तत्रावासे पापभिक्षोः कृतकुर्वन्निवासप्रयत्नस्य [३८] । उपगतौ पश्चिमकालयोर्द्व(द्वे)योर्मासयोर्वर्तमानस्य [३९] । नोर्ध्वमस्य वस्तव्यत्वम् [४०] । अकार्यत्वं पूर्वोपगतेः [४१] । अरक्षत्वं प्राग् [४२] । नैषोऽनुपस्थापितं श्रामणेरमुपस्थापयेत् [४३] । मिद्धोपपातेनाध्वनि श्रामणेरमभिप्लुतं पुरतः कृत्वा गच्छेत् [४४] । बुभुक्षितश्चेत् सानुकालं दद्यादसौ तदाहारम् [४५] । पुनश्चेद् वेलायां तदापि [४६] ।

॥ [इति] अनुपसम्पन्नैः सहस्वप्नः ॥ ५३ ॥

(५४) दृष्टिगतानुत्सर्गे ।

तथाहम्भगवतो धर्मदेशितमाजानामि यथा [ये अधर्माः संक्लेशिकाः] आन्तरायिका धर्मा उक्ता भगवतेति प्रतिषे(?से)व्यमाने नालमन्तरायायेत्यादि प्रवृत्तवचनतावसर्गे जुगुप्सयमत एनं कुर्युः ज्ञापनेन [९७] ।

॥ [इति] दृष्टिगतानुत्सर्गः ॥ ५४ ॥

(५५) उत्क्षिप्तानुप्रवृत्तौ ।

तथा विदितप्रक्षिप्तस्याप्रतिकृततायां भिक्षोः [१६०] । उद्देशदाने [७१] । परिप्र(?पृ)च्छनिकायाः [७२] । सनिःश्रयस्य [७३] । अनुशासन्याः [७४] । अववादस्य [७५] । आविष्करणे दृष्टेः [७६] । आसोप(?)संभोगे [७७] । उपस्थापनस्वीकृतौ [७८] । अगारे च सहस्रमे [७९] । अन्ते रात्रेः [१६०] । अन्यथा वासं स्यन्दने [८१] । मुक्त्वा ग्लान्यदग्विवेचनगतेनार्थेन [८२] ।

॥ [इति] उत्क्षिप्तानुप्रवृत्तिः ॥ ५५ ॥

(५६) नाशितसंग्रहे ।

प्रवृत्ततद्वचनानुत्सर्गे श्रामणेरं नाशयेयुः [८३] । ज्ञप्तिचतुर्थस्य ते कर्मण इति पूर्वत्रोत्तरनाशनीयस्य ते इत्युपक्रमं ज्ञप्तिः कृता निःसृजेदमेवंरूपं पापकं दृष्टिगतं प्रथमा कर्मवाचना कृता द्वितीयेति प्रत्येतदन्तमस्मै भिक्षुणा श्रावयेयुः [८४] । अनारस्तावुत्तरं कुर्युः [८५] । नाशिततायां श्रमणोद्देशस्य [८६] ।

॥ [इति] नाशितसंग्रहः ॥ ५६ ॥

(५७) अरक्तवस्त्रोपभोगे ।

नीलया गैरिकेण वल्कलेनेत्यनुपरक्तस्य स्वरासस्य [८७] । अन्ततः पात्रवस्त्रक(?)स्थाविकापादचोडकायबन्धनानां प्रावरणादौ परिभोगे [८८] । न निकायान्तरीयस्य पुनः कल्पनीयत्वम् [८९] । नाच्छिन्नस्य गृहिणा [१६१] । न महारङ्गरक्तं प्रावृतिम्भजेत [९१] । नागारिकस्य [९२] । भजेद् विहाराभ्यन्तरे प्रतिच्छादितस्य कापायेण [९३] । साधारणत्वमध्वनि याचितप्रावरणस्य [९४] । सहायकैः भिक्षुश्रामणेरैः [९५] । एकत्वे वृद्धान्तःदारभ्य यावत्संभावनाप्रपरिदानम् [९६] । नानवच्छिन्नमपरतः प्रावृत्यं(?) चंक्रम्येत [९७] । अन्वाक्रामेदुपनिमन्त्रितः पुण्यकामेन नवमाच्छिन्नदशात् पराहत्यानित्यतामनसिकारेण [९८] ।

॥ [इति] अरक्तवस्त्रोपभोगः ॥ ५७ ॥

(५८) उद्धर्षवस्तुगते ।

स्पृष्टो(ष्टौ? ष्ट-) स्पर्शनयोः कर्तृरत्न(र्तृत्व?)मस्वम् [९९] । तत्सम्मतं च [१००] । शस्त्रमेतत् संग्रामावचरं भाण्डं च गन्धर्वावचरम् [१] । प्राप्तं योग्यत्वमुपयोगाय मूलस्य [२] । दुष्कृतस्याप्राप्तम् [३] । मुक्त्वा स्वीकारानुगतः तत्र द्रव्याविनाश-

चित्तस्य विहारतदुपचारगतम् [७] । न तदुपेक्षेत [७] । सप्ताष्टान् दिवसेनैतदुपविचारे प्रकृष्टन् (?) पांसुना वैमङ्गुकर्वा छादयेत् [८] । नासमुदितचिन्ना(ता?)य स्वाम्यहमिति ब्रुवते दद्यात् [९] । अनागमेऽस्योद्धं(र्ध्वं?) सांघिके गञ्जोः [उ]पनिक्षिपेत् [१०] । आषष्ठमासपर्यन्तं धारयेत् [११] । ऊर्ध्वमनागतौ यद् भूमौ बुद्धसांघिकयोर्लब्धं तत्रोपयुक्तिः [१२] । अयोग्यत्वे क्रयणं योग्यस्य तेन स्थावरस्य [१३] । तदा चेत् स्वाम्यागच्छेदनुज्ञानमायाच्यानिच्छते दद्युः [१४] । वृद्धिं चेत् मृगयेदेतदेव न बहु मन्यसे यदस्माभिः परिपालितमिति ब्रूयुः [१५] । घटितविघ(द्ध?)तायां मण्यादेर्योग्यत्वम् [१६] । हर्षकटककेजू(यू)रहारार्द्धाहारत्वविनिवेशे च [१७] । वीणावेणुवल्लरिमहतिमुद्घोषकानां सतन्त्रीकत्वे [१८] । वदत्ता(?)यां शङ्खभेरीपटहमुखानाम् [१९] । धनुषः सगुणत्वे [२०] । तत्त्वेशीलयेकतो धारककुन्तडाभाणेऽर्द्धानाम् [२१] । शरनाराचार्द्धनाराचानां सफलत्वेः(त्वे ?) [२२] । सधातुकत्वे प्रतिमायाः [२३] । निर्धापमस्याः शास्तृसंज्ञामुपस्थाप्य [२४] । काचमणिपलालमालकाण्डवीणिकतलमट्टकपिञ्जनकतुलिकाकाण्डानामर्द्धत्वम् [२५] । अयोग्यत्वं सुवर्णपिण्डस्य [२६] । गोपयित्वोत्रासे गृहीत्वा वानुपरोधे स्वस्य सांघिकं स्तौपिकं च हिरण्यसुवर्णमपक्रमणम् [२७] । स्त्रा(श्रा?)द्धेन श्रामणेरेण वा [२८] । अभावे स्वयम् [२९] । खननमत्र [३०] । अपगते दानम् [३१] । उत्पाद्य तद्वत् [३२] । निर्दोषममानुषभवने पुण्यनिर्जातं चेदेषां रत्नमयं भूमिसोपानादि [३३] । भोजने च भाजनमसम्भवेऽन्यस्य [३४] । शयनासनं च निषादे [३५] । गच्छेद् यानेन [३६] । धर्मार्थवशतया [३७] । नाटोपनता [३८] । न जीर्णग्लानाभ्यामन्यः [३९] । निषीदेद् धर्मश्र[ा]वणार्थं रत्नमये सिंहासने पराहत्यानित्यतामनसिकारेण [४०] । निवेशने चागारिकीयाणी(?नी)ति संप्रेक्ष्य तत्प्रज्ञप्तौ [४१] । सुवर्णखचितकंकणिकावृतेषु वस्त्रेषु [४२] । अत्र च मणिप्रत्युप्तेषु सुवर्णरूप्यखचितेषु प्रवेशयेयुरेतानि [४३] । नाकल्पिकत्वमुपस्थापितशास्तृसंज्ञानामागारिकश्रामणेराभावे बुद्धप्रतिष्ठ(ष्ठि?)तेर्धर्मार्थवशतया स्पृष्टौ [४४] । त(न ?)द्रव्यस्य च [४५] । नाभरणप्रावृत्तिं भजेत [४६] । धारयेत् मुद्रानम् (द्रा?) [४७] । अप्रावरणिकीम् [४८] । त्रपुताम्ररितीकजतुकाष्ठशैलमृद्दन्तशृङ्गेभ्यः [४९] । चिह्नं सांघिकायां(याः?) मध्ये चक्रं पार्श्वयोर्मृगावधस्लाद् विहारस्वामिनो नाम [५०] । पैङ्गलिकायामस्थिसंकलाशिर[ः] कपालं वा [५१] । न फणिकया शिर[ः] प्रसाधयेत् [५२] । निदर्शनमेषा [५३] । नादर्शेन मुखं पश्येत् [५४] । उदकात् [५५] । अनापत्तिरुदकप्रत्यवेक्षणार्थतायां व्रणवलीपलितदर्शने पूर्वोत्तरनिमित्तोद्ग्रहणे [५६] । न व्यार्षं भजेत् [५७] । न रोचनाम्रक्षणम् [५८] । न गन्धैः [५९] । भजेत पादयोर्गन्धाङ्गददानं पुण्यार्थिनाम् [६०] । न तस्य पुरतो(?त उ)पनयेत् [६१] । नैभिर[ा]क्तः संघे सन्निपतेत् [६२] ।

न गृहिभ्यो धर्मं देशयेत् [६१] । न कुलान्युपसंक्रामेत [६२] । स्नानमन्ते भजेत [६३] । प्रतिगृह्णीतैनाम् [६४] । पुष्पमालां च [६५] । चैत्ये विनियोगः [६६] । श्रावकस्यापि [६७] । अनभिमतो दातुः शिरोन्ते पादान्ते वा [६८] । असम्मुखे द्वारस्य [६९] । भित्तौ [७०] । लम्बनं मालाद्याशून्यामत्रावतूसितायां कण्टके वा [७१] । चक्षुष्यं सुगन्धीति कालानुकालं घ्राणम् [७२] । न ब्रह्मसूत्रप्रावृतिं भजेत [७३] । न सूत्रकस्य [७४] । मूलबाहौ चिकित्सार्थस्य भजेत वामे [७५] । न यत्र क्वचन छोरयेत् [७६] । सशेषं चेत चीवरकर्णके कुञ्चके बन्धनम् [७७] । न चेत् स्तम्भशुषि(सुषि ?)रे कुड्यस्य वा निक्षेपः [७८] । न नृत्(त्य ?)गीतवादितमाचरेत् [७९] । न शिक्षयेत् [८०] । नोपसंहरेत् [८१] । न दर्शनायोपसंक्रामेत् [८२] । न भिक्षुण्या नृत्तं (त्यं ?) कारयेत् [८३] । कुर्यात् शास्तृगुणसंकीर्त्तने त्रिदण्डकदाने च स्वगुप्तिम् [८४] । शिक्षेतैनां प्रतिगुप्तिप्रदेशे [८५] । न संचग्घनसंक्रीडनसंकिलिकिलायनौद्धत्यद्रवकायताद्यानि कुर्यात् [८६] । नौद्धत्याभिप्रायः कायवाचो (चौ ?) विकुर्वीत [८७] । भागशो व्यवकेरसंसर्गः [८८] । न भाजन(नं) संचारकेनाम्यवहृतं कुर्यात् [८९] । न वतंसकं ग्रथ्नीयात् [९०] । नाम(व)मुञ्चेत [९१] । न लालाटिक[ा]मनुप्रयच्छेत् [९२] । न समावस्थायां वा(या)चेत [९३] । न जवनप्लवने कुर्यात् [९४] । नोरुबाहुमत्स्यपरिवर्त्तकं परिवर्द्धेत [९५] । न जलशिविकां विध्येत [९६] । न जलमण्डूकभेरिके वादयेत् [९७] । न [उ]दकपिच्छिलिकां पिच्छिलेत् [९८] । न हस्तिकुञ्चिताश्वहेषितपर्भगर्जितमयूरकोकिलरुतानि कुर्यात् [९९] । न मुखशंखडुड्डुकभेरीवादनम् [१००] ।

॥ [इति] उद्धर्षवस्तुगतम् ॥ ५८ ॥

(५९) स्नाने ।

शिष्टादध्यर्धतो ग्रीष्मस्य पूर्वतश्च वर्षाणां मासात् [१] । अचीवरद्वितीयस्य लब्धौ यद्विधस्य [२] । अनुद्धूतस्य वातेन [३] । चीवरकर्णकिरणं तत्पर्यन्तः [४] । अनवघृष्टस्य [५] । अस्य बिन्दुद्वयनिपात[ः] काये [६] । अन्यदा पञ्चदशादस्नानदिवसादर्वाक्स्नाने [७] । अभिषेकेण चावगाहनेन वा [८] । नाभिप्राप्तौ [९] । पुरस्ताद् दुष्कृतम् [१०] । सर्वत्र समयेष्वनधिष्ठाने [११] । नार्थान्तरपरो जलानुभवः स्नानम् [१२] । तस्मादुत्तरणं संचेतितया मूर्छितसेकेष्वनापत्तिः [१३] । मन्येताश्मापरान्तकेष्वस्याभावम् [१४] । न संभवे परस्योत्स्रावकल्पं संश्रयेत [१५] ।

॥ [इति] स्नानप्रायश्चित्तिकम् ॥ ५९ ॥

(६०) तिर्यग्वधे ।

वधकचित्तेन तिरश्चः प्रहृतौ [१६] । तदाऽन्यदा वा तन्निदानं मृतौ दुष्कृतत्वं सत्त्वाविग्रहस्य [१७] ।

॥ [इति] तिर्यग्वधः ॥ ६० ॥

(६१) कौकृत्योपसंहारे ।

न त्वमुपसम्पन्नः पाराजयिकामस्यापन्न इत्याद्यर्थ(र्थं) भिक्षुर्येन कौकृत्योपसंहृतौ भिक्षोः [६०] । अस्पर्शोत्पादनचित्तेन [६१] । हास्येनापि [६२] । अनुत्पत्तावपि [६३] । कौकृत्यस्य [६४] । अन्येन दुष्कृतम् [६५] ।

॥ [इति] कौकृत्योपसंहारः ॥ ६१ ॥

(६२) प्रतोदने ।

भिक्षोः [६६] । अङ्गुलिमुष्टिरत्निस्कन्धशीर्षपार्श्वपृष्ठकटयूरुजंघाजानुपादाङ्गुष्ठादिभिः प्रतोदनतः स्पृष्टौ विकरणचित्तेन [६७] । तस्माद् व्रणमशपिल्प(?शक)तिलकरोमावर्तादि दर्शनेनापत्तिः [६८] । एके वानेकत्वे निपात्यस्य [६९] ।

॥ [इति] प्रतोदनप्रायश्चित्तिकम् ॥ ६२ ॥

(६४) द्रवहर्षणे ।

जलविषयक्रियानुष्ठाने [७०] । अवतीर्णस्य निमज्जनोन्मज्जनतीरान्तरसंचारानुप्रतिस्रोतोव्यायामजलभेरिकामण्डूकनादनशिक्षियकावेधचक्रनाडवज्रककूपकावर्त्तकरणलेखाकर्षकाना मौलम् [७१] । टिप्पकादानस्य दुष्कृतम् [७२] । गोलघटवर्धनीशरावे [७३] । क्षोलसूपयूपमण्डे च सत्यामपि तप्ततायाम् [७४] । अजलहर्षणे च [७५] । तद्वत् तद्भूतकारणम् [७६] । औद्धत्यरतप्रत्यनुभवच्छन्देन [७७] । तस्माद् प्रह्लादनच्छन्देनावतारणादानापत्तिः [७८] । तरणशिक्षायां तिर्यगायतं वा व्यायामे [७९] । जिह्वादयिषया तप्तेषु लेखाकर्षणे [८०] ।

॥ [इति] द्रवहर्षणम् ॥ ६४ ॥

(६५) स्त्रीसहशय्यायाम् ।

मातृग्रामेण सार्द्धमेकस्मिन्नगारे मिद्धाप्रक्रान्तौ निशयां(या?) [८१] । अन्तः [८२] । प्राग् दुष्कृतम् [८३] । कुकुटिप्रमाणमेतत् कृत्वेऽन्तः [८४] ।

॥ [इति] स्त्रीसहशय्याप्राय० ॥ ६५ ॥

(६६) भीषणे ।

हासप्रेक्षयापि भीषणच्छन्देन भयनिमित्तोपसंहारपूर्वकं विज्ञपने [८५] । भयंकरस्यामुकोऽयमिति भिक्षोः परेणाप्यनुत्पत्तावपि भयस्य [८६] । मौलमन्सन(मन?) आपस्य [८७] । तद् यथा प्रेतपिशाचकुम्भाण्डकटपूतनत्वाख्यापिनां कीटनं(?) कीटकीटानामङ्गारिकावर्णानां दग्धस्थूणानिभानां रूपाणाम् [८८] । सिंहव्याघ्रद्वीपिकोकपटारुभ्रष्टोते(?)काशब्दानाम् [८९] । उच्चारप्रस्रावस्थवतकटगन्धानाम् [९०] । किटकिलिंजकुतपस्पर्शानाम् [९१] । मन आपस्य दुष्कृतम् [९२] । तद्यथा देवनागगन्धर्वयक्षकिन्नरमहोरगत्वख्यापिनाम् [९३] । धनिश्रेष्ठिसार्थवाहादिरूपाणाम् [९४] । वीणादिशब्दानाम् [९५] । अगुरुचन्दनकुंकुमतमालपत्रगन्धानाम् [९६] ।

प्रङ्गपटप्रावरांशुकदुकूलकोट्टम्बकस्पर्शानाम् [७५] । उत्सृष्टसंवेजनार्थताम् [७६] । तस्मात् संवेजनार्थं नरकतिर्यक्प्रेतमनुष्यकथादावन[ा]पत्तिः [७७] ।

॥ [इति] भीषणम् ॥ ६६ ॥

(६७) गोपने ।

इदं प्रव्रज्यासंतकपात्रचीवरपोणिकाकंसिकाकायबन्धनादिश्रामणकजीवितपरिस्कारनिर्दाने [७८] । निर्दापने च [७९] । उत्सृष्टहितकामतया [८०] ।

॥ [इति] गोपनम् ॥ ६७ ॥

(६८) दत्तोपजीवने ।

दत्तस्य भिक्षोर्निर्देयं चीवरस्य विना तदनुज्ञानं परिभोगे [८१] । न चेदस्य तन्निदानं प्रीतेस्सम्भावनम् [८२] ।

॥ [इति] दत्तोपजीवनम् ॥ ६८ ॥

(६९) अस्वाख्याने ।

ध्वंसनच्छन्देन भिक्षोर्विनिधायां संज्ञ संघावशेषापतनस्य विज्ञप्तौ [८३] । लेशेनापि [८४] ।

॥ [इति] अस्वाख्यानप्रायश्चित्तिकम् ॥ ६९ ॥

(७०) स्त्रीसहगमने ।

कामतोऽध्वन्यूढौ [८५] । प्रतिक्रोशम् [८६] । प्रतितदर्द्धं दुष्कृतस्य [८७] । उत्सृज्यातियात्र[य]न्तीम् [८८] । नष्टश्चे(श्चै?)नमध्वनोऽध्वन्यवतारयन्तीम् [८९] । अशक्तस्य वा निर्वोढुम् [९०] ।

॥ [इति] स्त्रीसहगमनम् ॥ ७० ॥

(७१) स्तेयसहगमने ।

ग्रामघातकैश्चौरैः शुल्कभञ्जकैर्वा वणिग्भिः [९१] । कापटिकैः स्तेयप्रव्रजितैः दुष्कृतम् [९२] ।

॥ [इति] स्तेयसहगमनम् ॥ ७१ ॥

(७२) ऊनोपसंपादने ।

ऊनविंशतिवर्षतायामुपसंपाद्यस्य [९३] । उपाध्यायत्वेनोपसंपादने [९४] । नासावेनं पूर्णतां न पृच्छेत् [९५] । नान्ये [९६] । नानि(वि?)ज्ञायैनामुपसंपादयेयुः [९७] । सर्वथा परिपूर्ण(र्ण?)विंशतेरुपसंपा(प?)दो रूढिः [९८] । इतरस्य परिपूर्णसंज्ञतायाम् [९९] । अमत्यस्मि(तिम?)तिविमतिषु च [१००] । ज्ञाने च तद्ध्वंसः [१०१] । न चेदद्दः प्राप्तपूरेः [१०२] । अपि गर्भाधिकमासकैः सावर्धं(?) [१०३] ।

॥ [इति] ऊनोपसंपादनम् ॥ ७२ ॥

(७३) भूम्युद्घाते ।

खननखाननयोः [१०४] । मृद्भुवः [१०५] । मुक्त्वा चतुरङ्गुलमात्रकीलकनिखननं

नवकर्मिकस्य नक्षत्रप्रयोगेनासन्निहितकल्पकारस्य [८५] । जातिक(?)चेत् मौलम् [८६] । न चेद् दुष्कृतम् [८७] । त्रीन् मासान् पर्युषितासंहतिः पूर्वा [८८] । वृष्टिकान्तारं चेत् [८९] । षडन्यदा [९०] । नाभूत्वं(?)कन्यायां मन्येत [९१] । प्रभूत्वे(ते?)न समुदायेषु लक्षणानां प्रमाणकल्पम् [९२] । तस्माद् कार्त्स्न्यमेव सन्यूनान्यत्र वृतायाम् [९३] । नष्टतादग्धत्वे [९४] । अर्द्धत्वं नष्टस्य [९५] । चटितकानां च पृथिवीपर्पटकरूलकन्यातल्लेपानाम् [९६] । गडकवालुकाद्य[ा]धिक्ये [ए]च [९७] । क्रियाणां च [९८] । कीलोत्पाटनलेखकर्पणमृत्कर्णकार्पिगोमयोत्पाटनपंकाकम्पनतल्लप्रगोलाद्युत्पाटनलोणिकाशातनात्मिकानाम् [९९] । विगोपनमतेरन्यैतत् [१०] । तस्माद् गणनन्यसनाद्यभिप्रायस्यानापत्तिः [१०१] ।

॥ [इति] भूम्युद्धातः ॥ ७३ ॥

(७४) प्रवारितार्थातिसेवायाम् ।

नातियाचेत [१०२] । युक्तमनारोचितकालस्य तदसंभावनायां प्रतीष्टभोजनगृहोपसंक्रमणम् [१०३] । उद्योजनं च परिवेषणेऽतिपत्तौ कालस्य [१०४] । न तत्त्वं व्यजनस्याद्रियेत [१०५] । स्वीकुर्यात् प्रत्येकप्रवारणाम् [१०६] । सप्रवारणेऽपि संघे [१०७] । सर्वकालां च [१०८] । विना मर्यादास्थापनेन प्रवारितवतोऽन्यथा पौनःपुन्येनात्यर्थतया चोर्द्ध्वमकृतप्रवारणात् चतुर्थमासपरिसमाप्तेरूर्द्ध्वं प्रज्ञप्ताभ्यवहृतौ [१०९] । विज्ञप्तौ दुष्कृतम् [११०] । अनापत्तिः ग्लान्ये [१११] । ज्ञातो(?)च [११२] । पृथक्त्वं पूर्वस्य विभ्रमात् [११३] । अप्रवारितदोषकारित्वं तस्य [११४] । पुरस्तादपि येन न प्रवारितः [११५] ।

॥ [इति] प्रवारितार्थातिसेवा ॥ ७४ ॥

(७५) शिक्षोपसंहारप्रतिक्षेपे ।

अभिज्ञातायाम् [११६] । आख्यातुः [११७] । शिक्षायाम् [११८] । अस्यान्ते शिक्षितस्य मि(?)त्याख्या दयमानायामुद्देशेन वा भिक्षूणां न शिक्षिष्यामीत्येवत् कारणभावेन निवेदयितुरज्ञतामुत्थापयतो वचनस्योदाहृतौ [११९] । सौत्र्यां दुष्कृतस्य [१२०] ।

॥ [इति] शिक्षोपसंहारप्रतिक्षेपः ॥ ७५ ॥

(७६) उपश्रवगते ।

भिक्षोरधिकरणसंप्रधारणस्य भिक्षुभिरुपश्रुत्यर्थमुत्सृज्योपशमनंच्छन्देनावधाने [१२१] । प्रतिसंवेदनायां शब्दस्य दुष्कृतम् [१२२] । अर्थस्य मौलम् [१२३] । क्षो(?)पकरणप्राह्वये(?)ण चेत् [१२४] । अर्थान्तरवशायामुपश्लिष्टौ चेतनादूर्ध्वम्पदच्छटोत्काशनशब्दादिभिरचेतयतो न चेत् मुग्धः शमार्थी वा नियतमावृतायां पातः [१२५] । न कलिमुपोद्बलयेत् [१२६] । नोपशृणुयात् नैनं कुर्वन्तमनुपरिवात्य तिष्ठेत् [१२७] । नोपशान्त्यै न प्रयतेत [१२८] ।

॥ [इति] उपश्रवगतम् ॥ ७६ ॥

(७७) सामग्रीभङ्गे ।

ज्ञस्यादिकर्मणि संनिपतितस्यानवलोक्य भिक्षुं प्रक्रान्तौ श्रवणोपविचारातिक्रमे मूलम् [१३०]। पुरस्ताद् दुष्कृतम् [१३१]। विनार्थेन युक्तेनार्थेनापक्रान्तौ [१३२]। कृतत्वे ज्ञप्तेः [१३३]। अधर्म्येऽर्थे च कर्मणः [१३४]। श्रवणदेशानतिक्रमेच्छायामनापत्तिः [१३५]।

॥ [इति] स[र]मग्रीभङ्गः ॥ ७७ ॥

(७८) अनादरवृत्ते ।

स्थानगमनशयनासनविहारग्रहणभीप(?)तद्विपर्ययादेरुपनीतस्यार्थस्यानादराद् विना धर्म्यसंज्ञप्तिदाने व्यतिक्रान्तौ [१३६]। भिक्षुसंघेन मौलम् [१३७]। आचार्योपाध्यायैर्दुष्कृतम् [१३८]। अधर्म्यत्वे ज्ञप्तेः तत्त्वं कथावपातनस्य [१३९]। सुखं संघस्य तद्व्यवहारकः [१४०]। संघवद् बुद्धः [१४१]। न राजार्हत्संघस्थविराणामाज्ञां कोपयेत् [१४२]।

॥ [इति] अनादरवृत्तम् ॥ ७८ ॥

(७९) मद्यपाने ।

पाने मदनीयस्य [१४३]। च्युतिरस्य तत्त्वात् क्वाथे [१४४]। विद्यते खोलवकसमक्षणे तत्प्रवेशः [१४५]। अर्द्धत्वं किण्वपिण्डिकायाम् [१४६]। मदनीयानां मूलगण्डपत्रपुष्पफलानां मद्यगन्धरसानां वा मदयितॄणां पेयानाम् [१४७]। निर्दोषो वर्णमात्रेण मद्यस्य सदृशम् [१४८]। प्रयोगवद् गण्डूषधारणगात्रप्रक्षणे [१४९]। ग्लान्येनापत्तिः [१५०]।

॥ [इति] मद्यपानम् ॥ ७९ ॥

(८०) अकालचर्यायाम् ।

अकालतायाम् [१५१]। अनवलोकितसद्भिक्षोः [१५२]। ग्रामप्रवेशे [१५३]। न चेदत्यात्ययिककार्यसन्निपातः [१५४]। अन्यत्र सञ्चारेऽत्र दुष्कृतम् [१५५]। अभावेऽत्र भिक्षोस्तद्वद् भिक्षुणी [१५६]। अस्याः श्रामणेरः [१५७]। अस्य शिक्षमाणा [१५८]। तस्याः श्रामणेरी [१५९]। असत्त्वमवोद्धुः [१६०]। सीमान्तरस्योत्क्षिप्तान्यपक्षाणां च [१६१]। ऋद्ध्या त्वनापत्तिः [१६२]।

॥ [इति] अकालचर्या ॥ ८० ॥

(८१) कुलचर्यायाम् ।

चतुर्थादावकाले कुलोपक्रसंमणे [१६३]। तन्मुखिकया च संघोपनिमन्त्रणेनासदनागमनवशात् परिक्षेपोऽतिपात्य इत्यपरिप्राप्य दातरि तृतीयप्रभृतौ [१६४]।

॥ [इति] कुलचर्या ॥ ८१ ॥

(८२) राजकुलरात्रिचर्यायाम् ।

अप्रमीतत्वे [१६५]। अन्त्यारुणस्यैतदत्रानुद्गतत्वम् [१६६]। अन्तःपुरनिवासस्थान-

सम्बद्धतायाम् [६७]। अतदा प्रस्तुतायामपि [६८]। प्रतिरात्रि [६९]। तत्कीलोपविचारान्तोऽतदादिः [१७०]। एवं राजकुलनगरयोः [७१]। राजकुलस्थानेन च [७२]। नागरेण दुष्कृतम् [७३]। तदर्थता चेत् [७४]। द्वितीयं चेदत्रापद्यम् [७५]। न चेद् राजदेविकुमारामात्यान्तरायविनयननशेन [७६]। नानुश्राव्य राजकुलं प्रविशेत् [७७]।

॥ [इति] राजकुलरात्रिचर्या ॥ ८२ ॥

(८३) शिक्षापदद्रव्यताध्याचारे।

वर्त्तमाने प्रातिमोक्षोद्देशेऽनुभूततद्वस्तासंविग्नेन मनसा संप्रति मया ज्ञातमयमप्यत्र धर्मो विधत इत्यस्योक्तौ [७८]। अन्यव्यञ्जनेनोद्देशे साधारणीं प्रति दुष्कृतम् [७९]। मैत्र्यां च नोक्ता भाषमाणायाम् [१८०]। अनापत्तिरसाधारणी [८१]। असत्कृत्य प्रातिमोक्षोद्देशश्रुतिमुपनयन्तं संवेजयेयुः [८२]।

॥ [इति] शिक्षापदद्रव्यताध्याचारः ॥ ८३ ॥

(८४) सूचीगृहकसंपादने।

दन्तास्थिविषाणमयसूचीगृहककरणकारणम् [८३]। कृतलाभपरिभोगयोरनापत्तिः [८४]। नापृष्टाभिन्नता देशनां प्रतिगृह्णीयात् [८५]। अदेशितत्वमभित्वा चेत् [८६]। उत्तरेष्वप्येतत् पञ्चप्रच्छेदोपसंहितम् [८७]। उद्दा(?)लेन द्वितीये [८८]।

॥ [इति] सूचीगृहकसंपादनम् ॥ ८४ ॥

(८५) पादकसंपादने।

न विकटपादिकायां खट्वायां शयीत [८९]। न शय्यास्थानगतमञ्चानुपहिते प्रदेशे पादौ प्रक्षालयेत् [१९०]। सन्निहितपदत्राणः [९१]। अन्यश्च मुक्त्वा शिरःपादान्तौ [९२]। नोच्चशयनमहाशयने निषीदेन्निपद्येत [९३]। कुर्वीतासम्भवेऽन्यस्य पूर्वमन्तर्गृहे [९४]। कल्पेत सप्रतिपादके शय्याम् [९५]। न पीठातिपीठे निषीदेत् [९६]। प्रमाणादूर्ध्वं करणकारणे [९७]। परेषु च द्वितीयात् त्रिषु [९८]। मञ्चपीठयोः सांघिकयोः [९९]। उत्तरे च [२००]। पादकानां [१]। हस्त एष माटनिकाप्रदेशवर्ज्यानां प्रमाणम् [२]। सौगततृतीये [३]। उत्तरेषु च [४]।

॥ [इति] पादकसंपादनम् ॥ ८५ ॥

(८६) अवनाहे।

तूलेनोपनाहे [५]। पञ्च तूलानि शाल्मलमार्कं कार्पासमयं बौकमैरकं च [६]।

॥ [इति] अवनाहः ॥ ८६ ॥

(८७) निषदनगते।

निषदनस्य प्रमाणमस्य दैर्घ्यस्य हस्तत्रयम् [७]। अध्यर्द्धाद्योर्ध्वमकारयतः [८]।

विस्तारस्य हस्तद्वयं पङ्गुलयः [९] । दुष्कृतमस्य न्यूनस्याधिष्ठानम् [१०] । उत्तरस्य च द्वयस्य [११] ।

॥ [इति] निषदनगतम् ॥ ८७ ॥

(८८) कण्डूप्रतिच्छादने ।

कण्डूप्रतिच्छादनस्य [१२] । पट्कं हस्तानां त्रयम् [१३] ।

॥ [इति] कण्डूप्रतिच्छादनगतम् ॥ ८८ ॥

(८९) वर्षाशाट्याम् ।

वर्षाणा(शा)ट्याः [१४] । नवकं त्रयमष्टाङ्गुलयः [१५] ।

॥ [इति] वर्षाशाटीगतम् ॥ ८९ ॥

(९०) सुगतचीवरे ।

पञ्चत्रिकं शास्तुः स्वहस्तेन चीवरम् [१६] । तत्प्रमाणस्यातत् त(तिं?)नोर्द्धं वा चीवरस्य करणकारणे [१७] । नैतद् वारयेत् [१८] ।

॥ [इति] सुगतचीवरगतम् ॥ ९० ॥

॥ शुद्धप्रायश्चित्तिकानि समाप्तानि ॥

§ ५, प्रातिदेशनीयम् ।

अज्ञातिकायाम् [१९] । भिक्षुण्याः [२०] । स्वप्रतिपादितस्यापरिवेषेण स्वयं ग्रामस्थेन प्रतिगृह्य खादनीय-भोजनीयस्याभ्यवहारे [२१] । न वर्षकस्य ग्राम्यत्वम् [२२] । न भिक्ष्वावासस्य [२३] । अर्द्धत्वमाकाशस्य [२४] । नासन्निधौ निक्षेपुरादानं निक्षिप्तस्य तस्मात् [२५] ।

॥ [इति] भिक्षुणीपिण्डकग्रहणं नाम प्रथमं प्रातिदेशनीयम् ॥ १ ॥

खाद्यमिह देहि पानकं भोजनं भूयः चेत्यादि तस्मिन् भिक्ष्वन्तरे वा व्यपदेशप्रवृत्तभिक्षुण्यवस्थापनकर्तृ [२६] । न चेत् तन्मुखिकया तज्जातिना वा निमन्त्रणकम् [२७] । उत्सृज्य गन्तृव्यपदेशमदत्तदापनं च [२८] । आगमयस्व तावद् भगिनि यावद् भिक्षवो भुञ्जते इत्यनाज्ञप्तायां तस्यां भिक्षुणा येन केनचिदसहभुजा पितृप्रभृतिभिक्षुनिमन्त्रणकभुक्तौ [२९] । कुले [३०] । उपचारप्राप्तं चेत् सावचनस्य मौल्याः [३१] । न चेद् दुष्कृतस्य [३२] । तता (तोऽ?) त्राज्ञप्ततायां व्यवस्थापनम् [३३] । तस्मात् प्रश्नायोत्सुक्यमापद्येत [३४] । वृद्धाप्रवृत्तावत्र नवकः प्रवर्तेत [३५] ।

॥ [इति] पंकेति(क्ति?) वैषम्यवादानवारितत्वे भुक्तिद्वितीयं प्रातिदेशनीयम् ॥ २ ॥

श्राद्धस्य विघातश्चेदस्य दाने कुलशिक्षासंवृत्तिं दद्युः [३६] । प्रज्ञप्तया प्रतिप्रश्रब्धमर्थं च [३७] । दत्तैतदश्चितं बुद्ध्वा निवेशनगमनासनपरिभोगधर्मदेशनानि

कुर्यात् [८८] । न रिक्तपात्रः प्रविशेत् [८९] । दद्यादस्य याचमानेभ्यो बालेभ्यः पिण्डपात्रात् पूपिकामसकलाम् [९०] । अर्थिनि प्रतिप्रश्रम्भणम् [९१] । दत्ताशिक्षासंवृतेः कुलात् प्राकृतदानादनिमन्त्रितश्च प्रतिगृह्य खादनीयभोजनीययोरुत्सृज्य कर्कटिकामूलकहरितकमविघात्यभ्यवहृतौ [९२] ।

॥ [इति] कुलशिक्षाभङ्गप्रवृत्तिः तृतीयं प्रातिदेशनीयम् ॥ ३ ॥

सम्मन्येरन् वनप्रतिसंवेदकः भिक्षुः [९३] । अर्धयोजनमसौ समन्ततः प्रत्यवेक्षेत [९४] । सभयतायां धूमं कुर्यात् [९५] । पताक[i] उत्स(च्छ?)येत् [९६] । पत्रवैभङ्गुकानि मार्गे स्थापयेत् [९७] । दद्युरस्मै सत्यार्थिकत्वे पुरोभक्तिकाम् [९८] । सहायकः [९९] । वृत् । अप्रतिसंवेदिततायां वनस्य [१००] । अरण्ये बहिरारामस्य प्रतिगृह्य खादनीयभोजनीयं चाभ्यवहरेत् [१०१] । अर्धकृत्यं दक्षासम्वादे [१०२] । अन्यत्र च भयस्थानाद् वर्तमानतायाम् [१०३] ।

॥ [इति] वनविषयगतं चतुर्थं प्रातिदेशनीयम् ॥ ४ ॥

॥ समाप्तानि च प्रातिदेशनीयानि ॥

§ ६, क्षुद्रशिक्षापदानि ।

तथा निवसनं निवसीत यथा परिमण्डलं संस्थितं स्यात् [१०४] । न चात्युत्कृष्टन्नात्यपकृष्टम् [१०५] । नांशेन शुण्डावलम्बितम् [१०६] । नोद्धतम् [१०७] । न फणवत् प्रत्यागतम् [१०८] । न सम्वर्त्तिकया स्थितम् [१०९] । तथा चीवरं प्रावृण्वीत यथाऽस्याद्यं त्रयं स्यात् [११०] । सुसंवृतोऽन्तर्गृहं गच्छेत् [१११] । सुप्रतिच्छन्नोऽल्पशब्दोऽनुत्क्षिप्तचक्षुः युगमात्रदर्शी [११२] । नोद्गुण्ठिकयाकृतिकया नोत्कुटिकया [११३] । न वितस्तिकया [११४] । न पर्यस्तिकया [११५] । नोत्टङ्किकया [११६] । नोजङ्घिकया [११७] । नो लङ्घिकया [११८] । नोत्कुडुकिकया [११९] । न स्तम्भाकृता [१२०] । न कायप्रचालकम् [१२१] । न बाहुप्रचालकम् [१२२] । न शीर्षप्रचालकम् [१२३] । नांसे ढौकिकया [१२४] । न हस्तसंस्थाग्नि(लि?)कया [१२५] । नात्रानुज्ञाता त आसने निषीदेत [१२६] । नाप्रत्यवेक्ष्य [१२७] । न सर्वकायं समवधाय [१२८] । न सक्थिनि सक्थि [१२९] । न गुल्फे गुल्फम् [१३०] । न संक्षिप्य पादौ [१३१] । न विक्षिप्य [१३२] । न विडङ्गिकया [१३३] । न करे कपोलं दत्त्वा [१३४] । न प्रतिपुटकमासनमुत्सर्पयेत् [१३५] । सर्वं सत्कृत्य पिण्डपातं प्रतिगृह्णीयात् [१३६] । न समतित्तिकम् [१३७] । समस्तूपिकम् [१३८] । सावदानम् [१३९] । नानागते खादनीये भोजनीये पात्रमुपनामयेत् [१४०] । नोपर्यस्य धारयेत् [१४१] । सत्कृत्य पिण्डपातं भुञ्जीत [१४२] । नातिक्षुद्रकैरालोपैः [१४३] । नातिमहद्भिः [१४४] । नानागत आलोप मुखद्वारं[वि]-

वृष्णीत [८५] । न भूयस्कामतयौदनेन सूपिकं सूपिकेन चौदनं प्रतिच्छादयेत् [८६] । नचुचुकारम् [८७] । न थुत्थुकारम् [८८] । न सुस्सुकारम् [८९] । न सालोपेन मुखेन वाचं निश्चारयेत् [९०] । न सित्थपृथक्कारं [९१] । नावर्णकारम् [९२] । न गल्लापहारम् [९३] । न कवडच्छेदम् [९४] । न जिह्वास्फोटनिश्चारं [९५] । न स्तूपाकृत्यवमर्दम् [९६] । न हस्तपात्रावलेहसनधून(?)संतोलम् [९७] । पात्रसंज्ञी [९८] । नावध्यानप्रेक्ष्यन्तरिकस्य भिक्षोः पात्रमवलोकयेत् [९९] । न सामिषेण पाणिनोदकस्थालकं प्रतिगृह्णीयात् [१००] । न सामिषेणोदकेनान्तरिकं भिक्षुं सिञ्चेत् [१०१] । नैतदन्तर्गृहे छोरयेदनवलोक्य गृहपतिम् [१०२] । न पात्रेण विघसं छोरयेत् [१०३] । त्रिः प्रक्षाल्य पात्रमार्पिभिर्गाथाभिरभिमन्त्र(न्त्र्य?)पादोदकं दद्यात् [१०४] । नानास्तीर्णे पृथिवीप्रदेशे पात्रं स्थापयेत् [१०५] । नोत्थितो निर्मादयेत् [१०६] । नास्यैतदुभयमतटो(?) कुर्यात् [१०७] । न प्रपातेन प्राग्भारेण न चतुष्पथे [१०८] । नानुश्रो(स्रो ?)तोनेन नद्याहार्यहारिण्याः पानीयं गृह्णीयात् [१०९] । प्रागुच्चारप्रस्रावादग्लानाय [११०] । तत्राग्लानः [१११] । नोत्थितो निपण्णाय धर्मं देशयेत् [११२] । न निपण्णो निपन्नाय [११३] । न नीचतरासने निपण्ण उच्चतरके निपण्णाय [११४] । हीनप्रणीतोऽप्येते [११५] । न पृष्ठतो गच्छन् पुरतो गच्छनेते(?) [११६] । नोत्पथेन पथम् [११७] । नोद्ग्रन्थिकादिकृताय [११८] । न हस्त्यश्वयानशिबिकामञ्चपादुकारूढाय [११९] । न खोलामौल्युष्णीषवेष्टितमालाशिरसे [१२०] । न छत्रदण्डशस्त्रखड्गायुधपाणये [१२१] । न सन्नद्धाय [१२२] । नोत्थित उच्चारप्रस्रावं कुर्यात् [१२३] । न हरिते पृथिवीप्रदेशे [१२४] । न छोरयेत् [१२५] । खेटसिंघानकवान्तं रिक्तञ्च [१२६] । नोदके [१२७] । न पुरुषदण्डादूर्ध्वं वृक्षस्याधिरोहेदन्यत्रापदः [१२८] ।

अथ भिक्षुणीविभंगः । पाराजयिकम् ।

प्रागापत्तियोगे वचनाद् भिक्षुण्याम् [१२९] । चतुष्टयं स्वीकारे [१३०] । चक्षुर्जान्यन्तरालेन [१३१] । स्पर्शस्य [१३२] । पुंसः [१३३] । मैथुनरागेन [१३४] । अङ्गान्तरेण [१३५] । स्थूलम् [१३६] । हासोऽन्येन चेतसा [१३७] । पुंसश्चेत् तदानीं तत्र विज्ञायमानं तथैतत् [१३८] । न चित्ततोऽपि [१३९] । अनापत्तिरस्वीकृतौ [१४०] । अदुष्टं पुत्रस्पर्शनम् [१४१] । न बालमप्यन्यत्र स्पृशेत् [१४२] । प्रतिबलत्वे सेवायां पुंस[:]कामोपसंहिते [१४३] । तद्गतार्थपरिज्ञाने वाचि परिपूर्णकारित्वम् [१४४] ।

॥ [इति] स्पर्शपाराजयिकम् ॥ १ ॥

पञ्जरोपनिक्षेपे [१४५] । रक्तया [१४६] । प्रत्युपस्थितं सेवायां रक्तं तस्यां पुमांसं तत्प्राप्यतायाम् [१४७] । औद्धत्यस्य रक्तेन सार्द्धं रक्तया करणे स्थूलम् [१४८] । द्रव्यस्य कार्पस्य [१४९] । उद्देशस्य [१५०] । अत्र प्रतीष्टौ च [१५१] । संकेतस्य [१५२] । निमित्तस्य [१५३] । आगमनगमनप्रवृत्तस्य चास्य [१५४] । स्वीकारे [१५५] ।

॥ [इति] पञ्जरोपनिक्षेपपाराजयिकम् ॥ २ ॥

पाराजयिकस्य भिक्षुण्याः प्रतिच्छादने [६५] ।

॥ [इति] प्रतिच्छादनपाराजयिकम् ॥ ३ ॥

निश्चितस्यावसारणयाञ्चायामुत्क्षिप्तस्य [६६] । भिक्षोः कृतावन्दनार्हसंवृतः (?) ज्ञात्वाऽन्तो निवारकत्वस्य प्रतिनिःसर्गे [६७] । परकन्त(?)त्वस्येव भेदेन [६८] ।

॥ [इति] निवारणपाराजयिकम् ॥ ४ ॥

सघावशेषा. ।

संचारित्रम् [६९] । आगारिकत्वे भिक्षुण्याः प्रलोभनं स्थूलम् [७०] । वेशस्य चान्यया वाहने [७१] । नातः पण्येन दास्याः प्रेषणस्य बहिर्भावः [७२] ।

॥ [इति] भिक्षुणीसांचारित्रसंघावशेषः ॥ १ ॥

अमूलकलेशिके [७३] । पुंस्त्वेऽस्तित्वमत्र पुंस्त्वम् [७४] । किञ्चित्कस्वीकारे [७५] । रक्तया [७६] । पुरुषात् [७७] । रक्तादरक्ताच्च [७८] । अरक्तया स्थूलम् [७९] । दुष्कृतमरक्तात् किञ्चित्कग्रहः [८०] । न रक्तादरक्तायाः किञ्चित्कस्वीकारे दोष इति भिक्षुणीबोधने [८१] ।

॥ [इति] किञ्चित्कग्रहसमादापनम् ॥ २ ॥

चतुर्षु उत्तरेषु विना भिक्षुण्याः [८२] । न तृतीयत्वं शिक्षमाणत्वं तृतीयोंशः श्रामणेरी [८३] । निर्दोषः कामविप्रयोगः [८४] । अन्तरायापातवशतया च [८५] । प्रयोगत्वं प्राच्यन्ततः काले गतस्य [८६] । अस्तङ्गमान्तो दिवसान्तः [८७] । रात्रौ बहिर्वर्षकाद् भावे [८८] ।

॥ [इति] रात्रिविप्रवासः ॥ ३ ॥

दिवा [८९] । चीव(विच)रेदेकाकिनी ज्ञातिगृहभुक्तिनिमित्तं दुर्भिक्षे लब्धायां ज्ञातिभिस्सार्द्धं सम्बन्धोपविचारसंवृतौ [९०] । दद्युरेनाम् [९१] ।

॥ [इति] दिवाविप्रवास. ॥ ४ ॥

। अग्रप्रतिपत्तौ [९२] । अध्नावतारः [९३] । नदीपारसन्तरणे [९४] । पारप्राप्तौ बाहुभ्याम् [९५] । स्थूलमर्वाक् [९६] । दुष्कृतं कुल्यापारस्य [९७] ।

॥ [इति] नदीलङ्घनम् ॥ ५ ॥

प्रव्राजने [९८] । गणसंमतस्वामी परित्यक्तराजा स्वानुज्ञतायाः [९९] । मारणं प्रति [१०] । उपाध्यायिकत्वेन [१] । जानन्त्येतत् [२] ।

॥ [इति] प्रव्राजनम् ॥ ६ ॥

मृतधनोद्ग्रहणे [३] । अनापत्तिः सांघिकस्य [४] । अल्पायासेन चेत् [५] ।

॥ [इति] उद्ग्रहणम् ॥ ७ ॥

बहिःसीम्न्यवसारणे [७]।

॥ [इति] अवसारणम् ॥ ८ ॥

रत्नप्रत्याख्यानमिदं तुल्यत्वमन्यश्रमणानां तत्र ब्रह्मचर्यं चरिष्यामित्यस्या-वचनप्रवृत्तेरविरतौ [८]। संघभेदप्रवृत्तेरिव [९]। उत्तराद्यश्च [१०]।

॥ [इति] प्रत्याख्यानम् ॥ ९ ॥

छन्दादिगामितानुयुक्ते भिक्षुणीनाम् [११]। कलहभण्डनविग्रहविवादाद् भिक्षुणीभिः सार्द्धं विचारणम् [१२]।

॥ [इति] कलहवृत्तम् ॥ १० ॥

संसृष्टविहृतौ भिक्षुण्याः [१३]। औद्धत्यद्रवकातर्यहेतुभूतयोः [१४]।

॥ [इति] स्त्रीसंसर्गगतम् ॥ ११ ॥

तत्संसर्गसमादापने [१५]।

॥ [इति] समादापनम् ॥ १२ ॥

संघभेदादेश्चतुष्टया[द्] भिक्षुणी(?)गतात् [१६]।

॥ [इति] संघभेदादिचतुष्टयम् ॥ १३-१६ ॥

॥ [इति] संघावशेषः समाप्तः ॥

नैस्सर्गिकाः।

जातरूपरजतरूपिकक्रयविक्रयं नहनतत्रवायद्वयाछेद(?)परिणमनसन्निधिगतं च [१७]।

॥ [इति] जातरूपरजतादिदशकम् ॥ १-१० ॥

भिक्षोर्धावनादावतः प्रतिग्रहे [१८]।

॥ [इति] प्रतिग्रहः ॥ ११ ॥

भिक्षुण्यै दत्त्वा [१९]। न देवच्छन्दं धारयेत् [१०]। अतिरेकपात्रस्यैकाहा[द्] ऊर्ध्वं धारणे [११]।

॥ [इति] पात्रधारणम् ॥ १२ ॥

प्रत्यर्द्धमासमार्येऽहन्यनधिष्ठितावाधिष्ठानिकस्य [१२]।

॥ [इति] अनधिष्ठानम् ॥ १३ ॥

फल्गुनान्त्यदिवसादर्वाक् कठिनोद्धारे [१३]। अनापत्तिश्चिरमुषितक-भिक्षुण्यर्थतायाम् [१४]।

॥ [इति] कठिनोद्धारः ॥ १४ ॥

अनुद्धारे [१५]। तत् [१६]।

॥ [इति] कठिनानुद्धारः ॥ १५ ॥

हिरण्य-सुवर्णविज्ञपने [१७]।

॥ [इति] रत्नविज्ञपनम् ॥ १६ ॥

अन्यार्थं लब्धस्य चीवरस्यामिषीकृत्याभ्यवहरणार्थमधिष्ठानम् [१०] ।

॥ [इति] चीवरभक्षणगतम् ॥ १७ ॥

चीवरशयनासनवर्षकार्थश्च [११] । यस्य कस्य चित् [११०] ।

॥ [इति] चीवरादिभक्षणगतम् ॥ १८ ॥

भिक्षुणी महाजनार्थं समादाप्य स्वत्र(तः?) परिणमनम् [११] ।

॥ [इति] महाजनोद्देशिकाधिष्ठानम् ॥ १९ ॥

संघार्थश्च [१२] ।

॥ [इति] संघोद्देशिकाधिष्ठानम् ॥ २० ॥

वचनस्वीकारार्थं बद्धस्यार्थस्य मोचने [१३] ।

॥ [इति] मोचनम् ॥ २१ ॥

पलशतिकेऽद[दो ?] विंशतिकार्षापणादिमूल्यस्य वाससः स्वीकारैः(रे?) [१४] ।

॥ [इति] गुड(?)वस्त्रसंभजनम् ॥ २२ ॥

पञ्चपलिकपर्यन्तस्य च [१५] ।

॥ [इति] लघुवस्त्रसं(स्त्रसं)भजनम् ॥ २३ ॥

॥ नैसर्गिका. समाप्ता ॥ * ॥ द्विसप्तति॰ ॥

शुद्धकप्रायश्चित्तिकम् ।

असम्मतादिदशकनिष्कर्षणपरंपरप्रणीतनिपद्यास्थानात् न प्रत्युद्धृतौ [१६] ।

॥ [इति] शाटीगतवर्जम् ॥ १ ॥

कल्पिकं भिक्षोरामिषमो(षो ?)पसंहरणं प्रव्रजितायै [१७] । पत्नीचरितत्वेऽपि [१८] । ग्रहणं च तस्याः [१९] । न स[ह]शय्यायाममहतः पुत्रस्य वर्ज्यत्वम् [११०] । लब्धसंवृतेः [११] । दानमस्याः [११२] । प्रव्राजनोपसंपादनयोः [११३] । अपरिपूर्णद्वादशवर्षतायाम् [११४] । आत्मोपसम्पन्नतायाः [११५] । ऊनोपस्थानम् [११६] । दद्युः पर्षदनलपर्षदुपस्थापनसंवृती [११७] । प्रतिबलायै तदुपस्थापने [११८] । पूर्णतायां द्वादशत्वस्योपसंपद् वर्षाणाम् [११९] । नान्या याचेत [१२०] । अलब्धप्राक् संवृतेः पर्षदुपस्थापने [१२१] ।

॥ [इति] अलब्धसंवृत्युपस्थापनम् ॥ २ ॥

अभितपर्षदः परस्याम् [१२२] । ऊनलोपस्थापनम् [१२३] । उपसंपादने द्वादशवर्षत्वादर्वाक् परिणीतायाः [१२४] ।

॥ [इति] ऊनद्वादशवर्षोपसंपादनम् ॥ ३ ॥

विंशतेरन्यस्याः [१२५] ।

॥ [इति] ऊनविंशतिवर्षोपसंपादनम् ॥ ४ ॥

उपाध्यायिकत्वेनादत्तशिक्षयोः [१२६] । पर्वलंघने [१२७] । अचरितत्वेऽस्याः [१२८] ।

[॥ इति] अशिक्षितशिक्षोपसंपादनम् ॥ ५ ॥

चरिततायां नो [illegible] ।

॥ [इति] चरितशिक्षानुपसंपादनम् ॥ ६ ॥

स चेन्मे चीवरं ददासि ततः स्वोप(त्वामु?)पसंपादयामीत्युपसंपत्प्रेक्षयाचने [illegible] ।

॥ [इति] धर्मपणनम् ॥ ७ ॥

प्रव्राजनानुकूल्यसंदर्शनेन संक्षेप्य गृहविस्तरमप्रव्राजने [illegible] ।

॥ [इति] विप्रव्राजनम् ॥ ८ ॥

प्रव्राजनेऽनुवर्षम् [illegible] । सन्तानव[ा]हुल्यम् [illegible] । अननुज्ञातायाः स्वामिना [illegible] ।

॥ [इति] अननुज्ञातोपसंग्रहः ॥ ९ ॥

व्यभिचारिण्याः [illegible] । गर्भिण्याः [illegible] । शोकहतायाः [illegible] । भण्डनकारिण्या उपसम्पादनेऽपि [illegible] ।

॥ [इति] स्वापक्षालोध्वं(?)संग्रहगतम् ॥ १० ॥

प्रव्राजितोपसम्पादितयोरनुपग्रहे [illegible] । अनपकर्षणेऽन्तरायदृष्टौ [illegible] । अशिक्षणे [illegible] । अनुपस्थापने ग्लानयोः [illegible] । सान्तेवासिन्योः [illegible] ।

॥ [इति] अध्युपेक्षणगतम् ॥ ११ ॥

स्वयं सेव्ये जतुलोठकस्यान्तरा धारणे [illegible] । न प्रतिस्रोतो व्यायच्छेत [illegible] । न योनद्वारे शुक्रं प्रतिक्षिपेत् [illegible] । न चर्मपट्टेन पार्श्वबन्धनं कुर्वीत [illegible] । न वेमपट्टेन स्तनयोः [illegible] । न सुगतान्तरायेनान्तरणम् [illegible] । निदर्शनमेतत् [illegible] ।

॥ [इति] अनङ्गसेवा ॥ १२ ॥

अङ्गुलिपर्वद्वयादूर्ध्वं व्यञ्जनस्यान्तःशोचने [illegible] । अनङ्गमेव प्रतिकृतिः [illegible] । पाणितलघातस्यात्र दाने [illegible] ।

॥ [इति] अनङ्गसेव[ा]विधिव्यावाधवृत्तम् ॥ १३ ॥

रोमापनीतेरतः करणकारणयोः [illegible] ।

॥ [इति] सेव्योपकल्पनम् ॥ १४ ॥

गृहिणा सार्द्धं स्थितौ प्रतिच्छन्ने [illegible] । कुड्यवाटवस्त्रगहनान्धकारैरेतत्वं संपत्तिः [illegible] । भिक्षुणा [illegible] । अभ्यवकाशे पूर्वेण [illegible] । उत्तरेण [illegible] । ऊनापत्तिः सद्वितीयतायामस्य [illegible] । सपश्चात्सच्छूमणिकात्वे भिक्षुण्याः [illegible] । गृहिण उपकर्णकेन सन्देशदाने [illegible] । गृह(हि?)णेऽस्यैव मतः [illegible] । भिक्षोः [illegible] । अतथ [illegible] । विद्योद्ग्रहणे गृहिणः [illegible] । पाठनेऽस्यास्याः (?) [illegible] । वधवध(?)-व्रणमोचने [illegible] । व्याजेन [illegible] । तस्मादनापत्तिः भूततायामर्थस्य [illegible] ।

॥ [इति] असंस्पर्शिसंसर्गगतानि ॥ १५ ॥

सन्तानधारणे [illegible] ।

॥ [इति] प्रसवाभिष्वङ्गः ॥ १६ ॥

गृहस्वामिनमनवलोक्यान्तर्गृहे रात्र्यतिनमने [illegible] । अनापत्ति(ः) रुग्णीनतायां

तदवलोकने [११] । रात्रेरप्रत्यवेक्ष्य प्रतिच्छन्नेऽतिनामनम् [१२] । लयने विना परया भिक्षुण्या [१३] । अनापत्तिः हतादित्वे(?)ऽस्याः [१४] । अवष्टम्भायतद्वारपरिहरणानि [१५] । संस्पृष्टशय्याकल्पने [१६] । अनापत्तिरनया सार्द्धमनेकयापि कृतावरणतायां वृश्या(?)दिनोपस्थितस्मृतिरनास्वादनेऽङ्गसंस्पर्शस्याचलमश्चे प्राकृते संस्तरे वा [१७] । दुष्कृतं संभवे [१८] ।

॥ [इति] संभोगसंवासप्रतिक्षेपः ॥ १७ ॥

कारणे भिक्षुण्या स्वाङ्गोद्वर्तनस्य शिक्षमाणया [१९] । श्रामणेरिकया गृहिण्या [२०] । तीर्थ्यया [२१] । उत्कुटिकाकारणे [२२] । सुगन्धद्रव्यैः स्वाङ्गोद्वर्तने [२३] । पिण्याकेन [२४] ।

॥ [इति] परिकर्मगतम् ॥ १८ ॥

स्नाने हस्तसंलग्नकया [२५] ।

॥ [इति] जलसम्भोगः ॥ १९ ॥

प्रसाधनार्थं निमुक्तावुशीरस्य [२६] । फणकूर्च्या(?)स्यप्रतिशीर्षकाणाञ्च [२७] । गृहालंकारप्रावृतौ [२८] ।

॥ [इति] प्रसाधनगतम् ॥ २० ॥

नृत्तो(त्ते?)येन केनचिदङ्गेन [२९] । गाने [३०] । यत्र तत्र तदभिप्रायेण स्वरविकारे [३१] । वादने वादित्रस्य [३२] ।

॥ [इति] उद्धर्षगतम् ॥ २१ ॥

छत्रस्य परिभोगभूते धारणे [३३] । उपानहोश्च [३४] । अनापत्तिः वर्षके शयनासनगुप्त्यर्थम् [३५] । आसन्दी परिचर्ययोः प्रत्यनुभवने [३६] ।

॥ [इति] लीलावितत्वगतम् ॥ २२ ॥

निषादेऽननुज्ञातेऽन्तर्गृहमासने [३७] ।

॥ [इति] प्रागल्भ्यानुप्रस्कन्दनम् ॥ २३ ॥

परिभुज्य धर्मश्रवणदानावस्थायागारिकशयनासनमुत्सृज्यानवलोक्य गृहिणे प्रक्रमणे [३८] । त्यक्तिरस्योपविचारस्य पर्यन्तः [३९] ।

॥ [इति] विप्रवादनम् ॥ २४ ॥

कर्त्तने सूत्रस्य [४०] । अनापत्ति[:?]लोठकाप्तुश्च(?) कस्यार्थे प्रतिगुप्ते प्रदेशे [४१] । स्वीकारे भिक्षुणीगणचीरस्य [४२] । कृतावामिषविक्रयस्य [४३] । गृहव्याकुलिकायाश्च [४४] । न मद्यकर्म कुर्यात् [४५] । न पानागारं वाहयेत् [४६] । पक्तावामस्य [४७] । अनापत्तिः भिक्षुसंघस्य आचार्यसब्रह्मचारिणामर्थे प्रतिगुप्ते प्रदेशे [४८] ।

॥ [इति] गृहिणीशिल्पगतम् ॥ २५ ॥

भुक्तवत्त्वेऽप्युत्वासनादभ्यवहारे [४४] ।

॥ [इति] लेहड(?)वृत्तम् ॥ २६ ॥

लसुनस्य [४५] ।

॥ [इति] असभ्यगन्धोपभोगः ॥ २७ ॥

रजश्चोडस्यानाधारणे [४६] । सूत्रके नास्य बद्धस्यावस्थापनम् [४७] । क[ा]लानुकालमस्य शोचनं रञ्जनञ्च [४८] । [उ]दकशाटिकायाञ्च [४९] । धारयेद्देने [५०] । धावकेन चीवरधावने [५१] ।

॥ [इति] शुक्तिभङ्गगतम् ॥ २८ ॥

दाने श्रमणचीवरस्यागारिकायावगुंठनार्थम् [५२] ।

॥ [इति] धर्मध्वजानादरगतम् ॥ २९ ॥

भिक्षुणा सार्द्धं संघाट्याः परिवर्तने [५३] ।

॥ [इति] ध्वजपरिवर्तनगतम् ॥ ३० ॥

वर्णमात्सर्यकरणे [५४] । कुलावासलाभधर्ममात्सर्याणाञ्च [५५] ।

॥ [इति] मात्सर्यगतम् ॥ ३१ ॥

निष्कासने भिक्षुणीवर्षकात् [५६] । यथातथा भिक्षुण्याः [५७] । पूर्वोपगतायाश्चान्तर्गृहात् [५८] ।

॥ [इति] निष्कर्षणगतम् ॥ ३२ ॥

चोदने दुर्दृष्ट्यादिना [५९] ।

॥ [इति] विहेठनगतम् ॥ ३३ ॥

शपथकरणे [६०] ।

॥ [इति] विपर्ययोर्दर्शनगतम् ॥ ३४ ॥

व्यथने क्रोधेनात्मनः [६१] ।

॥ [इति] अधीरवैकृतम् ॥ ३५ ॥

अवखण्डने भिक्षुणीगणस्य [६२] । आक्रोशने च [६३] । ज्येष्ठपर्षदः पानीयेन सेके [६४] । अनापत्तिर्मूर्छितस्य [६५] । न भिक्षुमवष्टीवेत् [६६] । नेदंप्रव्राजितमाक्रोशेत [६७] । द्वयेऽप्येतत् [६८] । न भिक्षोः पुरस्ताद् गोचरे चरेत् [६९] । नास्थिरसंक्रमेण भिक्षुणा सार्द्धं गच्छेत् [७०] । सहदर्शनाद् भिक्षोरासनं मुञ्चेत् [७१] । निषाद एनां स्थितातिनामने निषण्णो निमुञ्चीत [७२] । अकरणेऽवलोक्य निषण्णत्वेऽस्य भजेत [७३] ।

॥ [इति] गुरुभूतस्वलीकरणगतम् ॥ ३६ ॥

अनुपशमने सति सामर्थ्ये भिक्षुणीकलेः [७४] ।

॥ [इति] संक्षोपध्यु(?)पेक्षणम् ॥ ३७ ॥

पर्युषितच्छन्ददाने [७५] ।

॥ [इति] साम्मत्यरोलागतम् ॥ ३८ ॥

अन्वर्द्धमासमप्रत्यनुभवने भिक्षुभ्योऽववादानुशासन्याः [७] । विना भिक्षुभिः पोषधकरणे [७] । वर्षोपगतावभिक्षुकावासे [७] । संवद्धवे वर्षोपितायास्त्रिभिः स्थानैरप्रवारणे [७] ।

॥ [इति] गुरुधर्मातिक्रमणगतम् ॥ ३९ ॥

दरिद्रस्य कठिनसमादापने [७] । कठिनोद्धारार्थमदापने प्रसन्धौ सामग्र्याः [७] । चीवरभाजनार्थञ्च [७] । नास्या जिघृक्षायां कृतत्वम् [१०] ।

॥ [इति] परविघाताचरणगतम् ॥ ४० ॥

वर्षकमननुपरिन्द्य(?) प्रक्रान्तौ [७] । उपचारत्यागे [७] । न वर्षकमु[त्?] क्रमेण दद्यात् [७] । न गृहवस्त्वापणवस्तु वा [७] ।

॥ [इति] वर्षकास्फी(?)तिकरणगतम् ॥ ४१ ॥

जनपदचर्याचरणेऽन्तर्वर्षम् [७] । अनापत्तिरन्तरायप्रत्युपस्थापने [७] । वर्षोपितत्वादचरणेऽस्याः [७] । चरणे साशङ्के राष्ट्रे [७] । प्रतिविरुद्धे च [७] ।

॥ [इति] प्रव(च)रणाप्रचरणगतम् ॥ ४२ ॥

देवकुलादौ तीर्थ्याश्रये गत्वा वादस्य करणे [१०] । पृच्छायां प्रश्नस्याकृतावकाशस्य [१] । दत्त्वासनं प्रति सम्मोद्य पृष्टागमाभियोगमवकाशं कारयेत् [१] ।

॥ [इति] संजल्पगतम् ॥ ४३ ॥

बहिःभूम्ये(म्यामे ?)काकिनीगमने [१] । छोरणायामुच्चारस्य हरिते तृणे [१] । अनापत्तिः ग्लान्ये स्फुटत्वे च नीलतृणैः सर्वस्य [१] । तिरश्च प्राकारमनवलोक्य [१] । अनापत्तिः वरण्टकप्रतिक्षिप्ततायां प्राकारस्य [१] । न शुचौ लोष्टं क्षिपेत् [१] ।

॥ [इति] उच्चारप्रतिसंयुक्तम् ॥ ४४ ॥

॥ शुद्धप्रायश्चित्तिकानि समाप्तानि ॥

प्रातिदेशनीयानि ।

न श्रोणीनि वस्त्रं निवसीत [१] । नावभु(?सु)तान्तर्गृहं गच्छेत् [१०] । भैक्षवांश्च [१] । शैक्षाः [१] ।

॥ भिक्षुणीविभङ्गसूत्राणि समाप्तानि ॥

प्रकीर्णशिक्षापदानि ।

(१) शमथगताः ।

दुष्कृतमापत्तियोगे ध्वस्ताप्ररूढयोः [१] । अनुपसम्पत्कप्रव्रजितस्य च ममानातिक्रमे [१] । तत्पक्षाणां मानसम् [१] ।

धारणं विप्रवासश्च स्पर्शमग्नेर्निवारिते ।
भोजनं बीजाघातश्च देशे च हरिते शुचेः ॥
उत्सर्गं वृक्षरोहश्च शैक्षा उद्देशयोस्सह ।
रत्नस्पर्शन(?)भुक्त्वा च रजतसान्निध्यनान्नयोः (?) ॥
भूमिप्ररोहघाताभ्यामृत्सृज्यान्तं च पुत्रगम् ।
प्रावृप्येकत्रवसनं पोषधः सप्रवारणः ॥

इत्याद्यस्यान्तभाग् लिङ्ग अनाशायत(?)कान्तारिकागतां तालिकामालंब्य तत्स्थं वा सूत्रकम् ।

न सोपानत्कश्चंक्रम्येत [६] । प्रज्ञपनं खलमानकस्यादिश्यै पांसुना पादयोः [७] । तृतीयेऽह्नि प्रहाणिकः पादौ प्रक्षयेत् [८] । असक्तोऽस्नप्रस्तत्रापि [९] । आवृतद्वारे [१०] । पार्श्वमपि दत्त्वा [११] । सम्मन्येरन् प्रहान्(?ण)प्रतिजागरकम् [१२] । तद्वृत्तमुत्थायैव सेकसन्मार्गसुकुमारी गोमयाकार्षी प्रहाणम् [१३] । आसनप्रज्ञपनम् [१४] । अशुचिकुड्यो(? ड्याः)शोचनम् [१५] । सेकादिशुन्धनमृत्तिकापानीयस्थापनम् [१६] । गण्डीदानञ्चागमाय [१७] । कारणपृष्ठमत्र स्थापनम् [१८] । संघसन्निपातार्थं तिस्रो घुमास्तावन्तः प्रहाराः [१९] । कर्मदानार्थञ्च घुम[ा] त्वेका [२०] । तिस्रः परिवृत्तयोर्द्वौ प्रहारमित्यपरम् [२१] । मृतस्यांसदानाय मुण्डिका [२२] । एकपरिवर्त्तः प्रहारश्चेत्यपरम् [२३] । खक्खरकः प्रहाणिकार्थम् [२४] । कटिकेत्यपरः [२५] । यावदाप्तमापदि [२६] । मुक्त्यर्थसन्निपातार्थमुभयोः कटिकागण्ड्योर्दानम् [२७] । अन्तरितयोर्विलम्बेन [२८] । असंपत्तौ गण्डीदानेन संघोधनस्य महासन्निपाते यमलशंखयोरापूरणम् [२९] । भेर्यास्ताडनम् [३०] । न गण्डीं नाभ्युद्गच्छेत् [३१] । न न क्षिप्रम् [३२] । संभाविनि कार्यस्य कालेऽवशिष्टे यथासुखं करणं दत्तत्रिदण्डके [३३] । परिमण्डलस्यास्य दानम् [३४] । दक्षिणदेशनकरणम् [३५] । परिमण्डलस्य [३६] । पृष्ठत[ः] परिजागरितुः गमनम् [३७] । आगमनमग्रतः [३८] । तद्रूपश्चेत् प्रत्ययः कृतकोपनापावरणीव्यपदेशः [३९] ।

॥ [इति] पोषधवस्तुनि शमथपोषधगतम् ॥ १ ॥

(२) स्थानगताः ।

सम्मन्येरन् पोषधागुरुम् [४०] । सर्वजातकृतनिष्ठितं वस्तु [४१] । स बहिर्व्यामोपविचारम् [४२] । अभिरुचितसंघस्य [४३] । कर्मान्तराणामपि तत्स्थानम् [४४] । यथीयुः सीमानमार्द्धतृतीययोजनपर्यन्तात् [४५] । शैलकुड्यस्तम्भवृक्षप्राकारप्राग्भारातिमार्गोदपानादौ प्रतिदिशं संलक्ष्य तत्(?त्)रैः भिक्षुभिः परिकीर्त्तिते सन्निधौ संघस्य स्थावरे चिह्ने कर्मणः करणम् [४६] । कृतायां संवृतावत्र विप्रवासश्चीवरः [४७] । कुर्युरेनाम् [४८] । सच्चोदेशकं करणं मण्डलकसंमतेः [४९] । नाप्रसन्धे पूर्वे बन्धान्तरस्य रुढिः [५०] । सुञ्चेयुः सीमानम् [५१] । युज्यते द्वयोः

सीम्नोरेकेन वचसा बन्धो मोक्षो वा [११] । कुड्यं कर्मण्यवद्धसीम्न्यावासे सीमा [१२] । यत्र वाशिववहनी(?) परिभ्रष्टोदकपातः [१३] । उपविचारान्तो ग्रामे [१४] । क्रोशान्तः प्रतिदिशमरण्ये [१५] ।

॥ [इति] पोषधवस्तुनि स्थानगतम् ॥ २ ॥

(३) सामग्रीगताः ।

सम्पद्यते छन्ददानतस्तेन सामग्र्यम् [१६] । न सीमाबन्धे [१७] । कल्पिकं शिक्षादत्तकात् तद्ग्रहणमुपस्थापिततद्भिक्षुसंज्ञस्य [१८] । न दानम् [१९] । भवति संवृतैरुन्मत्तकेनाप्यग्रत्वम् [२०] । परिशुद्धिदानेन चैक्यं पोषधे [२१] । प्रवारणायाञ्च [२२] । तद्दानेन कुर्वतैवमेते [२३] । प्रतीच्छेयुरेवंविधिम् [२४] । न गणशश्छन्दादिसंगत्या कर्मकरणमन्याय्यम् [२५] । न तुल्यप्रक्रमाणां वचनीयानामवियुत्यवचनम् [२६] । नैकेनानेकैः तदानयनम् [२७] । आख्यानशक्तेरत्र परिच्छेदः [२८] । यथाकथंचिदेतद्दानानामशक्तौ संपादनम् [२९] । अपि कायेन [३०] । कथंचिदप्यशक्तौ संघस्य वा तत्र गमनं तस्य वा मञ्चेनानयनम् [३१] । नैतान् गृहीत्वा धावेत् [३२] । न जवेत [३३] । न प्लवेत [३४] । न वाट्टां लंघयेत [३५] । न परिपण्डाम् [३६] । न खे तिष्ठेत् [३७] । न बहिः [३८] । नान्तरित्यान्यन्निःश्रयणीपदकमाक्रामेत् [३९] । न सोपानकडेवरम् [४०] । न कष्ठ(ण्ठ?)मात्रमुदकमवगाहेत [४१] । न स्वप्न(?प)न् समापत्तिं कुर्वीत [४२] । वै(?)तरिकत्वेनास्यनयोः गर्हत्वं भिक्षोरारोचयेत् [४३] । संघस्येत्यपरम् [४४] । समन्वाहरत भदन्ता इत्युपक्रमः [४५] । असंप्राप्तस्य संघमध्यं कालक्रियामागारिकादित्वप्रतिज्ञात्वेनानीतत्वम् [४६] । आनीतत्वं संप्राप्तस्य [४७] । परेण पञ्चदश्यां गृहीतत्वे भिक्षोर्मुञ्चैनं भिक्षुं सब्रह्मचार्येप(पोऽ?)स्माकमिति ब्रूयुः [४८] । अमुक्तावस्त्यस्माकमनेन सार्द्धं किञ्चिदेव करणीयमिति साद्यं(?) [४९] । तथापि मण्डलके कुर्वीरन् [५०] । नोर्द्ध(?र्ध्व)मस्य मोक्षाय न व्यायच्छेयुः [५१] । भवत्युत्प्रेक्षितेन व्यग्रत्वम् [५२] । पृथग्भावरुचिमभिनिरूप्य कर्मणः कृतौ स्थूलात्ययः [५३] । न विचिकित्सितं निश्चितं वा कल्पमानत्वेऽनुत्थितेर्दोषस्य कर्तृ [५४] । कर्तृशुद्धेः पर्य(?र्ये)पितं भावतो न कल्पतः [५५] । मार्गणशब्दनोच्चस्थदिगवलोकने चे(?चै)तत् [५६] ।

॥ [इति] पोषधवस्तुनि सामग्रीगतम् ॥ ३ ॥

(४) परिभाषाः ।

पोषधं कुर्वीरन् पञ्चदश्यामन्वर्द्धमासं प्रातिमोक्षसूत्रोद्देशेन [५७] । न प्रवारणेऽस्यासंपन्नत्वम् [५८] । ज्ञपनव्यवस्थोद्ग्रहणपूर्वकं तदुद्देशः [५९] । भाषणेनैव निदानोद्देशस्योच्चारणेन संपादनीयत्वं ज्ञप्तेश्च [६०] । श्रुतश्रावणेनापि शिष्टस्य [६१] । आरब्धस्य समापनं वर्गस्य [६२] । कृत्स्नस्य तुर्यस्पृष्टौ [६३] । प्रत्य(?)याञ्चाभाण्डोप-

भुग्द्रव(?) [२] । कामोपघातसंवासानादरासो(?)धवस्तुकम् [३] । [४]तुल्यत्वं शिक्षादत्तकस्य [५] । अनुपसंपन्नत्वञ्च [६] । न तत्र [७] । शिक्षमाणायाश्च [८९१०] । गत्यन्तराकारभजने लब्धौ भिक्षुसंज्ञानस्य [११] । अलब्धौ न्यूनत्वम् [१२] । पूर्वप्रयुक्तश्च [१३] । तत्त्वं परस्य [१४] । द्रव्यस्य च प्रतिक्षिप्तात् [१५] । तुल्यस्यापि [१६] । व्यञ्जनस्य प(?)क्षेत्रत्वम् [१७] । यत्प्रयोगत्वं न्यूनार्थात् [१८] । तत्त्वं कृतस्य [१९] । स्वत्वं न्यूनस्य [२०२१] । न्यूनेऽंशत्वं दशाहे [२२] । ध्वंसो(?)क्षेत्रत्वे [२३] । नैतन्न प्रतिच्छाददोषस्य [२४] । नैष्फल्यं चरितस्य मानास्यस्य [२५] । परिवृत्तिरत्र कल्पानाम् [२६] । तदातनस्यात्मनः कर्तृत्वम् [२७] । नाश्वगतित्वमन्यजस्य [२८] । गत्यन्तराका[र?]भजने च घाते [२९] । नावस्थान्तराप्रतिपत्तावन्यत्वम् [३०] । छेदो(?)तद्दोषमागमनम् [३१३२] । उत्सर्गश्च [३३] । अनेकत्व एकत्र वस्तुनि प्रज्ञप्तेः यावदेव तद्दोषः [३४] । तच्छेदस्तद्गतम् [३५] । सर्वत्र मुक्तावनन्त्य(?)त्वे संघावशेषः [३६] । नानेकक्र(? कि)याफलेनापत्तिव्यवधानम् [३७] । अर्धत्वंकारे दु[प्]कृतस्य [३८] । न्यूनांशत्वं न्यूनेष्ववद्येषु [३९] । सर्वत्र विचिकित्सतः प्रवृत्तौ सच्चान[ा]म् [४०] । संज्ञानं प्रयोगेऽङ्गम् [४१] । न त्वसंधाने [४२४३] । नात्रब्रह्मचर्यशुक्रविसृष्ट्योः [४४] । श्रोतुश्चासत्त्वे [४५] । योग्यत्वं सर्वाङ्गेषु ग्रहणमने(ना?)सेवायां प्रतिबलत्वम् [४६] । ऊनत्वं परत्रान्यस्य [४७] । ततोऽप्यनेकवैकल्ये [४८] । मनुष्ये च तिरश्च(?) [४९] । अन्यद्धि धर्मकत्वमस्पर्शनेऽङ्गे [५०] । अधिकृतं स्पृश्यम् [५१] । प्रतोदे च [५२] । अन्यवत्त्वं नखदन्तनिर्मांसास्थिरोम्णाम् [५३५४] । म[ा]नुपगतेर्व्यवहार्यत्वं न नष्टप्रकृतेः [५५] । तद्वत्त्वं पण्डकोभयव्यञ्जनयोः [५६] । व्यवहारवत् संसर्गः [५७] । अर्धत्वं बाह्यके प्रव्राजिते गृहीत्वस्यारूढिध्वस्तयोश्च [५८] । सोपसंपत्कमध्वस्तं भिक्षुभिक्षुणीत्वम् [५९] । स्वपक्षोपसंपद्व्यञ्जनो(नयोः?)योगमाभ्याम् [६०] । लिङ्गत्वमेतद्गते गृहिण ऊनम् [६१] । कल्पिकत्वं प्रव्रजितद्रव्येषु प्रमाणिकादित्वञ्च [६२] । स्वार्धत्वमतन्मुख्ये [६३] । बोधोऽर्थस्य विज्ञप्तौ [६४६५] । तं कृत्वे(?)वस्थितो वधस्यार्थहारयोः [६६] । नैतत् समादातरि [६७] । पात्रमस्य [६८] । वाक् च [६९] । स्वा [७०] । आत्मोपसंहिता [७१] । स्वाधिष्ठितत्वं कारणे [७२] ।

॥ विभङ्गगतप्रायाः परिभाषाः समाप्ताः ॥ ४ ॥

(५) पोषधविधिः ।

न गोचरप्रसृ(?)तो योगं वाच(?)येत् [७३] । नाभ्यागमे [७४] । युक्तं विक्षिप्य(प्त?)कूरोद्गण्डकानां परिहरणम् [७५७६] । भापयेयुः प्रहाणशालाम् [७७] । स्वरुङ्ग(?)मध्यं लयनद्वयम् [७८] । पञ्चके षट्के वा [७९] । द्वारकपाटशब्दाकरणाकर्णणोपायांश्च [८०] । वातायनञ्च वि(?) तृतीये ऊर्ध्वं बहिस्संवृतमन्तर्विशालं

साधु (८०) । जालिकाकवाटिकासूचीघटिकाचक्रिकाजपादकदण्डांश्च (८१) । करणम्मण्डपस्योपर्यमाने पुरान्तरस्या(?)वा (८२) । सोपानस्याधिरोहाय (८३) । परिक्षेपो(?)प्रपातार्थं वेदिकया (८४) । कीलनं लोहकण्टकैरकम्पनार्थमस्याः (८५) । बहिर्वा(?) च प्रहाणमण्डपस्य लयनपंक्तेर्वा (८६) । न द्वारसम्मुखं द्वारं कुर्यात् (८७) । करणं द्वारकोष्ठकस्य (८८) । कुर्युर्गुहामपि (८९) । मृण्मयान्यासनार्थं संहतानि (९०) । पीठिकाश्च (९१) । चतुर्हस्ताऽसौ समन्तपरिक्षेपेण साध्वी (९२) । पांचविध्यां वाने (९३) । मौञ्जं साणं वाल्वजं पट्टिका वेत्रवैभङ्गुकमिति (९४) । प्रज्ञपयेयुरत्र तूलिकाम् (९५) । गृष्टिपरितोऽस्यामधिकत्वं साधु (९६) । अर्कका-शेरकवूकशल्मलीनां तूलं पूरणम् (९७) । ऊर्णा शणः कर्पासो नतुकानि पत्रवैभङ्गुकश्च (९८) । काकपदकानामन्तरोऽन्तरे यथार्थमवस्थापनाय दानम् (९९) । मिद्ध्वागमे(?) घटिकाधारणम् (१००) । सूत्रकेण कर्णो(?)पनिबध्य (१०१) । यष्टेः सारणम् (१०२) । सनैः(?) अदुःखार्थमार्द्र(?)कं छित्तेवेष्टितायाश्च नतुकैः (१०३) । कण्डुसक(?)क्षेपः सूत्रकेन(ण ?) बध्व(?द्ध)स्य पुनारान्त्यैः (१०४) । प्रदीपस्याग्रतः स्थापनम् (१०५) । पादस्यावतारणम् (१०६) । अपरस्यापि (१०७) । चङ्क्रमणम् (१०८) । वेक्षणमत्रार्द्धमासवृत्तस्य (१०९) । सनिपत्स्यत्तायाम् (११०) । प्रतिकृत्य चेतितं सर्वत्र सन्निपीदेत् (१११) । सन्निपण्णतायां स्मृतिविमत्योरनन्तरेऽधिष्ठे(?)त (११२) । चित्तेन कर्मकारकः (११३) । स्वं चेदेकमतद्वन्तं पञ्चदशां मन्येत सप्रेमकप्रागुण्ये प्रयतेत (११४) ।

य आयुस्मनि(?ष्मानि)दं चेदं च करोति किं तस्य भवति सापत्तिको नत्वायुस्म(? त्वयाप्म)तेदं चेदं च कृतं कृतमेवं सत्यायुस्मा(? ष्मा)न् सापत्तिको नाहमायुस्म(? ष्म)न्नेकोऽपि तु सर्वसंघोऽनेनार्थेनाङ्गतावत्त्व(?)मायुस्मा(? ष्मा)न् स्वामापत्तिं यथाधर्मं प्रतिकुरु किं ते करिष्यति सर्वसंघ इति प्रक्रमेण दर्शनपथे शिष्टानामिच्छायां देशयेत् (११५) ।

नाकाममत्रैनं चोदयेत् (११६) । सर्वे चेत् पञ्चदश्यामापत्तिं प्रतीयुर्विमतिं वा स्वप्रतिक्रियार्थमावासान्तरे कश्चित् प्रस्थापयेयुः प्रतिगृहीतसंव(? म)त्यर्थम् (११७) । असंपत्तावधिष्ठानं प्रतिज्ञपनं कामयेरन् (११८) । चतुष्कतोऽत्रागुभावे विहारकरणीयं स्थितमेव (११९) । अहापनमासनप्रज्ञप्तेः (१२०) । संकसंमार्गसुकुमारीगोमयकार्पा-प्रदानसिंहासनासनप्रज्ञपनप्रदीपधर्मश्रवणदानेषु कृतेषूच्चतरके प्रदेशे स्थित्वा चतुर्दिशव्यवलोकनम् (१२१) । दर्शनं भिक्षूणामङ्ग तावदायुस्म(? ष्म)न्तस्त्व-रितत्वरितमागच्छतामार्यसंघस्य पोषधः प्रव[ा]रणा वा पाञ्चदशिक[ा] इति वचनम् (१२२) । अपरिपूरो(?)चतुष्कस्याधिष्ठानम् (१२३) । वेलां यावदागमय्य (१२४) । निपद्य केवलस्य (१२५) । सान्यत्वे शिष्टे सन्निधौ (१२६) । सन्निपद्य त्रया-णाम् (१२७) । तद्वत् प्रवारणं चतुर्णाम् (१२८) । नासत्यातिमोक्षसूत्रोद्देशके तदास्थाने ज्ञात्वा पोषधमागमयेत् (१२९) । न यत्रास्यातिक्रमस्तत्रोपगच्छेत् (१३०) ।

नोपगतिमनु रक्षेत् [१६] । प्राक् परातः [१७] । तश्चोर्ध(? र्ध्व)म्मासद्वयात् [१८] । वस्तुकर्मलाभोपस्थायकपरिहारेणोद्देशकं परीच्छेयुः आगच्छन्तं सूत्रधरं प्रत्युद्गच्छेयुः छत्रध्वजपताकाभिः [१९] । विनयस्य मातृकायाश्च [१६१०] । अर्धतृतीयानि योजनानि [२०] । अशक्तौ क्रोशपञ्चकम् [२१] । त्रिकमर्द्धयोजनं क्रोशमर्द्धक्रोशं परिषण्डां वा [२२] । वाक्सारिल्यकेन प्रत्युद्गम्य पात्रचीवरं प्रतिगृह्णीयुः [२३] । स्नानं कुर्युः [२४] । स्नेहलाभश्च संघे [२५] । वस्त्रादिपरिहारं दद्युः [२६] । धर्मश्रवणञ्च [२७] । शास्तृधरत्वमेषां भिक्षुभीर्य्यन्तं बोधयेयुः [२८] । नाकृतपोषधप्रवारणस्तद्दिने प्रज्ञायमान स्वत(?)दः स्थानात् प्रक्रामेन्न चेत् तदैव तद्वधे प्राप्तिः कलिकृद्भ्यो विमुक्तिरनुप्राप्तिः सत्(?द्)वृत्तानामेतत्परायन(? ण)त्वं वा [१६२०] । न कलिकृद्भिक्षुकं सद्वृत्तभिक्षुकाद् गच्छेत् [२९] । नाभिक्षुकं सभिक्षुकादसहितः शिष्टैरन्यत्रापदः कायचित्तप्रस्रब्धिवशता न(?) वा [३०] । नाकृतपोषधप्रवारणं [प्र]क्रान्तैर्निःश्रितमवसृजेत् [३१] । तद्रूपतायां प्रत्ययस्य सद्वृत्तोद्देशवन्तमुद्दिश्य वासं तत्रावतारे नियुञ्जीत [३२] । नैनामुक्तिमतिलङ्घयेत् [३३] । कल्पतापश्चादागतानामर्थे पुनः करणमनयोः [३४] । कामोऽत्र प्रवृत्तो[?ऽ]सम्यक्ता चेत् [३५] । समानयात्रेष्वपि [३६] । सामग्र(?)मितरे याचेरन् [३७] । अलाभेऽस्य सीमान्ते करणम् [१६३०] । संपत्तिः शेषानुभवेन क्रियमानतायामागतौ [३८] । नियमो[?ऽ] प्रक्रान्तत्वे कस्यचित् तत्स्थानात् [३९] । बहुतरत्वे चागतानाम् [४०] । कालं प्रति बहुतराणामनुवर्त्यत्वम् [४१] । समत्वे नैवासिकानाम् [४२] । अत्र च [४३] ।

॥ [इति] पोषधविधिगतम् ॥ ५ ॥

(६) विभंगादिगतम् ।

न समाधेर्व्युत्थापयेत् [४४] । नानवबादकं ध्यायेत् [४५] । न्याय्यो घटिकाकन्दुकप्रयोगः [४६] । न वीर्यं स्रंसयेत् [१६४०] । पुत्रवदेतत् [४७] । अविक्ष(? क्षि)प्ताङ्गचित्तचीवरतयापि शय्य[ा]कल्पनम् [४८] । नाग्लानो दिवा शयीत [४९] । धारयेत् पृष्ठावाधिक आयपदम् [५०] । अन्तर्गतेर्थक्रम्येतेन्द्रियैरबहिर्गतेन मानसेनाविलम्बितम् [५१] । स्पष्टमृजुः [५२] । अशक्तौ सूत्रकेणाक्षिप्य [५३] । द्वादश स्वाध्यायकारकस्य हस्ताश्वंक्रमः [५४] । अष्टादश प्रहाणिकस्य [५५] । सूत्रयित्वास्य करणम् [१६५०] । देशयेद् भिक्षुर्धर्मं निषद्य [५६] । अनेकता चेदेकः [५७] । यः कश्चित् नानाधिष्ठो न चेत् तन्मुखिकया निर्गतिः [५८] । न मण्डलकेन [५९] । नार्धमण्डलकेन [६०] । न द्वावेकत्र [६१] । वृद्धान्ते [६२] । माभूत्यं चेद् द्वित्राण्युत्सृज्यासनानि [६३] । अतदासनश्चेत् [६४] । सिंहासने च [१६६०] । स्थापयेत् खेटकटहकम् [६५] । आस्तरमन दद्यात् वालुकाच्छायिका वा [६६] । काले चेत्तद्

कालं शोचयेत् [८] । धर्मश्रवणं कुर्युः निशायाम् [९] । अष्टम्यां चतुर्दश्यां पञ्चदश्याञ्च [१०] । नैतदकरणे ग्लानस्य दोषः [११] । नाध्येष्यमाणोऽस्य भाषणार्थं न प्रतीच्छेत् [१२] । अशक्त्यादावध्येषकं संज्ञपयेत् [१३] । असति भाषणके परिपाटिकयोत्स्मार्य भाषेरन् [१४] । अन्तत एके(? कै)कां गाथाम् [१५] । प्रदीपस्यानुकरणम् [१६] । अर्धचन्द्राकारेण प्रक्षि(? क्षी)रिण्याकारेण वा धर्मश्रवणसंगतिं प्रज्ञपयेत् प्रक्षीरिण्याम् [१७] । अभ्यवकाशे धर्मश्रवणे वितानकदानम् [१८] । वातवर्षे प्रवेशनम् [१९] । न ततो धर्मश्रवणमुत्सृजेयुः [२०] । मुहूर्तं स्थविरोऽग्रेगतं तूष्णीमागमयात्र धर्मं भाषेतान्यं वाधीच्छेद्—वद भिक्षो धर्मम् [२१] । भाषमाण-[म]वधार्य धर्मश्चेदुत्साहयेत् [२२] । न चेद् धारयेत् [२३] । गृहिणामत्रागतानां धर्म(? र्म)कथां कुर्यात् [२४] । तीर्थ्यश्च प्रत्यवतिष्ठमानं सुनिगृहीतमदर्शयत्कोपमननुसूयम् [२५] । न पर्षदमादाय देशको गच्छेत् [२६] । निर्गतामेनां धर्ममुखे निवेशयेत् [२७] । सगौरवः सप्रतीशो नीचचित्तोऽवगाहेत [२८] । सत्कृत्य देशयेत [२९] । सगौरवो धर्मे स्थिरः [३०] । अविक्षिप्तमानसः [३१] । युक्तयुक्तैः पदैः [३२] । अव्यवकीर्णैः सानुसन्धि [३३] । मैत्रानुकंपानिरामिषचित्तः [३४] । हर्षरुचितुष्टीः कुर्वन् [३५] । तिष्ठेदसमाप्तेऽर्थवशेन [३६] । भाषेत स्वरेण धर्मम् [३७] । कुर्यादुत्थाय विभागम् [३८] । उद्धृत्य चार्थः(र्थ?)कथाम् [३९] । भङ्गसन्धी च [४०] । दिवसस्य गणनं संघस्थविरेण सूत्रप्रोतवंशशलाकासंचारणेन [४१] । उपधिवारिकेन तत आगम्यारोचनं संघे [४२] । विशेषितस्य [४३] । पक्षभेदेन [४४] । विहारस्वामिदेवतार्थञ्च गाथाभाषणे भिक्षूणां नियोगस्य वचनम् [४५] । अनन्तरम् [४६] । अद्य शुक्लपक्षस्य प्रतिपद् विहारस्वामिनो विहारदेवतानां चार्थाय गाथां भाषध्वमिति [४७] । विहारस्वाम्युपनिमन्त्रणवचनम् [४८] । एवं नाम दानपति[ः] श्वो भिक्षुसंघं भक्तेनोपनिमन्त्रयते तं भदन्त[ाः] कल्याणैः मनोभिः प्रत्यनुकम्पन्तामिति [४९] । ऊनरात्रपादनं अर्धमासावशेषतायामृतोः [५०] । अधिकमासककरणं राजानुवृत्त्या [५१] । ज्योतिषिकानुवृत्त्या नक्षत्रतानुगतिः [५२] । नाविचार्यानागमय्य पोषधं शून्योऽयमिति सीमानं पश्चीयुः [५३] । अनङ्गमरूढो ज्ञाततावद्धत्वस्य [५४] । निस्तत्वयापि प्रसन्धिः [५५] । कल्पिकत्वस्य च कुटेः [५६] । न कल्पते सीम्ना सीम्नः परिक्षेपः [५७] । कल्पते मण्डलकभिक्षुणीवर्षकयोर्द(?)कावर्त्ते च [५८] । व्यवतिष्ठते सीम्न्याचतुष्टयादेकवृक्षेऽनेका मर्यादा [५९] । व्यवहारिकस्यात्र चिह्नत्वम् [६०] । अनेवंभूतत्वमृद्धिमायाकृतयोः [६१] । अस्थिरत्वं चन्द्रार्कताराकिरणोर्मितरङ्गाणाम् [६२] । सीमान्तरं वद्य(?)कं सीम्नि [६३] । असत्त्वमेकत्वस्य विच्छेदे [६४] । विषपत्त्वं संक्रमस्य शिरश्चेत् [६५] । अनुवृद्धिरस्य ध्वस्तो पुनः कृतो (?) [६६] । अप्रतिप्रसन्धप्रयोगतायाम् [६७] । नोर्ध(? र्ध)सप्तरात्रादविच्छेद-

भूतं नभः [illegible] । सत्त्वेनैवात्र न व्यवहारः कुतः सवर्द्धतया [illegible] । नो(? र्ध्व)-मध्यतोऽर्धतृतीययोजनान्तात् सीम्नो बन्धस्य रूढिः [illegible] । एतस्मादधोर्ध(? र्ध्व) स्तरसांबन्धस्य तलवत्त्वम् [illegible] । अरूढिरविप्रवा संवृतेरबद्धसीमतायां भूमेः [illegible] । अपेति पाशे(शा?)बन्धस्य [illegible] । नास्यास्याः [illegible] । स्तूपग(? गृ)हाङ्गणपोषधा-मुखेष्वपि पोषधे संमृज्यता [illegible] । दत्तत्वं छन्दादेः संघे दत्तता [illegible] । यस्य कस्य-चिदतस्तदारोचकत्वेन भवनीयत्वम् [illegible] । नैनं बहिःसीमस्थो ददीत दापयेत वा [illegible] । न परंपरया [illegible] । दुष्कृतं ग्लानावशच(?)प्राणब्रह्मचर्यान्तरायभीता-दन्यस्य दाने [illegible] । अनारोचनेऽनादरात् [illegible] । निर्दोषं बहिःसीम्ना(ग्य?)नया भीत्या नयनम् [illegible] । भिक्षूणां गणनमुपधिवारिकेण पोषधे शलाकाचारणेन [illegible] । सुप्रवृत्तस्या(स्यो?)र्ध्वपदेऽप्यस्खलन्तायामुद्देशः [illegible] । संघस्या(? स्य)विरस्य [illegible] । अप्रतिबलत्वे द्वितीयस्य [illegible] । तृतीयस्य तस्यापि [illegible] । तस्यापि वारेण [illegible] । अन्यस्याशक्तावध्येषणम् [illegible] । अप्रतिपत्तौ संघेन [illegible] । सातत्तिकस्यापि [illegible] । विष्ठाने शेषस्यान्येन [illegible] । खण्डधरतायां यावद्भिः संपत्तिः [illegible] । अनयस्स-प्रत्यपायतायां प्रासादिकस्थानलोभेनासमीपे ग्रामस्य योध्य(?)करणम् [illegible] । करणमनवस्थाने सार्थेऽस्य गच्छद्भिः [illegible] । अनिष्टौ शब्दनस्य संक्षेपेन [illegible] । तावतोऽप्यधिष्ठानम् [illegible] । निरवद्यं स्वा(? श्वा)द्वस्य प्रधानस्य च तुष्टिभावनाया-माचारानुश्रावणम् [illegible] । करणश्च सन्निधौ पोषधस्य [illegible] । आपदि गृहिसन्निधौ देशनम् [illegible] । अनुश्रावणश्चास्याचारस्य [illegible] । संज्ञप्तये च राज्ञः [illegible] । नानिर्वाहणे परस्यारूढिः [illegible] । उद्देश्य तदियन्तकालोद्दिष्टानां तच्चानुपगृहीति-स्वाधर्मः [illegible] । श्रमणोपविचारादपेतत्वं प्रक्रान्तता [illegible] ।

॥ [इति] विभङ्गादिगतम् ॥ ६ ॥

॥ समाप्तं पोषधवस्तु ॥ २ ॥

§ ३. वार्षिकवस्तु ।

(१) तद्वाटकसम्मतिः ।

वर्षा उपगच्छेत् [illegible] । त्रैमासीम् [illegible] । प्रतिपदि [illegible] । आषाढ्यानन्त-रायाम् [illegible] । श्रावणाया[म्] वा [illegible] । विहारं कलायेयुः दशाहार्द्धमासेन भविष्यत्यायाम् [illegible] । सप्ताहैरित्यपरम् [illegible] । पूर्वाह्णे शयनासनस्य पातनम् [illegible] । आपादकठिल्लकात् [illegible] ।

॥ [इति] तद्वाटकसंमतिः ॥ १ ॥

(२) शलाकाचारणम् ।

अपारणेऽनेकस्य [illegible] । अक्तगन्धैर्याज्ञेरीपटलकगते शुक्ले वामस्युपनिक्षिप्ताः शलाका पृष्ठान्ते निवेश्य याज्ञायां च "असिन्नावासे क्रियाकारो यो युस्मा-

(? ष्मा)कमुत्सहते तेन क्रियाकारेणासिन्नावासे वर्षावस्तुं शलाकां गृह्णातु, न च वः केनचिदन्तर्वर्षे संघमध्ये रणमुत्पादयितव्यो यो वः कस्यचित् किञ्चिज्जानाति स इदानीं वदतु यो वोऽन्तर्वर्षे संघे रणमुत्पादयिष्यते तस्य संघ उत्तर उपपरीक्षितव्यं मत्स्य(? मंस्य)त" इति भिक्षून् वेदयेत् [११]। ग्रहणोपशमनं प्रति संघं ज्ञपयेदन्यः [१२]।

॥ [इति] शलाकाग्र(व)चारणम् ॥ २ ॥

(३) वासवस्तुग्रहणम्।

शास्तुरग्रे ग्रहणम् [१३]। अर्धमुक्तेनामनेनान्यैः [१४]। आचार्योपाध्यायैः श्रामणेराणाम् [१५]। नैवासिकानामस्ये(? स्वै)तदन्ते शनैः स्थापनम् [१६]। गणयित्वा प्रवेदनमियद्भिर्भिक्षुभिरसिन्नावासे शलाका गृहीतेति [१७]।

॥ [इति] वासवस्तुग्रहणम् ॥ ३ ॥

(४) पात्रतद्ग्रहणादि।

अन्तत(?तः)तस्य तत्तारककुञ्चिकेन पुरतः स्थित्वा रोचनोपक्रमं "स्थविरामुकविहारः सलाभः सचीवरिको गृहाण" इति यथागुणम् [१८]।

॥ [इति] पात्रतद्ग्रहणादि ॥ ४ ॥

(५) शयनासनादिदानम्।

ज्ञात्वोद्देशमख्य(?स्य)स्तूपसंघार्थे गतस्य गत्या भागित्वं वृक्षमूलहरितशाद्वलस्थण्डिलेष्वपि यथावृद्धिकोद्देशः [१९]। द्वादि(?)भ्योऽसंभावने लयनस्यान्ततो निष्यन्दनप्रामाण्येनास्य भूमेः [२०]। पात्रकरकोशरु(?ड्ड)कदन्तकोष्ठस्थानस्यापेक्षणम् [२१]। द्वारकोष्ठकसोपानकोष्ठिकाप्रासादोपस्थानभक्तजेन्ताकशालानोद्दिशेयुः [२२]। न रात्रौ शयनासनम् [२३]। नाध्युषितं ग्लानेनान्यस्मै लयनम् [२४]। नैतद् द्वाग्र(?)स्यभावेन ददीरन् [२५]। नैनमुपस्थायकं वा कर्म कारयेरन् [२६]। न कुष्ठी सांघिकं शयनासनं परिभुञ्जीत [२७]। प्रत्यन्तेऽस्य विहारं दद्युः [२८]। न ससवेऽन्यत्र सांघिके तिष्ठेदाप्रासादपुष्करिणीद्वारकोष्ठकपरिषण्डचंक्रमस्थानवृक्षात् [२९]। न वर्चःप्रस्रावकुट्योः प्रविशेत् [३०]। उपस्थायकदानेनैनमनुकम्पीरन् [३१]। पात्रचीवरस्थापनार्थमारण्यकेभ्यः सर्वदा लयनमुद्दिशेयुः [३२]। वर्षोपगमने स्युः केचिदागन्तव इति वस्तु शयनासनञ्च स्थापयेयुः [३३]। प्रभूतागतावुपगतेः पुनरुद्देशः [३४]। नोर्ध्व(? र्ध्व)मुपनायिकातः [३५]। द्वादेरसंभावनाभूम्येकस्य [३६]। नैकाहस्यार्थे शयनासनं गृह्णीत [३७]। न लाभलोभात् विहारम् [३८]। सर्वे परिभुञ्जीत [३९]। पूर्वाह्णे क्वचित् पाठस्याध्यायावस्थानचंक्रमाणां क्वचिद् मध्याह्ने परत्रान्यत्र चीवरस्थापनमावासोऽपरत्र रात्रावित्यस्य योगः [४०]। खण्डफुल्लमुपगतो वासवस्तुनः प्रतिसंस्कुर्वीत [४१]। वर्षकस्य वर्षोपिताभिक्षुणीभिरभिसंस्करणम् [४२]। कलिकर-

निवेशासंपत्त्यर्थम् [४४] । हैमन्तिकग्रैष्मावपि शयनासनग्राहो(?) कुर्वीरन् [४५] । कालें(? त्लें)न चोद्देशम् [४६] । तद्यथा सामन्तकस्यापि विहारपरिवेणयोः [४७] । प्रासादस्यापि सैतदः(?) [४८] । नोर्ध्वमेनां प्रक्रान्तत्वादेषामनुवर्त्तयेरन् [४९] । न प्रकृतिस्थार्थे घट्टं(?) कुर्वीरन् [५०] । न भाविनार्थेन [५१] । अयममुत्रर्तावहोरात्रे तदवयवे वा भविष्यत्ययममुत्रायमाचार्यस्य भविष्यत्ययमुपाध्यायस्य सार्द्धम्विहारिणोऽयमन्तेवासिन आलप्तकादेरयमिति विहारानुद्दिशेयुः [५२] । न प्रतीच्छेत् [५३] । लतापारिकस्यालयप्रतिविधानार्थं सम्मतिः [५४] । [न]रण्डानां सातनम् [५५] । क्षौद्राणां सूत्रकेणावृत्य वेष्टनम् [५६] ।

॥ [इति] शयनासनादिदानम् ॥ ५ ॥

(६) उद्देश्यत्वादि ।

सत्त्वेऽनेकस्य वृद्धपीठानामप्युद्देशत्वम् [५७] । संस्तराणां च [५८] । न सांघिकमवनद्धं नाशनधर्मेण शुचिना श्रामणेराय शयनासनं कश्चिद् दद्यात् [५९] । न भिक्षुण्यै [६०] । दानमस्यै विहारस्यात्र वाससम्पत्तौ पर्यन्ते [६१] । शयनासनस्य च शिष्टस्याप्रणीतस्य [६२] । "न वस्त्रेनचित् सांघिकं शयनासनम्विना प्रत्यास्तरणेन परिभोक्तव्यं न कल्पप्रत्यास्तरणेन न मलप्रत्यास्तरणेन" इति वेदयेत् [६३] । अन्वर्धमासं च प्रत्यवेक्षेत [६४] । समयमुत्क्रम्य परिभुक्तावाच्छिन्द्यादो रोच्य निःश्रये निःश्रितस्यान्यस्य संघे [६५] । "अमुकेन दानपतिनामुकेन वैय्यावृत्यकरेणामुकेन गोचरग्रामकेन श्वः संघो वर्षा उपगमिष्यति" इत्यारोचयेत् [६६] । अनुन्मादित्वप्रतिविनोदित्वयोः कौकृत्यस्यान्यस्य च दुःखदौर्मनस्यस्य सुखसौमनस्यस्य चेत्यादित्वरक्षित्वयोः ग्लानोपस्थायकत्वस्य च सब्रह्मचारिषु भूतेः प्रत्याशंसनेनावासं गोचरञ्च पिण्डकभैषज्यदात्रोरवलोक्योपगमनम् [६७] । छन्ने भिक्षोः पुरस्तात् [६८] । नानेकत्र विहारे [६९] । न यस्मिन्नभिक्षुकत्वमकपाटकत्वञ्च सहितम् [७०] । सत्त्वे दानपतिवैयावृत्यगोचरग्रामिकोपस्थायकानामुत्कीर्त्तनम् [७१] । न वहिःसीम्न्यरुणमुद्गमयेदनधिष्ठितम् [७२] । सप्ताहमधिष्ठितम् [७३] । सप्ताहमधितिष्ठे[द]र्थे धर्म्ये [७४] । तद्यथा नाम निर्यातनविहारप्रतिष्ठापनशयनासनदानध्रुवभिक्षाज्ञपनचैत्यप्रतिष्ठाप[न]यष्टिध्वजारोपणपूजाकरणालचन्दनकुंकुमसेकदानपाठकौकृत्यप्रतिविनोदनदृष्टिगतप्रतिनि[स्]सर्गपक्षसंपत्त्यवसारणपरिवासादिचतुष्कदानावर्त्तनग्लानप्रश्नसनेषु भिक्षोः [७५] । भिक्षुण्या गुरुधर्ममानास्वदाने च [७६] । ब्रह्मचर्योपस्थानसंवृतेः शिक्षमाणायाः [७७] । उपसंपादने च [७८] । अत्र श्रामणेरस्य [७९] । श्रामणेरिकायाः शिक्षासंवृतियाने [८०] । शिरोवेष्टनरजोहरणसीमन्तोन्नयनजटापहरणकुण्डलबन्धनेषु गृहिगृहिण्योः [८१] । संघावशेषगतमनुपसंपन्नानामपूर्वम् [८२] । उन्मज्जनमवसारणे गृहिगृहिण्योः [८३] ।

लङ्घयेदेतद् भक्तभैषज्योपस्थापकाभावे शक्तौ तैर्विना यापयितुम् (८) । श्रामण्यजीवितब्रह्मचर्यान्तरायसंभावने (९) । अनुलोमिकचित्तोत्पादनपापिकवाग्निश्चारणयोः भेदाय पदाक्रममाणे संघस्य (१०) । नैतच्छान्त्यै स सम्भावनो न गच्छेत् (११) । गतो न लङ्घयेत् (१२) । न प्रतिश्रुता(?) वर्षावासे नावासस्य सम्बन्धनम् (१३) । न कुर्वीत नास्त्यस्यैकपोषधतायामावासयोरुत्थानम् (१४) । अस्त्येकलाभतायाम् (१५) ।

॥ वार्षिकवस्तु ॥ ६ ॥

(७) निदानादिगतम् ।

पञ्चानामपि निकायानामुपगन्तव्यत्वम् (१) । न शुद्धानां श्रामणेराणाम् (२) । अवार्षिकानाञ्च (३) । नैषामेव रूढिरुपगतेः (४) । न ग्राह्यत्वं शयनासनस्य (५) । नासत्त्वे ग्राहस्य (६) । नासंमतेन ग्राहणम् (७) । नानुत्पादितादौ पिटकधरकालिकृत्सदसत्त्वयोरसंश्रितत्वम् (८) । उपितत्वमनुपगतस्य स्थानामोक्षे (९) । नाकाशे रूढिरुपगतेः (१०) । न नाव्युत्सृज्य प्राप्तपृथिवीमुपनिबद्धां वा भूमिस्थे स्थिरे संजनतोऽन्तरापयायित्वम् (११) । ध्वंसस्त[ा]दृशमभिनिःसृत्याधर्मपक्षसंक्रान्तावरुणोद्गतेः न संदिग्धतायाम् (१२) । नान्ये(?न्त्ये)धिष्ठानस्य पडहे रूढिः (१३) । ध्वंसोपगतनिष्कार्य तस्याप्रतिनिर्वृत्यवस्थानयोः (१४) । पर्यन्तं परमत्र सप्ताहत्वम् (१५) । अलब्धसंवृतेरेष पर्यन्तः (१६) । अन्यस्य चत्वारिपद्रात्रः (१७) । दानमस्याः (१८) । नात ऊर्ध्वं बहि[र्]वस्तव्यता (१९) । पञ्चानामपि निकायानामेतत् (२०) । अन्तःसीमयस्य रूढिः (२१) । भिक्षोः पुरस्तात् (२२) । अनाशंक्यमनाक्षिप्तत्वं तीर्थ्यस्य दृष्टेर्विवेचनार्थं ज्ञातेः करणीयेनागमाधिगमयोरात्मनः कांक्षाविनोदार्थं गमनायैतत्कृतेः (२३) । अनुत्क्षेप्यत्वमुपगतास्य(?)स्य (२४) । निदर्शनं वासः (२५) ।

॥ [इति] निदानादिगतम् ॥ ७ ॥

॥ समाप्तश्च वार्षिकवस्तु ॥ ३ ॥

§४. प्रवारणवस्तु ।

(१) प्रवारणाविधिः ।

न मौनं समाददीत (१) । शुद्धिमुक्त्योरनेन प्रत्यवगतौ स्थूलात्ययः (२) । दृष्टिश्रुतपरिशङ्काभिः वर्षोपितः संघं प्रवारयेत् (३) । पश्चिमेऽह्नि वर्षाणाम् (४) । गोचरा रोचयेयुः (५) । "यतः प्रभृति केलापनमिषद्भिः दिवसैः संघस्य प्रवारणा भविष्यति युष्माकमारोचितम्भवतु" इति (६) । विहारस्य मण्डनम् (७) । कूटागाराणां बन्धनम् (८) । राहानां चित्रणं स्तूपानां मोचनमोलनं च (९) । सिद्धासनस्य मण्डनम् (१०) । "अद्य सर्वरात्रिकं धर्मश्रवणं

भविष्यति तत्र युष्माभिः सामग्री देया" इति गोचरारोच्य सूत्रविनय-मातृक[ा]धर्मश्रवणदापनम् [११] । परस्तान्तैः प्राक्कर्मतो धर्म्यया विनिश्चय-कथया रात्रेरतिनामनम् [१२] । प्रागरुणसंभेदात् प्रवारणात् कर्म [१३] । प्रवारणकं संमन्येरन् भिक्षुम् [१४] । अपारणे नैकम् [१५] । न्याय्यमत्रांशसः पंक्तौ व्यापा-रणम् [१६] । दर्भानसौ चारयेत् [१७] । प्रवारणं प्रत्यन्येन संघस्य ज्ञपनम् [१८] । प्रतिभिक्ष्वा प्रवारणात् पुरतस्तिष्ठेत् [१९] । तस्मै प्रवारणं त्रिः [२०] । द्विस्तावता ग्लानक्लान्तिशयनासनसंभेदकालातिक्रान्तिसम्बाधसंपत्तिसंभावने [२१] । ताव-तापि सकृत् [२२] । तेनापरस्मै निष्ठितायां पंक्तौ [२३] । अभावेऽन्यस्मै [२४] । सर्व-संघेन प्रतिवारिते एतत्त्वस्य संघे निवेदनम् "साधु प्रवारितं सुष्ठु प्रवारितं" इति [२५] । सर्वे समर्थयेयुः [२६] । येन तेनासूचेः "स्वकेन वस्तुना वस्त्रप्र-वारणमारभेत वचनतो गृहीत्वा संघेन लभ्यं भदन्ता एवं रूपेणापि वस्तुना वर्षोपितं भिक्षुसंघं प्रवारयितुं" इति [२७] । अतः श्रामणेरान् प्रवारयेत् [२८] । ततो भिक्षुणीः [२९] । प्रवारितत्वमधिष्ठाय गतस्यार्वाक्कृतप्रवारणायासह-कृतौ [३०] । न स्त्रियां परिवृत्यापि [३१] । अशक्यतायामवस्थातुं भागप्राप्तं भिक्षु-मवलोकयेद् गणप्रवारणेन [३२] । प्रवारयेदन्तर्वर्षं प्रक्रमिष्यन् करणीयेन [३३] । स्थापयित्वापि वस्तुपुद्गलमुभयं वा [३४] । प्रतीच्छेयुरेनाम् [३५] । स्थापनेऽनन्त्य-तामुपनीय "न हैव वयमायुस्म(ष्म)न्नित्यर्थं सन्निपण्ण[ाः] सन्निपतिताः कश्चिदायुष्मन् वस्तु स्थापयेन्न पुद्गलमित्यपि तु शीलविशुद्ध्यर्थं पोषध उक्तो भगवता धर्मविशुद्ध्यर्थं प्रवारणा, चेदाकांक्षसि प्रवारय" इति [३६] । पुद्गलं स्थापयेन्न न वस्त्विति वस्तु स्थापयेत् पुद्गलश्चेति अभङ्गः प्रतीष्टैः व्यपलापे स्थापनस्य प्रतीष्टतायां स्थापितस्य वा [३७] । नैवंविधं किञ्चिदस्तीतिवादे मृषा-त्वमत्र पूर्वस्यास्य वा [३८] । कलिकृतां चेद् भिक्षूणामाग[मन]मुपगताः मृणुयुः, द्वित्रिपोषधाक्रान्तिश्चेद् प्रवारयेयुः [३९] । असंपत्तौ यश्च पाणिमण्डकानि संमन्येरन् [४०] । काश्यपस्वल्पकेन प्रत्युद्गम्य पात्रचीवरप्रतिशमनं लयनमालंक-कृदागारोद्देशः [४१] । स्नानलेहलाभकरणम् [४२] । करणधर्मश्रवणदानमित्येषां प्रलोभनानि प्रयुञ्जीरन् असंपत्तावात्मीभावस्य पोषधं कुर्वीरन् मण्डलकेषु [४३] । ननु युष्माकमद्य प्रवारणेति शुश्राणानाम् "आगमयतायुष्मन्त आगन्तुका यूयं नैवासिका अनेनार्थेन" इति प्रतिवदेयुः [४४] । प्रक्रान्तेषु प्रवारणम् [४५] ।

॥ [इति] प्रवारणावस्तु ॥ १ ॥

(२) क्षुद्रकादिगतम् ।

नाकृतश्रमणः(१ णं)सान्तरस्य प्रवारयेत् [४६] । दशार्द्धमासेन भविष्यतायामस्या-स्तत्कालः [४७] । सप्ताहैरित्यपरः [४८] । न सन्निपातः [४९] । नासावसान्त्वा-

नाकृतसंमोदनसंनिहितानां सर्वस्तदा [५०]। न रुपितं क्षमयेत् [५१]। न भिक्षुणी भिक्षुं बहिरावासात् [५२]। न पादयोर्निपत्य [५३]। क्षान्ते निपत्य गमनम् [५४]। नैनां क्षमयन्तीमनादृत्य भिक्षुर्गच्छेत् [५५]। न विलंघयेत् [५६]। संज्ञप्तेः क्षमनीयस्य पुरस्ताद्दापनमभिज्ञान[म्] [५७]। नानिष्टावुपायपर्येषणं नार्पयेत् [५८]। न चीरयेत् [५९]। न पर्यवस्थानापगतिं नोदीक्षेत [६०]। न क्षम्यमाणो न क्षमेत [६१]।

॥ [इति] क्षुद्रकादिगतम् ॥ २ ॥

॥ समाप्तश्च प्रवारणवस्तु ॥ ४ ॥

§ ५, कठिनवस्तु ।

(१) क्षुद्रकादिगतम् ।

आस्त्रीणी(?)रन् कठिनम् [१]। यथा त्रयमेवमास्तीर्णस्य परभोजनमपि निर्दोषं गणभोजनमनामन्त्र्य ग्रामप्रवेशश्चीवरविज्ञपनञ्च [२]। साधारण्यमस्य शिष्टैः लाभस्य [३]। अनुत्थानमस्यावार्षिकच्छिन्नवर्षपश्चिमवर्षस्थानान्तरोपितवर्षेषु भूम्यन्तरस्थेषु च [४]। वि(?)ष्ठानमेतत्प्राप्तौ [५]। भागिनो व्यन्त्यश्रामणेरभूम्यन्तरस्थालाभे [६]। नोत्क्षिप्तः [७]। तत्ताप्राप्तिपदधर्मपक्षेषु यातो भिन्नेषु [८]। मौलकालप्रवारणपर्यन्तवर्षानिमित्तकास्तारकादिपर्यन्तसम्बन्धी चीवरलाभसंख्यं च त्रिचीवरम् [९]। सांघिकममृदितमविलिखितमपैलोतिकम् [१०]। न न वर्णितकम् [११]। अपरिभुक्तम् [१२]। दृढम् [१३]। असंबन्धानिमपट्टिकगण्डूपकपट्टि(?)कपरिपण्डन (?) [१४]। अनैःसर्गिकसन्ततिग्रस्कन्नगतप्रत्यागतम् [१५]। छिन्नस्यूतम् [१६]। निष्ठितं पञ्चकम् [१७]। उत्तरे वा [१८]। अनास्तीर्णपूर्वञ्च [१९]। आस्तीर्णम् [२०]। अनेकमपि [२१]। यावत्तदास्तारकः [२२]। चीवरान्तराधिष्ठानमेतत्तस्मादुद्धृत्याधिष्ठितानि [२३]। रोचयेरन् सामग्र्याम् [२४]। अनुपितम् [२५]। संमन्येरन्नन्तःसीम्नि [२६]। अस्तारकञ्च [२७]। यत्रास्योत्थानम् [२८]। तस्मै ददीत ज्ञस्याधावनस्यूतिरञ्जनेभ्यसौ पूर्वगमः स्यात् [२९]। द्वित्रानुष्ठानेन [३०]। निष्ठितं संपत्तौ द्वित्राणां स्वयं सूचीपदकानां दानम् [३१]। आदानस्वयंकृति (?) तदन्तेष्वास्तरिष्याम्यास्तृणोम्यास्तृतं मयेति यथासंख्यं चित्तस्योत्पादनम् [३२]। नाद्यस्य हानावनुत्थानम् [३३]। "श्वोऽहमायुष्मन्तः कठिनमास्तरिष्यामि युष्माभिः स्वकस्वकानि चीवराण्युद्धर्तव्यानि" इति सामग्र्यामारोचनम् [३४]। सन्निपातगतानुष्ठानम् [३५]। गन्धपुष्पार्चितं सुरभिधूपधूपितं चांगेरिपटलकस्यमेकं त्रिवा (?)नेकमादाय वृद्धान्तेऽवस्थितेनास्तृतेस्सम्पादनं प्रतिपदि [३६]। कार्त्तिकस्य [३७]। त्रिरुक्त्या [३८]। आस्तृणोमीति [३९]। प्रतिभिक्षुमग्रतः स्थित्वा "आस्तृतं" इति निवेदनम् [४०]। "साध्वास्तृतं सुष्ठ्वा-

स्तृतं योऽत्र लम्भश्चानुशंसश्च सोऽस्माकं" इतीतरः [४१]। प्रत्यनुभूतिवदस्यानुमोदनम् [४२]। सम्मुखीभूतेन [४३]। कालेन कालं शोषयेदातापयेत् स्फोटयेत् [४४]। न धूमरजोगारे स्थापयेत् [४५]। न राज्ञः [४६]। नातो विप्रवसेत् [४७]। नादायान्यत्र गच्छेत् [४८]। नाशुचिकुटिं प्रविशेत् [४९]। अभ्यवकाशे तिष्ठेत् [५०]। द्विविध उद्धारः स्वयं विवर्त्ती(?वृत्तिः)कृत्रिमश्च [५१]। स्वयम्विवृत्तिः प्राप्तो सीमान्तरस्य कठिनेन [५२]। उद्धर्तौ निरधिष्ठन्ते(?)ऽन्तःसीम्नो रणस्य [५३]। विच्छेदे तन्मण्डलान्तर्भावस्य [५४]। तमत्र प्रति [५५]। सीमातिक्रान्तावस्य संपत्तिः [५६]। अप्रत्यागमनचित्तेन [५७]। अस्य चोत्पत्तौ बहिःसीम्नि [५८]। अभावे चीवरकरणाभिप्र[ा]येणानुस्यूतेस्तदेव [५९]। करिष्यत्ता विच्छित्तौ भावे [६०]। पत्यागतेष (?) [६१]। त्रये करिष्यमाणस्यैवत् संस्थानमाशासमुच्छेदे प्रारब्धनष्टौ निष्ठान इति [६२]। उद्धर्तृनिश्चयवद् विमतिः [६३]। न कर्मणो न्यङ्कारमनुतिष्ठेयुः [६४]। फाल्गुणी तत्कालः [६५]। अन्तरा [६६]। सुपितकार्थतायामर्वाचीनोऽपि [६७]। आश्रुतेरस्मिन्ननुभूतवन्तं प्रत्यनुवृत्तिरनुशंसे [६८]। असत्त्वेऽनुस्यूतेः [६९]। आच्छित्तेः सत्त्वे [७०]। नानुद्धृते सर्वेषां तात्कालिकं लाभं भाजयेत [७१]।

॥ [इति] कठिनवस्तु ॥ १ ॥

(२) पृच्छागतम् ।

यथाप्रवारणमास्तारः [७२]। नापोषधान्ते [७३]। उद्धारश्च [७४]। तद्दिनत्वमस्य [७५]। उद्धृतत्वं पुनः पोषधकृतौ [७६]। पृथगस्तीर्ये भिन्नेषु संपत्तिः [७७]। धर्मवादिनां स तथा(?)स्तारः [७८]। कृतेऽप्यत्रेतरैरेषामावासे लाभेऽर्हत्वम् [७९]। नोत्क्षिप्तकानां प्रकृतिस्थकावासेऽस्योत्थानम् [८०]। भावयनिवेशनमास्तारः [८१]। भवति छन्ददानवशात् सहितेन करणीयस्य शिष्टैः कृतौ कृतत्वम् [८२]। तदपच्युतिरुद्धारः [८३]। तस्माददत्वा छन्दं स्वमसमापत्त्योः संनिपण्णोऽस्यानुत्थानमास्तारस्योद्धृतेश्च प्राक्त्र(?)वणात् [८४]। उषितत्वमेकसीमतायां तत्रावासान्तरोषितानामास्तारे [८५]। तत्स्थानत्वमास्तारकालेऽस्यामस्य [८६]। यत् तदास्तृत्य पृथक् सीम[ा]करणे चास्य स्थानम् [८७]। प्रत्यावासं पृथक्त्वेऽस्यैषामुद्धारः [८८]। प्रतिपक्षं भिन्नतायाम् [८९]। नानुद्धृतिरनास्तारोद्धारः [९०]। नानुत्थानकत्वादपूरकत्वम् [९१]। नानास्तारत्वादुद्धारे [९२]। निर्दोषमास्तृतकठिनस्य [९३]। विनासांघाट्या ग्रामप्रवेशाद्यास्तृताटके निषादात् [९४]।

॥ कठिनवस्तुनि पृच्छागतम् ॥ २ ॥

॥ समाप्तश्च कठिनवस्तु ॥ ५ ॥

§६, चीवरवस्तु ।

(१) चीवरवस्तु ।

नाशस्त्रलूनं वासः परिभुञ्जीत [१] । छिन्नस्यूतं चीवरत्वायाधिष्ठेत् [२] । भक्तिचित्रताशेषसममध्यान्यत्तद्गतपत्रमुखत्वपरिमण्डितत्वैः [३] । अन्तरवासं उत्तरासंगं संघाटीञ्च [४] । कूसुलकसंघ(?)दिके च यत् तद्विधे भिक्षुणी [५] । मतसंभवे याञ्चाया(?)पि [६] । नैतद्विहासरुतोद्गतिमागमयेत् [७] । रोहत्यन्यासंपत्तावरक्तकस्याधिष्ठानम् [८] । अच्छिन्नकस्य च [९] । आसेवकानामत्रदानं संभवश्चेत् [१०] । आगारिकविधस्य च [११] । नमतकोचवप्रावारस्थूलकम्बलपैलातिकमच्छिन्नमासैव(?)कदानसूतम् [१२] । तत्क्षणादेवाशुचिप्रक्षणं सम्पत्तौ शयनासनं शोचयेत [१३] । नैनं सांधिकमखरमंचपीठप्रत्यास्तृतमतेनानिपादात् संवरणं वा दत्तान्तर्द्वानमुपभुञ्जीत [१४] । सर्वञ्च चित्रमभूयो विनष्टम् [१५] । न कल्पभूतेन मलवव(?)ता वा [१६] । धारणं प्रत्यास्तरणस्य येन एकपुटं न्याय्यम् [१७] । द्विपुटं पैलोतिकम् [१८] । अकल्पिकं चित्रोपचित्रम् [१९] । पत्रमुखमस्य कुर्वीत [२०] । अधस्तृतीयभागादौ [२१] । नैकखण्डमधितिष्ठेत् [२२] । कण्डूप्रतिच्छादनं तद्वान् धारयेत् [२३] । पञ्चपैरेनद्दिवसैः शोचयेत् [२४] । कल्पते कौशेयमूर्णकं शानकं क्षौमकञ्च [२५] । नातन्तोतभांगेयम् [२६] । केशमयनाम्यौलूकपक्षित्वसमादानम् [२७] । स्थूलमत्र [२८] । अन्यदेतद् भजनम् [२९] । केशलुञ्चनपर्णशाट्यजिनसान्तरोत्तरया(?)पनतिरिटाङ्गानाडीसर्वनीलप्रवारणदीर्घदशफणदशकंचुकोष्णीषशिरोवेष्टनकुतपोष्टकंबलतीर्थिकध्वजञ्च [३०] । पु(?)लासपत्रपूरदीपवर्त्तिकामात्रतयापि समतयै[व?] विभजनम् [३१] । विक्रीयकोचवतद्विधानाम् [३२] । न पाटयित्वा [३३] । पञ्चानां लाभे भाजनकरणम् "अद्यलाभो भाजयिष्यते तत्र युष्माभिः सन्निपतितव्यम्" इत्यारोचनं संघे [३४] । गण्ड्या कोढनम् [३५] । शलाकाचारणम् [३६] । गणनम् [३७] । प्रत्यंशप्रवारणम् [३८] । ईशित्वक्रियमाणतायामान्त्यादिगतस्य [३९] । नावसितत्वे [४०] । कुलाभकेऽप्येतत् [४१] । नानर्हः प्रक्रान्तायां तल्लाभक्रिया प्रविष्टेः [४२] । तस्मान्नियुञ्जीत ग्रहणे प्रक्रामन् [४३] । दस्युत्वमग्रहणे प्रतिज्ञातवतः [४४] । पणपञ्चकात् प्रभृति कुलाभके [४५] । नानुक्तो गृह्णीयात् [४६] । गृह्णीयादाचार्योपाध्यायो वा [४७] । विश्रम्भस्यानार्थञ्च [४८] । नास्वपक्षार्थम् [४९] । शयनासनेऽप्येतत् [५०] । भक्ते वा [५१] । परस्परार्थं गृह्णन् विज्ञपयेत् [५२] । नानाभवन्तमन्तर्भूयः [५३] । नैकत्वमर्द्धस्य सुवृहता च लब्धेरनर्हप्रवेशे कारणम् [५४] । अनर्हः संघलाभस्याधर्मपक्षेषु पतितो भिन्नेषु [५५] । उपितत्वं बहुतरमुपितस्य तत्कालके लाभे हानायास्यावृत्तौ मृत्यौ च [५६] । यथाविनियतिलाभस्य व्यवस्था [५७] । लब्धू-

भिश्च [६०] । कृत्स्नप्रतिपादनेऽपि [६१] । कर्मसीम्ना संघस्यापरिच्छेदे परिच्छेदः [६२] । तत्त्वमत्रैकादेः [६३] । धर्मलाभे तद्भाणकानामीशित्वम् [६४] । एकार्पणायाधारणं तत्त्वेऽत्र पर्यन्तः [६५] । अनर्हत्वं भिन्नव्यञ्जनस्येतरसन्निधौ मृतपरिष्कारे [६६] । तथोत्क्षिप्तस्य [६७] । असन्निधौ वा निवृत्ते निमित्ताचेतसि [६८] । अभिन्नत्वमस्य तारा(?)दीयैतद्ग्राह्यतायाम् [६९] । भिन्नत्वं भिन्नस्य [७०] । नान्यस्य प्रव्रजितात् सब्रह्मचारिणस्तदीशित्वम् [७१] । न ज्ञप्त्याधिष्ठिते प्राप्तस्य पूर्वचरमेण वा [७२] । कस्यचित् ततः संघवृद्धनवकयोः दानं तदाख्यम् [७३] । यत्राधिष्ठेयस्य गतता तत्सीमान्तर्गतानामधिष्ठ[ा]तृत्वम् [७४] । अकरणमत्र मरणस्थानता [७५] । सीमान्तरिकात् स्थल(?)ग्रे कायेऽन्यत्र वा यातामाक्रान्तिस्तावद् गतानाम् [७६] । सप्रतिवस्तुकत्वे यत्रासौ तद्गतत्वं परिस्कारस्य [७७] । प्रतिवस्तुकेनान्यस्यमधितिष्ठेयुः [७८] । प्रेषितस्याप्रतिक्षिप्तस्य संप्रदानेन तदीयत्वम् [७९] । प्रतिक्षिप्तस्य प्रेषयितृत्वम् [८०] । प्रतिक्षिप्तस्यापि तेन [८१] । बहिरस्य रूढिः [८२] । सीम्नोऽन्तः संज्ञिना केवलाधिष्ठानम् [८३] । नाकृते निर्हारसत्करणधर्मश्रवणदक्षिणादेशने ऽधितिष्ठेयुः [८४] । अन्तर्गृहस्थत्वे पात्रचीवरस्य यस्मै गृहपतिना दानं तस्येशित्वम् [८५] । अर्हश्चेत् [८६] । विहीनश्च तेन [८७] । अदाने याचितवतः [८८] । क्रमे प्रथमम् [८९] । असत्त्वेऽनुद्देशत्वात् पृष्टौ गतवतः [९०] । तद्वत् क्रमे [९१] । एनिकोद्भूतो तद्देयपरिमाणस्य तद्गामित्वं मृतपरिस्कारस्य [९२] । विभक्तस्यापि [९३] । यत्तेन सार्द्धमवस्थितं तस्य देयत्वं ग्राह्यता वा न तस्यैव [९४] । नानेन सब्रह्मचारिणामृणित्वम् [९५] । राज्ञा(?) दीपित्वं संभावने यावच्च एतत्तावत्सु नावकर्मिकस्य विनियोगः समं स ग्लानोपस्थायकत्वतद्गामित्वं परिस्कारपद्कस्य नाधिष्ठेयत्वम् [९६] । सोत्तमाधममध्यमस्य [९७] । साधारण्यमनेकत्वे तस्य [९८] । प्रक्रान्ततायां ग्लानस्य मृत्यौ तादर्थ्ये देयत्वम् [९९] । नैतन्मृतद्रव्येऽनर्हस्य [१००] । न नान्यत्रोपगते [१०१] । सर्वार्हत्वमत्रानु[प]संपन्ने [१०२] । हायते ग्लानस्योक्तोक्तेन दाने यथोक्तेन दाने यथोक्तं कार्यत्वम् [१०३] । अप्रगमो मृतकालस्वत्वसंपादने धनिनः [१०४] । प्रगमो गृहस्थस्य [१०५] । निर्यात्य गृहिणि मृते पुत्रदारस्य यथासुखकरणम् [१०६] । हस्त्यश्वोष्ट्रखरवेसरसन्नाहानां राज्ञि निर्यातनम् [१०७] । त्रये हिरण्यसुवर्णान्यकृताकृतानाम् [१०८] । रत्नानाञ्च [१०९] । स चेदन्यदेतत् तदंशत्वेनार्थि(?)रिक्तत्वेऽपि न चेदेवमेव बुद्धे मुक्तानाम् [११०] । महारङ्गस्य च [१११] । लेपस्य पिष्टा(?)भिर्गन्धकुट्यां दानम् [११२] । अतदौ(?)बोधिकस्य प्रतिमागन्धकुटिचैत्योपस्करणे विनियोगः [११३] । बुद्धवचनलेखनसिद्धापयोर्धार्मिकस्य [११४] । यानस्य प्रतिमायाम् [११५] । ध्वजार्थं तद्वंशानाम् [११६] । यष्टीनाञ्च तद्योग्यानाम् [११७] । अन्यासान्ना(?)पुधानां संघे [११८] । खक्खरकसूची

शस्त्रकं कृत्वेषां शरणम् [१७]। यथार्हमन्यस्य सांघिकस्य निक्षेपभाजनं भोजनानि क्षेत्रगृहापणशयनासनायस्कारलोहनापितकुलालतक्ष-चरुटभाण्डदासी-दासकर्मकर-पौरुषगोमहिष्यजैडकभैषज्यबुद्धशास्त्रपुस्तकानां सुसाध्यलेखानां प्रथमार्हत्वम् [१८]। शाटकपटकप्रावरकोप्यंनरपुला(?)तैलकुतुपकरकुण्डिकान्यपुस्तकलेख्यवर्णकानां द्वितीयस्य [१९]। तृतीयस्य पञ्चतिलव्रीहिमुद्गमाषावरधान्यान्नपानानाम् [२०]।

॥ [इति] चीवरवस्तु ॥ १ ॥

(२) क्षुद्रकादिगतम्।

सम्रत्वं (?) मण्डलार्धमण्डलमेषु कुर्वीत [२१]। मानार्थं तत्प्रमाणयष्टिधारणम् [२२]। पत्रमुखेषु च [२३]। तत्प्रमाणशलाकाधारणम् [२४]। पर्यन्तोऽस्य प्रकर्षे चत्वार्यङ्गुलानि [२५]। काकवितस्तिर्वा [२६]। अपकर्षे द्वे सार्धे वांगुष्ठोनं वा [२७]। न भूमौ चीवरं वितन्वीत [२८]। कठिनस्यैतदर्थं करणम् [२९]। दारुमयं वंशमयं वा [३०]। चतुरस्रकं कृतबन्धार्थं सूत्रकावकाशार्थं छिद्रं तदाख्यम् [३१]। यावच्चीवरम् [३२]। शस्त्रकेन पाटकम् [३३]। धारयेदेनम् [३४]। काकचञ्चुकाकारं कुक्कुटपक्षकाकारं वा [३५]। नान्यदायसात् [३६]। न कमनमृष्टेन चित्रोपचित्रेण वा दण्डेन [३७]। न षडङ्गुलातिरिक्तस्य प्रमाणम् [३८]। नाष्टेत्यपरः [३९]। निष्प्रयोजनत्वमूनचतुरं[गु]लस्य [४०]। दत्तगोमयोपलेपे सेवनम् [४१]। अभावे गोमयस्य शिक्तसंमृष्टे [४२]। सीव्येदेनम् [४३]। सूच्यापि [४४]। धारयेदेनम् [४५]। नान्यां रीतितात्रकंसमोमयीतः [४६]। ताम्रायसोस्तीक्ष्णयोरित्यपरम् [४७]। धारयेदस्यागृहकं नाडिकं मुष्टिकं वा [४८]। नैतदलजिश्रामणेरयोरधीनं कुर्वीत [४९]। मधुसिक्थप्रक्षिते सूचीशस्त्रकाणां कौटकाभक्षणायनतुके स्थापनम् [५०]। पाशकस्यानपगमाय चीवरे दानं वलकं दत्त्वा [५१]। ग्रन्थिकायाश्च [५२]। न रजकेन रक्तमरक्तं वा वस्त्रं शोचयेत् [५३]। न तद्वत् स्वयम् [५४]। नास्यास्तरे न काष्ठमित्तके [५५]। कुण्डालके शोचयेच्छक्षणे सुखोदकेन शनैः [५६]। परिवर्त्तनं हस्ताभ्याम् [५७]। अशक्तौ पदाभ्याम् [५८]। कल्पते एवं गृहिणां शोचनम् [५९]। अन्यथात्वं चरणमस्य रक्षेत [६०]। सुधौस्युत(?) रक्तं पंसुकूलं धारयेत् [६१]। नाशुचिप्रक्षितं चीवरम् [६२]। शोषणं साधुतायैसंगुल्य(?)रक्तस्य छायातपे [६३]। विना चीलिका(?)ध्वनम् [६४]। आद्वतीयाद् विशिष्टत्वम् [६५]। तस्माद् बहुनान्वित्वे(?) त्रिरादानम् [६६]। हीनतरत्वं परस्य [६७]। तस्मात् पृथक्स्थापनम् [६८]। लेखनमयं प्रथममित्यादि [६९]। पूर्वस्य च प्रथममुपयोगः [७०]। संमृदितचीवरस्य च [७१]। तस्मादपनीय कुण्डालके तन्मात्रमोक्षकस्य दानम् [७२]। प्रधरणं द्रवे [७३]। चित्तलत्वमतिशुष्के [७४]। तस्माद्

मध्यस्य [७५] । कान्तारिकायां साधुशोषणम् [७६] । तत्रापां अन्तलगने(?)नवर्पटकैः [७७] । दुर्धराणां कक्षप्रज्ञप्तौ [७८] । अनेकपार्श्वकृतापैरङ्गस्य संपरिवर्त्तनं पुनः पुनः [७९] । नवरङ्गस्य नवेष्वेव साधु दानम् [८०] । पुराणस्य पुराणेषु [८१] । शोषणं नवानामातपे [८२] । पुराणानां छायायाम् [८३] । पानीयोल्लुकस्याचित्तलतायै दानम् [८४] । अपरेद्युः [८५] । न मेध्यां(?) चंक्रमे वा रङ्गकर्म कुर्युः [८६] । न विहारे [८७] । उपर्यस्य करणम् [८८] । नाचामनिकासामन्तके [८९] । प्रलिप्ते तत्र प्रदेशे दानम् [९०] । शुद्धाप्रवालिप्तश्चेच्छोचनम् [९१] । प्रस्तुते चेद् वातवर्षागमः करणं प्रासादे [९२] । प्रलिप्तेस्तत्र प्रदेशे कृते करणम् [९३] । गोमयेन मृदा वा [९४] । नासंपन्नकल्पाकोटितप्रत्याकोटितचीवरं निक्षिपेत् [९५] । नाशुचौ प्रदेशे [९६] । न गुरुणा सति पराक्रमे भारेणाक्रमेत [९७] । नान्यपरिभोगेन परिभुञ्जीत [९८] । नोच्चारप्रस्रावकरणाशुचिपरिकर्मणेषूत्तरासंघप्रावृत्तिं भजेत [९९] । नासिन्निषद्येत [१००] । न पिण्डपातचर्याभोजनचैत्याभिवन्दनसामीचीकरणं संघसन्निपातवादधर्मश्रवणानुभवनान्यस्यां व्यापृतौ सांघाट्याः [१] । नास्यां निषीदेन्निषद्येत वा [२] । नाक्रम्यैनाम् [३] । नानपने यस्य कस्यचिन्नियुञ्जीत [४] । न कायसंस्पर्शकं परिभुञ्जीत [५] । कक्षघर्मेण दक्षिणस्यास्यां(?)नाननसंपत्तिः [६] । तद्भूत्यै तत्र प्रदेशे वस्त्रस्यास्यां दानम् [७] । अध्यर्धहस्तवितस्तिकस्य [८] । उभयोः पार्श्वयोरष्टसूत्रेण लगनम् [९] । कालेन कालमस्य शोचनं रञ्जनञ्च [१०] । गैरिकेनास्यैतत् [११] । धारयेत् मुखपोच(?प्रोञ्छ)नम् [१२] । श्वेतकायः कायोद्घर्षणम् [१३] । अभ्यन्तरे चीवरादस्य प्रावरणम् [१४] । लग्नस्य कषायोदकेन क्षोदमिश्रेण गते मथित्वा मन्दमन्दमपनयनं पूयशोणितस्य च [१५] । कालेन कालमस्य शोचनशोषणं रञ्च(ञ्ज)नञ्च [१६] । धातुनास्यैतत् साधु [१७] । न यत्र कचन चीवराणि स्थापयेत् [१८] । वंशस्य तदर्थं समायोजनम् [१९] । द्रोणिकायास्तदर्थम् [२०] । क्रियमाणे विहारे [२१] । न कृते छिद्रणम् [२२] । निदर्शनं विहारे परिवेणेऽप्येतत् [२३] । लतारज्वोरस्य(?)संपचिः [२४] । वृषिकया साधु वस्त्राणां नयनम् [२५] । कुर्वीतैनाम् [२६] । त्र्यध्यर्धहस्तकस्य द्विगुणीकृत्य सेवनम् [२७] । मध्ये मुखकरणम् [२८] । जालकस्यात्र दानमसूत्रकेण [२९] । अपरेण बन्धनम् [३०] । उपरि परिभुज्यमानानां स्थापनम् [३१] । अवलोक्य शोणमिष्यत्तायाम् [३२] । गुरूननुज्ञातो गच्छेत् [३३] । कृतस्यावासस्येकादिः [३४] । पर्म्यया वा कथयाध्वनि गच्छेदार्येण वा तूष्णीम्भावेन [३५] । विश्रामस्थाने गाथां भाषेतापा(?)म् [३६] । पानीयग्रहणस्य च [३७] । यस्य तद् पायनीयं तमुद्दिश्य [३८] । अपरां च देवताम् [३९] । वासस्य त्रिदण्डकम् [४०] । धारयेत् कान्तारिकायाम् [४१] । तत्प्रमाणमध्यर्धं शतमुपादाय हस्तानामाशतात् [४२] । देशानु-

रूप्येणेत्यपरम् [८] । न विनैतया दुर्लभाकूपपानीये देशे चारिकां चरेत् [८] । प्रस्फोटितचीवरोऽध्वगः स्नातवां(?त्वा) प्रक्षालितपाणिपादो वा गृहीतपानीयः पोचितो(?)पानके(त्क)स्त्रिचीवरं प्रावृत्य शान्तेर्यापथो विहारं प्रविशेत् [८] । चतुरो वृद्धान् वन्दित्वावतिष्ठेत् [८] । प्राकृते प्रदेशे न्यशब्दः [८] । प्रासादिकः सुसंवृतेर्यः सप्रभवेनास्य प्रतिशामनम् [८] । नाज्ञायमान[:]प्रतिशामयेत् सतीर्थ्यमपि [८] । पिधीतां(?) द्वारं न देयं मृगयते निवार्यो गृह्णान इति प्रत्यायितस्य प्रतीच्छयाव्यु(?)लक्षितवतोपहृतौ विश्वासवस्तुताञ्चोपनीतेन ममैवायं सहाय इत्यादि प्रतिपादनया दास्यत्वम् [८] । अभिज्ञानसंश्रयणमविदितस्यापरेण विशेषगतावुपायः [८] । अर्प्यमाणयातेनान्ते चेत् प्रमीलनम् [८] । प्रश्नस्यानुप्रमादासंपत्तये करणम् [८] । नाशने याचितस्याशुचिनाऽसंपत्तो(?)शोचादिना चित्तग्रहणस्य मूल्यदानम् [८] । पात्रचीवरग्रहणम् [८] । आसनप्रज्ञपनम् [८] । पादधावनेनोपनिमन्त्रणम् [८] । उदकेन च [८] । वन्दनम् [८] । सुखचर्याप्रश्नः [८] । यथाशक्ति संरञ्जनीयकरणम् [८] । अनुरूपशयनासनदानम् [८] । संघस्थविरमुपसंक्रामेत [८] । निःश्रयग्रहणे स चे[दि]नन्नियुञ्जीत [८] । वृद्धश्चेत् शयनासनस्यास्य दाने तद्वारिकम् [८] । न सहसा शयनासनं याचेत [८] । परिपण्डादानमन्तस्य चीवरे ध्वस्तोऽप्रतिविधानं आरापदकैस्तत्संग्रहः [८] । परिवास्याभ्यवकाशे वृक्षाद्युपरि सप्ताष्टान्यहानि पञ्चाशीतीत्यपरं शोचयित्वा शवचीवरं भुञ्जीत [८] । प्रवेदिते श्मश[ा]निकोऽहमित्युपनिमन्त्रितः प्रवेशं विहारकुलयोः परिभोगश्चानुत्सृष्टस्वीकारस्य श्मश[ा]निको भजेत [८] । न सांघिकं शयनासनं परिभुञ्जीत [८] । आव्यामान्ताचैत्यं परिहरेत् [८] । धारयेन्मशकवारणम् [८] । ऊर्णां सणं कर्पासं नतुकं पत्रमञ्जरीञ्च [८] । न हस्त्यश्वगोवालादिमयम् [८] । सर्वत्राकमलमृष्टत्वं चित्रोपचित्रताचार्योशलिके दण्डे [८] । मशककुटिश्च [८] । उपरि शटकवितननम् [८] । दण्डिकायां बन्धनेन [८] । चतुर्धि(? द्वि)हस्तकस्य [८] । पटकेन परिवारणं द्वादशहस्तकेन [८] । सावष्टम्भम् [८] । अथास्य शयनासनेऽवष्टम्भः [८] । द्वारस्य करणं विकर्णकस्य [८] । वीजनं धर्मे प्रतिविधिः [८] । धारयेद् विधमनम् [८] । वारुटंटे(?)तालवृन्तं वा [८] । न चित्रोपचित्रम् [८] । संघोऽन्यदपि [८] । चैत्ये मणिवालव्यजनस्योत्पन्नस्य दानम् [८] । श्रावकस्यापि [८] । धारयेद् वृषिविम्बोपधानचतुरस्रकानि [८] । पुत्रदारलाभे दातृवशेन प्रतिपत्तिः [८] । मोचनं चेदस्यौष्टं तावतो निष्क्रयत्वम् [८] । कल्पये[त्] पुनर्निर्यातनम् [८] । वृक्षे निर्यातितस्यालङ्कारश्चेत् तस्यैवोत्सवेऽलंकरणोपस्थापनम् [८] । भित्तौ छ(?)पने चेच्चित्रणाय [८] । न चेत् स्तम्भे च नवकर्मणे [८] । भूमौ [८] । अग्निशालायां प्रज्वालनिकाकरणम् [८] । स्नेहलाभस्य वा [८]

भाण्डोपस्थापनं ग्लानकल्पिकशालायाम् [१]। भक्तशालायां भक्तकरणम् [२]। पानकस्य पानीयमण्डले [३]। जेन्ताकशालायां जेन्ताकस्य स्नेहलाभस्य वा [४]। स्नेहलाभस्य मण्डलवाटे स्थापनशालायोः (? याम्) [५]। जातकेन(?)-सूत्रं वा [६]। मेढीचंक्रमद्वारकोष्ठकप्र[?]सादेषु भाजनम् [७]। पुष्करिण्या[म्?] च [८]। स्थापनमस्यां चातुर्दिशसांघिकत्वेनेत्ययम् [९]। कल्पते ग्लानार्थं भिक्षणम् [१०]। उद्धोपणं च ग्रहणे [११]। चक्रस्य दर्शनार्थं करणं घर्मवातवर्षोपद्रवेणास्पृष्टे कूप[?]गारस्य द्वारबन्ध(तः) [१२]। प्रय(?)वतः [१३]। महस्रान्ते चक्रस्य धारणम् [१४]। भाण्डगोपकेन लाभस्य गोपनम् [१५]। नानुद्दिश्य द्वयं शास्तृपूजायां दत्ते भिक्षुणीनां सांघिके प्रवेशः [१६]। पृगासामन्ते(?) कस्यां चक्रो श्रू(?)यणे स्थूलात्ययः [१७]। भाजनं भाण्डभाजकेन [१८]। संमतिरस्य [१९]। नाथि(?)क्रीय्याणां [२०]। संघसन्निपाते वर्द्धनेन [२१]। तस्यैवात्र सन्निपातगतमनुष्ठेयं संवस्थविरेण मूल्यस्य करणम् [२२]। मध्यमस्य [२३]। मातस्तस्य पात्यत्वम् [२४]। निश्चित्य पुनरभूतिं वर्द्धनस्य पातनम् [२५]। नाक्रयिको वर्धयेत् [२६]। न स्त्रियम् [२७]। नादत्तमूल्यं परम्परि भुञ्जीत [२८]। संस्कुर्वीत वा [२९]। दशाद्यल्लाभिप्रभृत्ये दायादानां भाजनम् [३०]। दत्ते कस्यचिदविभक्ते बहुगान्मृतौ तद्वर्ग्यगामित्वं तदंशस्य [३१]। अर्हति निर्वाणाशयेन प्रव्रजितः शीलवां(? वान्) शतसाहस्रं वस्त्रं शतरसं भोजनं पञ्चशतं कूटागारम् [३२]। संघद्रव्यञ्च [३३]। आशैक्षात् [३४]। पृथग्जनोऽपि [३५]। न दुःशीलः [३६]। ऋणभूतं कुसीतस्य प्रतिग्रहोपजीवनम् [३७]। अर्हः पौद्गलिकविहारतल्लामोपजीव्यन्तस्सीमतायां संघलाभे [३८]। लयने च नियतस्य [३९]। वारेणास्योद्देशः [४०]। पात्रविपात्रकर्कसिकाविन्दुलाकुञ्चिकाशस्त्रकसूचीनखच्छेदनककटच्छङ्गारस्थापनकुठारीपचनिकासरकानामयोभाण्डेभ्यो भाजयितव्यता [४१]। मृद्भाण्डेभ्यः पात्रविपात्रकपचनिकाघटिकाकरकक्कुण्डककुण्डिकापानीयस्थालकानाम् [४२]। मंचस्य स्रमयादेरयोमयात्तस्य परिवर्त्या [४३]। न काष्ठमयस्य रंगस्य मंचकादन्यस्य [४४]। अकथितस्य [४५]। कथितस्य रञ्जनीये विनियोज्यत्वम् [४६]। संघस्य पत् [४७]। अविक्रियतास्यागमविहारतद्वस्तुशयनासनानाम् [४८]। अनापेयत्वम् [४९]। अनधिष्ठेयता च [५०]। योगं भक्ताच्छादनेन पित्रोरुद्वहेत् [५१]। न चेल्लाभस्य पात्रचीवरादतिरेकस्समादाप्य [५२]। असंपत्तौ भोजनोपनतेरुपार्धस्यादानम् [५३]।

॥ [इति] क्षुद्रकादिचीवरवस्तुगतम् ॥ २ ॥

(३) सपृच्छक्षुद्रकादिगतम् ।

पपर्णं(?)विभागज्ञानाय चीवराणाम् [१]। उपचयानामेषु दानम् [२]।

रूप्येणेत्यपरम् [८१] । न विनैतया दुर्लभाकृपपानीये देशे चारिकां चरेत् [८२] । प्रस्फोटितचीवरोऽध्वगः स्नातवां(?त्वा) प्रक्षालितपाणिपादो वा गृहीतपानीयः पोचितो(?)पानके(त्क)स्त्रिचीवरं प्रावृत्य शान्तेर्यापथो विहारं प्रविशेत् [८३] । चतुरो वृद्धान् वन्दित्वावतिष्ठेत् [८४] । प्राकृते प्रदेशे न्यशब्दः [८५] । प्रासादिकः सुसंवृतेर्यः सप्रभवेनास्य प्रतिशामनम् [८६] । नाज्ञायमान[ः]प्रतिशामयेत् सतीर्थ्यमपि [८७] । पिध्वीतां(?) द्वारं न देयं मृगयते निवार्यो गृह्णान इति प्रत्यायितस्य प्रतीच्छयाव्यु(?)लक्षितवतोपहृतौ विश्वासवस्तुताञ्चोपनीतेन ममैवायं सहाय इत्यादि प्रतिपादनया दास्यत्वम् [८८] । अभिज्ञानसंश्रयणमविदितस्यापरेण विशेषगतावुपायः [८९] । अर्प्यमाणयातेनान्ते चेत् प्रमीलनम् [९०] । प्रश्नस्यानुप्रमादासंपत्तये करणम् [९१] । नाशने याचितस्याशुचिनाऽसंपत्तो(?)शोचादिना चित्तग्रहणस्य मूल्यदानम् [९२] । पात्रचीवरग्रहणम् [९३] । आसनप्रज्ञपनम् [९४] । पादधावनेनोपनिमन्त्रणम् [९५] । उदकेन च [९६] । वन्दनम् [९७] । सुखचर्याप्रश्नः [९८] । यथाशक्ति संरञ्जनीयकरणम् [९९] । अनुरूपशयनासनदानम् [१००] । संघस्यविरमुपसंक्रामेत [१०१] । निःश्रयग्रहणे स चे[दे]नन्नियुञ्जीत [१०२] । वृद्धश्चेत् शयनासनस्यास्य दाने तद्वारिकम् [१०३] । न सहसा शयनासनं याचेत [१०४] । परिपण्डादानमन्तस्य चीवरे ध्वस्तोऽप्रतिविधानं आरापदकैस्तत्संग्रहः [१०५] । परिवास्याभ्यवकाशे वृक्षाद्युपरि सप्ताष्टान्यहानि पञ्चाशीतीत्यपरं शोचयित्वा शवचीवरं मुञ्जीत [१०६] । प्रवेदिते श्मश[ा]निकोऽहमित्युपनिमन्त्रितः प्रवेशं विहारकुलयोः परिभोगश्चानुत्सृष्टस्वीकारस्य श्मश[ा]निको भजेत [१०७] । न सांघिकं शयनासनं परिभुञ्जीत [१०८] । आव्यामान्ताचैत्यं परिहरेत् [१०९] । धारयेन्मशकवारणम् [११०] । ऊर्णां सणं कर्पासं नतुकं पत्रमञ्जरीञ्च [१११] । न हस्त्यश्वगोवालादिमयम् [११२] । सर्वत्राकमलमृष्टत्वं चित्रोपचित्रताचार्योशलिके दण्डे [११३] । मशककुटिश्च [११४] । उपरि शटकवितननम् [११५] । दण्डिकायां बन्धनेन [११६] । चतुर्धि(?द्वि)हस्तकस्य [११७] । पटकेन परिवारणं द्वादशहस्तकेन [११८] । सावष्टम्भम् [११९] । अथास्य शयनासनेऽवष्टम्भः [१२०] । द्वारस्य करणं विकर्णकस्य [१२१] । वीजनं घर्मे प्रतिविधिः [१२२] । धारयेद् विधमनम् [१२३] । धारुटंटे(?)तालवृन्तं वा [१२४] । न चित्रोपचित्रम् [१२५] । संघोऽन्यदपि [१२६] । चैत्ये मणिवालव्यजनस्योत्पन्नस्य दानम् [१२७] । श्रावकस्यापि [१२८] । धारयेद् वृषिविम्बोपधानचतुरस्रकानि [१२९] । पुत्रदारलाभे दाहवशेन प्रतिपत्तिः [१३०] । मोचनं चेदस्यौष्टं तावतो निष्क्रयत्वम् [१३१] । कल्पवे[द्] पुनर्निर्यातनम् [१३२] । वृक्षे निर्यातितस्यालङ्कारश्चेत् तस्यैवोत्सवेऽलंकरणोपस्थापनम् [१३३] । भित्तौ छ(?)पने चेचित्रणाय [१३४] । न चेत् स्तम्भे च नवकर्मणे [१३५] । भूमौ [१३६] । अग्निशालायां प्रज्वालनिकाकरणम् [१३७] । स्नेहलाभस्य वा [१३८]

भैषज्योपस्थापनं ग्लानकल्पिकशालायाम् [१] । भक्तशालायां भक्तकरणम् [२] । पानकस्य पानीयमण्डले [३] । जेन्ताकशालायां जेन्ताकस्य स्नेहलाभस्य वा [४] । स्नेहलाभस्य मण्डलवाटे स्थापनशालायोः (? याम्) [५] । जातकेन(?)-सनं वा [६] । मेढीचंक्रमद्वारकोष्ठकप्र[ा]सादेषु भाजनम् [७] । पुष्करिण्या[म् ?] च [८] । स्थापनमस्यां चातुर्दिशसांघिकत्वेनेत्ययम् [९] । कल्पते रलार्थं भिक्षणम् [१०] । उद्दोपणं च ग्रहणे [११] । चक्रस्य दर्शनार्थं करणं घर्मवातवर्षोपद्रवेणास्पृष्टे कूप[ा]गारस्य द्वारवन्त(तः) [१२] । ट्य(?)वतः [१३] । महस्यान्ते चक्रस्य धारणम् [१४] । भाण्डगोपकेन लाभस्य गोपनम् [१५] । नानुद्दिश्य द्रव्यं शास्तृपूजायां दत्ते भिक्षुणीनां सांघिके प्रवेशः [१६] । पृगासामत्रे(?) कस्यां चक्रो श्रू(?)यणे स्थूलात्ययः [१७] । भाजनं भाण्डभाजकेन [१८] । संमतिरस्य [१९] । नाथि(?)क्रीय्याणां [२०] । संघसन्निपाते वर्द्धनेन [२१] । तस्यैवात्र सन्निपातगतमनुष्ठेयं संघस्यविरेण मूल्यस्य करणम् [२२] । मध्यमस्य [२३] । नातस्तस्य पात्यत्वम् [२४] । निश्चित्य पुनरभूतिं वर्द्धनस्य पातनम् [२५] । नाक्रयिको वर्धयेत् [२६] । न स्त्रियम् [२७] । नादत्तमूल्यं परम्परि भुञ्जीत [२८] । संस्कुर्वीत वा [२९] । दशाद्यछाभिप्रभूत्ये दायादानां भाजनम् [३०] । दत्ते कस्यचिदविभक्ते वङ्गान्मृतौ तद्वर्ग्यगामित्वं तदंशस्य [३१] । अर्हति निर्वाणाशयेन प्रव्रजितः शीलवां(? वान्) शतसाहस्रं वस्त्रं शतरसं भोजनं पञ्चसूतं कूटागारम् [३२] । संघद्रव्यश्च [३३] । आशैक्षात् [३४] । पृथग्जनोऽपि [३५] । न दुःशीलः [३६] । ऋणभूतं कुसीतस्य प्रतिग्रहोपजीवनम् [३७] । अर्हः पौद्गलिकविहारतल्लाभोपजीव्यन्तस्सीमतायां संघलाभे [३८] । लयने च नियतस्य [३९] । वारेणास्योद्देशः [४०] । पात्रविपात्रकर्कसिकाविन्दुलाकुञ्चिकाशलकसूचीनखच्छेदनकटच्छुद्वारस्थापनकुठारीपचनिकासरकानामयोभाण्डेभ्यो भाजयितव्यता [४१] । मृद्भाण्डेभ्यः पात्रविपात्रकपचनिकाघटिकाकरककुण्डककुण्डिकापानीयस्थालकानाम् [४२] । मंचस्य रत्नमयादेरयोमयात्तस्य परिवर्त्या [४३] । न काष्ठमयस्य रंगस्य मंचकादन्यस्य [४४] । अकथितस्य [४५] । कथितस्य रञ्जनीये विनियोज्यत्वम् [४६] । संघस्य यत् [४७] । अविक्रियतास्यागमविहारतद्वस्तुशयनासनानाम् [४८] । अनापेयत्वम् [४९] । अनधिष्ठेयता च [५०] । योगं भक्ताच्छादनेन विनोरुद्धहेत् [५१] । न चेच्छाभस्य पात्रचीवरादतिरेकस्समादाप्य [५२] । असंपत्तौ भोजनोपनतेरुपार्धस्यादानम् [५३] ।

॥ [इति] क्षुद्रकादिचीवरवस्तुगतम् ॥ २ ॥

(३) समुच्छ्रुद्रकादिगतम् ।

पपणं(?)विभागज्ञानाय चीवराणाम् [५४] । उपचयानामेषु दानम् [५५] ।

मपिटिप्य(?)कस्तदास्यः [५६] । उल्लपनकानाञ्च [५७] । दशापाशात् तयोर्वर्धिका-करणम् [५८] । नासांवाट्यां छिन्नाधिष्ठाननियमः नासत्त्वे तद्रूपाणां प्रत्ययाना-मच्छिन्नया ग्रामान्तर्गृहयोरनयोपवेशः प्रवेशश्च [५९] । एवं तीर्थ्यावसथे [६०] । नैव सत्स्वपवेशः [६१] । न रोमविधं त्रिचीवरत्वेनाधितिष्ठेत् [६२] । नैतत् प्रावृति-भोजने भजेत [६३] । स्त्रीकरणं विरलिकायाः [६४] । चातुर्विध्यमस्याः [६५] । और्णिका क्षौमिका दुकूलिका कार्पासिकेति [६६] । अन्येषाञ्च लघूनां पटप्रवाराणां निकटरोमप्रभृतीनाम् [६७] । कोचवस्य च [६८] । न लोमस्य विहेठेऽस्यान्यथा प्रावृतिं भजेत [६९] । नानेनैवं प्रावृते चंक्रम्येत [७०] । नार्याणीकोचवप्रावारचित्र-चिलिमिलिकास्वीकृतिं पुद्गलो भजेत [७१] । प्रतीच्छेच्चंक्रमे चिलिमिलिका-प्रज्ञपनम् [७२] । न नित्यमेकयैव धारया चंक्रमणम् [७३] । शक्यतायां प्रति-संस्करणम् [७४] । सेवनदण्डकार्गडकदानैः [७५] । अशक्यत्वे गोमयम्र(मृ)दा तत्रैव चंक्रमे लेपनम् [७६] । धारणमन्येषां दानपतिविश्वासेन [७७] । धारयेत् प्रतिनिवसन-संकक्षिका-प्रतिसंकक्षिकाः [७८] । परिस्कारचीवरञ्च [७९] । नास्य शौक्ल्ये सदशा-पाशतायां वा दोषः [८०] । न सांघिकस्य [८१] । अधिष्ठाय तत्त्वेनानुज्ञाता चीवरधारणं धारयेदुप(?)रां विकल्पा(?)नेकमपि [८२] । नास्थिरचित्तस्य विकल्पयेत् [८३] । नानुपसंपन्नस्य [८४] । न प्रत्यक्षम् [८५] । न देशान्तरस्थतायां विकल्पस्य ध्वंसः [८६] । ध्वंसश्च्युतौ [८७] । ज्ञातौ [८८] । विकल्पकस्यात्र स्वामित्वम् [८९] । न निःसृष्टं स्वीकुर्वीत [९०] । भिक्षौ निःसृजेत् [९१] । न संघे [९२] । नाव्यक्ते [९३] । याचनमदाने [९४] । ग्रहणञ्च बलेन [९५] । गन्धैः परिशुद्धस्य वाससः शोचयित्वा परिभोगः [९६] । प्रस्फोट्य चूर्णैः [९७] । स्नेहेन विरुक्षयित्वा [९८] । न वर्षत्यभ्यव-काशे सांघिकस्य [९९] । नधावनरङ्गनपात्रकर्मकाष्ठपाटनादिकर्म कुर्वताम् [१००] । सम्यक्त्वं संख्यमनुक्तौ साद्यस्य व्ययचायनिक्षेप्त्रे मनोनुन्मत्तका तज्जाति-तद्गृहादातुं प्रतिगृह्णीत(?त) [१] । प्रतिगृह्णीत प्रणायितात् पुत्रात् [२] । श्मशानाच्च प्रतिनिर्वर्त्तितम् [३] । प्रतिमृगयते दानमस्य [४] । ग्रहणं पुनर्लब्धौ स्तोपिकस्य वृत्तेर्मूलफलेक्षुभ्योऽन्यस्य भक्तार्थस्योद्देशोपजीव्यस्य वा भाज्यत्वं स्वीकाराय [५] । वर्षिकेन सीम्ना लाभस्य प्रवेशः [६] । न छिन्नवर्षत्वेनर्त-त्वम् [७] । नोक्षिप्ततायाम् [८] । एकांशतैवावष्टम्भिद्रव्योऽपि तस्य [९] । स्वसंख्यांशत्वमस्विन्नवष्टम्भानाम् [१०] । भूयस्त्वेनैवान्यत्रानेकत्रोपगतौ व्यव-स्था [११] । वि(?द्वि)तृतीयांशत्वं श्रामणेरश्रामणेरिकयोर्लाभे [१२] । साम्यम-भ्यवहार्ये [१३] । उपसंपत्प्रेक्षशिक्षमाणयोश्च [१४] । पुद्गलशो भिक्षुणीनामंशहरता न संघशः [१५] । नानवच्छिन्नं भोजनमनुलम्भे भिक्षुणीनां भुक्तवत्त्वे तत्रा-प्रवेशः [१६] । नासनोदकपिण्डपातेषु भिक्षो[ः] भिक्षुणीस्थान (?) ज्येष्ठत्वम् [१७] ।

आसनस्य वृद्धान्ते भिक्षुणीभिः सन्निपादे मुक्तिः [१०]। करणं सभिक्षुतायामशक्तौ तेषां भिक्षुण्या दक्षिणादेशनस्य सामान्यं चारयिष्यतीति चारकमाहारस्य प्रत्युपस्थितपादौ दानाय संघस्थविरो नियुञ्जीत [११]। यथासंभवनमित्यवलोक्य पर्षदं प्रभूत्यल्पत्वे भक्तस्य तदाख्यानपूर्वकम् [१२]। यथाविभवने त्वन्यथात्वे [१३]। न चानुद्धोषिते संग्राममिति वृद्धान्त आदौ गृह्णीत [१४]। सञ्जीकृताहारस्योद्दिष्टेभ्योऽपरेषामागतौ तदावेदनम् [१५]। न त्रिचीवरदाने भिक्षुं प्रवर्तयेत् [१६]। नैतज्जीवत्तायाम् [१७]। प्रतिदास्यत इत्यतोऽन्येन मनसा संघः प्रतिगृह्णीयात् [१८]। सान्तरोत्तरेण मृतच्छोरणम् [१९]। मध्येन [२०]। नावशिष्टेन [२१]।

॥ [इति] सपृच्छक्षुद्रकादिचीवरवस्तुगतम् ॥ ३ ॥

॥ समाप्तं चीवरवस्तु ॥ ६ ॥

ॐ

§७. चर्मवस्तु ।

मर्यादा मध्यदेशस्य [१]। पूर्वेण पुण्ड्रकच्छो नाम दावः पुरतः पूर्णवर्धनस्य [२]। शरावत्यास्तदुपाख्या नदी दक्षिणेन [३]। पश्चिमेन स्थूणोपस्थूणौ ब्राह्मणग्रामकौ [४]। उशीरगिरिरुत्तरेण [५]। धारयेत् प्रत्यन्त उप[ा]नहौ [६]। शयनासनगुप्त्यर्थं च [७]। एकपलाशिके [८]। अर्गडिकदानेन प्रतिसंस्करणम् [९]। न पुरान्तरस्य [१०]। सप्त पदान्यन्ततो गृहिणा परिभुक्ते बहुपुटौ अपि [११]। नाकल्पिकस्य कल्पिकमात्रार्थतायां तद्योगवशं ग्रहणमान्तता [१२]। न चित्रोपचित्राम् [१३]। न वेशविपाणिकाम् [१४]। नाश्वत्थकरवीरपनिकाम् [१५]। न सुवर्णरूप्यसचिताम् [१६]। न कोचिकिचायन्तीम् [१७]। न किणिकिणायन्तीम् [१८]। न खिणिखिणायन्तीम् [१९]। न झिणिझिणायन्तीम् [२०]। अन्यद् वा शौटीर्यमुद्वहन्तीम् [२१]। न तिर्यग्वध्रिकत्वस्याकल्पिकत्वम् [२२]। धारयेत् पुरः पार्ष्णिपुटके [२३]। लालाम्बुजाम् [२४]। मुण्डपूलां वा [२५]। पिण्डीभवजने च जनपदे खेलां पूला च [२६]। न मान्यस्य सन्निधावुपानत्प्रवृत्तिं भजेत [२७]। न सिंहव्याघ्रद्वीपिहस्त्याजानेयाङ्गस्य किञ्चित्कायेऽन्वितत्वम् [२८]। कक्षहस्तिखड्गं (?) काञ्च तदन्यचण्डमृगाणामप्येभिराक्षेपः [२९]। नोपानहमास्फोटयेत् [३०]। उदकार्द्रेण नतुकेनैनां विरजीभावाय पोञ्च(?प्रोञ्छ)येत् [३१]। धारयेदेनत् [३२]। अभीयादेनाम् [३३]। प्रतिगुप्तप्रदेशेऽप्र[ा]मादवस्तुनः करणम् [३४]। धारयेत् तदर्थमारां वद्रश्च [३५]। न शस्त्रीम् [३६]। न काष्ठपादुकामागेहेऽन्यत्रान्तर्गृहद(म?)शुचिबुद्(?द्यां) च [३७]। न वंशपत्रगुंजमीरीदर्भाणाम् [३८]। रज्जो(?ज्जो)श्च [३९]। अवातजो(?)णिते [४०]। निषीदेन्नर्मण्यभावेऽन्यस्यान्तर्गृहे [४१]। अत्राप्यत्र तद्रूपे-

प्यपि प्रत्ययेष्वनिपत्तव्यता प्रतिगृह्णीत्(?त) तर्क्षचर्म चक्षुषे (?) [४४]। पादस्थाने प्रज्ञपनम् [४५]। गन्धकुटीद्वारे बोधस्य [४६]। उपानहोः प्रावरणम् [४७]। वाते निपद्या निपद्या च सर्वमर्शःखेतदित्यस्योपभोगः [४८]। रोमसंस्पर्शेनोपकर्तृतां विद्यात् [४९]। बहुपुटत्वेन चोपना(?पान)होः [५०]। अनेकोपरिष्ठेन चैकेनापि [५१]। नानसा(?श्मा)परान्तकेषु चर्म धारयेत् [५२]। न सिंहादेः [५३]। स्नाय्वस्थिदन्तमांसवंसा(वशा ?)नामपि तस्याकल्पिकत्वं यस्य चर्मणः [५४]। धारयेत् तू(?द्)तिम् [५५]। कापायं माणकं वा [५६]। न चित्रोपचित्रम् [५७]। न नाभिशास्तरणे कृत्वा सविधानमगाधमम्भोऽवगाहेत [५८]। शिक्षेत्(?त) तर्तुं प्रविविक्ते प्रदेशे [५९]। न तदगाधे रुरोगा(?)मपाश्रयेत मुक्त्वर्षभम् [६०]। अपाश्रयेत हस्त्यश्वमहिष्पचरान् [६१]।

॥ [इति] चर्मवस्तु ॥ ७ ॥

§ ८. भैषज्यवस्तु ।

(१) भैषज्यवस्तु ।

प्रतिसेवेत भैषज्यम् [१]। चातुर्विधमस्य [२]। ग्लानं प्रत्यप्रथमताम् [३]। सर्वं चोचमोचकोलाश्वत्थोदुम्बरपरुषकमृद्वीकखर्जूरपानानाम् [४]। तद्वच्छुक्तशुक्तदधिमण्डोदश्विन्मण्डकानि दकभिन्नानि पट्टपरिस्रुतानि स्वच्छानि मुखदर्शीनि शरकाण्डवर्णानि [५]। अयुक्तिः प्रागेवं [प]श्चादुपसंपन्नेन स्पर्शनस्य समानव्यंजनेन [६]। हरीतक्यादेः पञ्चकस्य [७]। गुडस्य च [८]। अधिष्ठितस्यास्य भक्षणे ग्लानवच्चमचोद्धो(?)पधिवारिके नवकर्मिणाम् [९]। भक्तच्छिन्नकस्यात्र चाकालिकाभक्षणे च [१०]। पानानियामिकम् [११]। स्वच्छानि [१२]। अतत्त्वात् तद् द्रव्यस्य कालिकं चेदनुपसंपन्नेन मर्दनं परिस्रावणञ्च पटेन [१३]। दाडिमबीजपूरकादन्येष्वेषु द्रव्यम् [१४]। कालिकत्वेऽस्य यामान्तः पर्यन्तः [१५]। अन्यत्वे यस्ति(?स्त)स्मिन् [१६]। अनतिवृत्तावेपो(?)तिवृत्तौ यतः सेत्येक(?) [१७]। तदसदतिरिक्तकालाश्रितावरूढिप्राप्ते तस्यां चागम्यत्वाद् भविष्यतः प्राकृतानामनधिष्ठेयतापत्तेः [१८]। प्रविष्टत्वमत्र रसचूर्णारिष्टयोः [१९]। सौवीरकस्य च स्वच्छस्य [२०]। पूलादिभैषज्यं शूतपच्ल(?श्च)मेतत् [२१]। सर्पिस्तैलमधुफाणितानि सप्ताहिकम् [२२]। सर्वेषां गुडखण्डशक(र्क)रादीनां फाणितत्वेनाक्षेपः [२३]। सर्पिष्टुं सुधायाः [२४]। तैलवच्चं वशानां पञ्च परिस्रुतानाम् [२५]। मत्स्यशुशुशिर(?)मारक्षसूकराणाम् [२६]। आसम्भूयात् ग्लान्य उपयोगः [२७]। स्वस्थतायामासां ग्लान्यानिमित्तं पाचते दानम् [२८]। अभावेऽस्य ग्लानकोष्ठिकायां कपा[यां]जनयोश्च [२९]। यावज्जीविकं मूलगण्डपत्रफलमस्फरित्रामिपार्थस्य [३०]। तद्यथा मुस्तं

वचा हरिद्रार्द्रकमतिविषा [१४] । चन्दनं चविका पद्मकं गुडूची देवदारु हरिद्रार्द्रकम् [१७] । वासककोशातकीपटोलनिम्बसप्तपत्रपत्राणि [१९] । पुष्पानि(?णि) वासकनिम्बधातकीनागानां पद्मकेसरश्च [२०] । हरीतक्यामलकं विभीतकं मरीचं पिप्पली [२५] । जतु [२६] । तद्यथा हिङ्गुसर्जरसः [२७] । स्तपः स्तपकर्णी स्तपाकरः [२८] । क्षारः [२९] । तद्यथा तिलपलाशखर्जिकायवशूकवासकानाम् [३०] । क्षारक्षारश्च [३१] । लवणम् [३२] । तद्यथा सैन्धवं सौवर्चलं विटं सामुद्रं रोमकम् [३३] । कषायः [३४] । तद्यथा आम्रनिम्बकोपाम्वशिरीषजम्बूनाम् [३५] । यावदासं दानं स्नात्वा पुन(?)रसं स्पर्प(?र्श) सकृत् स्नानमिति कषायदानम् [३६] । न विकृतभोजनस्य भैषज्यग्रहणेनान्तता [३७] । यावज्जीविकत्वमस्य [३८] । तदाख्यं पुनरुच्चारप्रस्रावौ स्तन्यपानया(?पानपा)यिनां वत्सकानां विषे तावुपकारौ [३९] । छाविका [४०] । काञ्चनपीतशालाश्वत्थोदुम्बरन्यग्रोधानां सा [४१] । मृचतुरङ्गुलादधोभूमेः साध्वी [४२] । श्राद्धादस्यादानमुपासकात् [४३] । तेन प्रतिग्रहणम् [४४] । मांसभैषज्यस्य चामस्य [४५] । ग्रहणं वस्तूना[म]तः सर्वस्य [४६] । कार्यत्वमस्य [४७] । जरकु(?)चोच्चारयवां(?)श्वेदकालोपयोज्यतायां पाचकृतभैषज्यस्य तदर्थं स्फरेयुः नान्यात् परिशुद्धीत [४८] । पङ्कपरिशु(सु?)ता च दवक्षारी नान्यत् [४९] । कोकोच्चारसांसं(?)चेन्मांसभैषज्यस्य नान्यत् [५०] । पङ्कपरिशु(सु?)तैश्चेद्रसको नान्यत् [५१] । सान्येऽपि सद्भावस्तदद्याचारस्य तस्माद् पूर्वकल्पेन तत्साह्ये प्रवृत्तिः [५२] । नानापन्नस्य रूपान्तरमपूर्वरूपत्वं तस्मान्न विसंपचि(?)तस्य परतः स्वकल्पेनाकल्पनम् [५३] । सम्पद्यते प्रक्षालनेन शक्त(?सक्तु)तण्डुलेषु प्रवृत्तावस्थानस्य स्वमात्रसंख्यता गुडस्य [५४] । गुणत्वेन गुडवत्त्वे प्रतिपत्तिः [५५] । अनुत्थानमधितिष्ठते सन्निहितस्याधितिष्ठेत् ग्लान्यनिमित्तपरिभोगार्थम् [५६] । आश्वकालपर्यन्तात् [५७] । पूर्वभक्ते [५८] । प्रतिग्राहितम् [५९] । रक्ष्योऽप्रतिग्राहितसन्निहितसम्पर्कस्तस्मान्निर्माद्य हस्तौ [६०] । नोद्गृहीतसन्निहिताप्रतिग्राहितान्तरुपितपक्वभिक्षुपक्वेष्वधिष्ठानस्य रूढिः [६१] । सन्निहितत्वं रसाच्छता परिवृत्तौ [६२] । नाधरेण सार्धमधिष्ठितं परिभुञ्जीत [६३] । निदर्शनं भैषज्यानुक्रमः [६४] । प्रतिसेवेतांजनम् [६५] । नाभैषज्यार्थम् [६६] । योग्यमस्य भाजनम् [६७] । रसाञ्जनस्य समुद्गकः [६८] । गोणिकागुडिकांजनस्य [६९] । पुष्पकल्कं चूर्णांजनानां नाडिका [७०] । धारयेच्छलाकाम् [७१] । ताम्रलोहयोस्साध्वी मणिभृतयोः [७२] । धारयेदाम्राधिकः कच्छपुटं भैषज्यनिधानाय [७३] । स्वसंभवतां तत्र भारीकृत्य सूतं वा निधानम् [७४] । नोपणतः कालेन कालं निहितस्य पौत्यानुपगतिः [७५] । छायातपे [७६] । वीर्यस्य शोषे हानिः [७७] । अनपनेत स्वयमुपपन्ने विनाशहेतोरभावेऽनु[प]संपन्नस्य [७८] । धारयेद् भैषज्यशरावकम् [७९] । भैषज्यकटच्छुकम् [८०] ।

विपीदनके चानुपातपट्टकम् [११]। आवाधिको लवणम् [१२]। नाडिकस्य साधु स्थानं साङ्गा(?) [१३]। गोमयेन परिक्रयितस्य [१४]। विधानकस्य तद्विरहादोषाभावाय दानम् [१५]। अतन्मयस्यैव [१६]। गन्धपरिभाविनां मृदं(दां?) [१७]। पानीयतापनार्थमयस्पिण्डम् [१८]। उपयोजयेत् सर्वः [१९]। शृङ्खलायास्तप्तोत्क्षेपार्थं तत्र लगनम् [२०]। आर्द्रमृत्तिकया तापनकाले तदवष्टम्भः [२१]। नास्त्यामिषोपदेहस्य भावेऽवस्थानम् [२२]। कल्पिकस्य पूर्वं तापनं पश्चात् प[ा]रिमोगिकस्य [२३]। मजनं वस्तिचिकित्सितस्य [२४]। स्थूलमत्रान्यथाशक्यतायां व्युत्थापनस्य [२५]। मणेर्लोहस्य यात्र नाडी साध्वी नायसः [२६]। तद्वत् शस्त्रचिकित्सितम् [२७]। नैतदन्यत्रिरावेधान्मुखे भजेत [२८]। नार्शसां छेदम् [२९]। अन्येनापि शस्त्रात् [३०]। मन्त्रौषधाभ्यामेषां चिचिकित्सनम् [३१]। न प्रदुष्टेन चिकित्सयेत् [३२]। न रात्रिरभ्यवहारे विचिकित्सायामप्रतिरूपा [३३]। अनाशक्यमत्राप्रतिग्राहितसन्निहितयोरकल्पिकत्वम् [३४]। पानं विचिकित्सायै धूपवर्त्तेः नेत्रिकयास्य सम्पत्तिः [३५]। अयोमय्याः करणम् [३६]। द्वादशाङ्गुला साध्वी न तीक्ष्णा परुषा वा [३७]। स्थविकायां निधानं प्रक्षयित्वा सर्पिषा तैलेन वा [३८]। नागदन्तके चीवरवंशे वा तस्या[:] स्थापनम् [३९]। निर्मादनार्थमग्नौ प्रक्षेपः [४०]। करणं नस्तकर्मणः [४१]। नस्तकरणे नास्यसंपत्तिः [४२]। ब्य(? अ)तीक्ष्णचंचुकं साधु [४३]। कारणमस्य [४४]। प्रतिसेवेत तामनांसं भैषज्यार्थे [४५]। भुक्त्यै तस्यासक्तवत उपायः [४६]। पिधानमक्ष्णोः पट्टकेन [४७]। भावनं सुगन्धिनानुत्थानाय [४८]। अपेततायां पलिगोध(?)स्य स्थितत्वे च मनोज्ञस्य पुरतः खाद्यभोज्यस्य मोक्षः [४९]। स्थूलमन्यार्थेऽस्यास्याम् [५०]। सर्वत्र मानुषमांसस्य [५१]। नोद्दिश्यकृतं ज्ञात्वा मांसं भुञ्जीत [५२]। न व्याघ्रशेषम् [५३]। न हस्त्यश्वनागानाम् [५४]। नैकशुरशृगालमर्कटकाकेटककाकगृध्रबलाकामपकालिकोलूकतत्तदन्यकुणपखादकपक्षिवकजान्तु(?)ककोपलब्ध(?)गण्डूपककृमीणाम् [५५]। प्रतिक्षिप्तमयतामेति मांसं प्रतिग्राहयन्तं पृच्छेत् [५६]। प्रथमोऽनेकत्वे [५७]। अन्तरोहापनायाम् [५८]। अपेयत्वं हस्तिमानुषक्षीरयोः [५९]। अदुष्टं त्वग्व(ग्र?)णदेहनस्यदानाक्ष्यञ्जनमभक्ष्येण [६०]। पेयत्वं ग्लानेन मूर्छितस्य [६१]। सर्पिषा तैलेन चामद्यस्य [६२]। निर्दोषममद्यत्वे [६३]। संपत्तिरस्य क्वाथात् [६४]। प्रक्षिप्तभर्जितयवस्यास्य भूमौ निहितस्य युक्ते त्वोपगतिः [६५]। भवत्यनुपगतिः [६६]। मद्यत्वे क्वाथेन द्राक्षारसस्य [६७]। नाव्यवपृ(?)क्ततायामस्तित्वम् [६८]। सत्त्वं वासनाभूतत्वम् [६९]। पानं मद्यतद्वि(?)गमाय मद्यगन्धपरिभावितमूलगण्डपत्रपुष्पफलभैषज्यशुष्कचूर्णोदकस्य [७०]। समद्ये भाण्डे लम्बनस्थापनेन परिभावनम् [७१]। रक्ष्यस्संसर्गतस्मादने विगतवेगतायाश्च [७२]। तथा विस्रीकरणेनाकालपाने चामिषेण [७३]। प्रासादिकश्च साधु

तस्माच्छुक्लनत्रकेन सूतीकरणम् [५५] । अपानं ग्लानेन मद्यस्य कुशाग्रेणापि [५६] । अदानश्च सर्वेणोपासकात् [५७] । चिकित्सार्थतां मुक्त्वेत्यप्रकृतिसावद्ये सर्वत्र शेषः [५८] । न लशुनं पलाण्डुं गृञ्जनकं वा परिभुञ्जीत [५९] । प्रतिगुप्तिप्रदेशे ग्लानः [६०] । नोपयुञ्ज[ा]नः परतश्च सप्ताहं लशुने पलाण्डौ त्रिरात्रमेकरात्रं गृञ्जनविहारं(?)परिभुञ्जीत [६१] । शयनासनम् [६२] । न वर्चकुटिं प्रवेशयेत् [६३] । न प्रस्रावकुटिम् [६४] । न संघमध्येऽवतरेत् [६५] । नोपविचारे चैत्यस्य [६६] । व्यामोध्व (?) प्रमाणम् [६७] । न गृहिभ्यो धर्मं देशयेत् [६८] । न कुलाक्षय(?श्रयं) संक्रामेत [६९] । न जनाकीर्णान् प्रदेशान् [७०] । स्नानमन्ते [७१] । अपनयनश्च चीवराणां गन्धस्य [७२] । शोचनधूपनाभ्याम् [७३] । आयुष्करा दुर्भिक्षे [७४] । वाह्यवत् पाकवायसोरधिष्ठितं कल्पिकत्वेन [७५] । अधितिष्ठेन्न वृक्षमूलहस्तिशाल-तीर्थिकावसथराजकुलवस्तु भिक्षुणी वर्षकविहारमेधी(?दी)द्वारकोष्ठकप्रासादजेन्ता-कोपस्थानशालाम् [७६] । अभ्यवकाशाग्निशालाचैत्यवस्तु गृहपतिवस्तूनि चै(?चै)-त्यपरः [७७] । साधनपचनस्याप्यात्राकारणम् [७८] । पञ्चोपस्करणश्च [७९] । चत्वा-रात्र(?)कालाः [८०] । प्रथमाष्टकान्यस्य मानत्वमूर्ध्वं(?र्ध्वं) सनवकर्मत्वम् [८१] । अन्यदानपगत(?)भिक्ष्वधिवासनत्वम् [८२] । निरेतदोधिवसनाम(?) भिक्षूणां संप्राप्तिः [८३] । आकृत्यान्तरारम्भप्रतिशान्तिभ्यां तत्त्वम् [८४] । सर्वत्र संघः कर्मणा [८५] । प्रथमयोः पुद्गलोऽपि [८६] । नवकर्मिकः [८७] । केवलोऽस्याद्या [८८] । भाषणतः [८९] । अवधाने द्वितीये संबहुलानां भिक्षूणाम् [९०] । यावन्तस्ता[वा?]न्त स्सन्निहिताश्चतुर्थे संमं(?)कल्पिकशालाम्बाङ्(?) भावकवचनोदाहारतः [९१] । नान्ये कस्यैकस्य यानाया(?)विहारस्य कृत्यकरणमप्रासादिकम् [९२] । न पृथग्भूत-स्यैतत् कल्पिकत्वमुक्तम् [९३] । भुञ्जीत भिक्षु[ः] पकोद्गृहीतप्रतिगृहीते [९४] । पुरो-भक्तिकाम् [९५] । पेयान् सर्वदा [९६] । प्रागप्रतिग्राहितं प्रध्नार्यो(?)स्थितः [९७] । उत्तिष्ठेत् तदान्यै [९८] । शिष्टम् [९९] । अभिनिर्हृतम् [१००] । निर्हरेदेनत् [१०१] । अनस्थिकानि [१०२] । तदाख्यम् [१०३] । तद्यथा द्राक्ष्यदाडिमखर्जूराक्षोट्टौ(?ट) वाताम उरुमानरामापिकाकुरुमायिकानेकोचोवभूः(?) पिञ्चितिकापुष्करश्च तदाख्यम् [१०४] । तद्यथा विम्मं(?)मृणालिकावेट्टशालूकं पद्मकर्कटिका [१०५] ।

॥ [इति] भैषज्यवस्तु ॥ १ ॥

(२) क्षुद्रकादिगतम् ।

न राज्यमुपार्धस्य प्रतीच्छेत् [१०६] । प्रतिगृह्णीयात् संघार्थं ग्रामान् [१०७] । क्षेत्रञ्च [१०८] । नैतदभ्युपेक्षेरन् [१०९] । भागेनास्य दानम् [११०] । मार्गणं मार्ग्यस्य [१११] । कृष्टवतोऽस्य विरते नेयत्वम् [११२] । प्रथमतरमात्मीयात् [११३] । रक्षणाय भिक्षूणां नियोगः [११४] । नाप्रज्ञायमानाय व्ययो भयान्यतरे गणनां मृगयेत् [११५] । अन्यत्र

स्मृतिसंप्रजन्यपुर[:]सरस्तत्र प्रवर्त्तेत [१७] । प्रतिगृह्णीयात् संघार्थमुपस्थायकान् [१८] । यतो नागतिः शब्दस्य विहारे तत्र कल्पकारमापनम् [१९] । देयत्वं भक्तस्य करणं चेत् कर्मणः [२०] । गोमहिष्याजडकहस्त्यश्वोष्ट्रगर्दभामधान्यभाजनं च न स्तूपस्यैषामकल्पनम् [२१] । धारयेत् कलाविकालवणपातलिकाश्च [२२] । नाभ्यामनुपानपट्टकाद्यान्यत् कंसभाजनं पुद्गलो धारयेत् [२३] । उपस्थापयेदारामिकम् [२४] । ग्रहणं रक्षायै प्रतिपाद्यमानानामप्यन्यानां समानव्यञ्जनानाम् [२५] । आसक्तकण्ठचीवरकत्वमेषां वेषः [२६] । कल्प्यां वा प्रतिपालनमनुकम्पारतेन [२७] । ग्रहणं तत्(ज)ज्ञात् पु(?सु)संकृतस्य [२८] । निपा (?)यत्वेन चान्ते [२९] । तैश्च कृतज्ञतया [३०] । नैतन्मूल्यं याचेत [३१] । स्वीकुर्यात् फललाभम् [३२] । घृततैलमधुफाणितघटान् [३३] । तद्भाजनश्च [३४] । स्थापयेदेनामाधारके [३५] । अनुपभोज्यत्वमुच्चारप्रस्रावमद्य (?) घटानाम् [३६] । प्रतिजागृयात् संघार्थयोः साधनपचनयोः [३७] । नापार्श्वनिहितानां प्रागावात् पात्रस्य पिण्डाय प्रवृत्तौ भजेत [३८] । पिण्डोपधानं धारयेत् [३९] । अनाशंक्यमत्र लोहभाण्डाधारणे चासाधारणत्वम् [४०] । अकल्पिकत्वं च ग्लानाय चेलाभरणस्य [४१] । नाविशरावकेण पिण्डाय कुलं प्रविशेत् [४२] । धारयेदेनम् [४३] । निष्काश(?स) प्रवेशकौशले प्रयते[त] [४४] । अभिज्ञानकरणेन पिण्डापाता (?) च करादिना [४५] । न धर्मत्र[ा]णिज्यय[ा] जीवितं कल्पयेत् [४६] । शोचनमसंभवे जलस्य दध्यादिमण्डेन पादयोः [४७] । निपदनं पिण्डके [४८] । स्थापनमेकान्तेऽभ्यवकाशे [४९] । राशीकृत्यापि [५०] । प्रमीलनमन्ते [५१] । करणं प्राभू(?)त्ये पाटिकानेकत्वस्य [५२] । शतपंचकशः [५३] । प्रतिवृद्धान्तमुपन्वाहारः [५४] । अधिष्ठापकानामपहर्तृत्वे वा करणमुद्देशः [५५] । प्रथमतरं भोजनव्यापारिकैः भक्तिः [५६] । यथा घृद्धिकया विपादनाय दापनाय च महासन्निपाते भिक्षूणामुद्देशः [५७] । निपीदेयुः द्वित्रावर्जा (?) यथेष्टमत्र भिक्षुण्याः [५८] । अल्पशब्दोऽभ्यवहाराग्रं गच्छेत् [५९] । सूपं वृतेर्यः [६०] । प्रासादिकः [६१] । एवं तिष्ठेत् [६२] । नाभ्यावहार्यं पादेनाक्रामेत् [६३] । न पदा पात्राधिष्ठानं स्पृशेत् [६४] । स्मृतिमुपस्थाप्याविक्षिप्तचित्त[:] पिण्डपातं गृह्णीयात् [६५] । अनवकिरन् पात्रामात्रकम् [६६] । असंमिश्रयन्नेव (?) [६७] । अनान्वालयम् [६८] । सुप्रतिच्छन्नम् [६९] । अनिपातं कालमभिनिर्हरेत् [७०] । न येन मन्त्रितः ततोऽन्यस्य लब्धैः स्वीकारेऽस्त्ययुक्तत्वम् [७१] । निर्दोषत्वं स्वभोजनेऽन्यप्रतीष्टेः [७२] । तदन्तर्गतपदन्योपनिमन्त्रणे निपण्णस्यानुज्ञातं तेनादत्तम् [७३] । अभिप्रेतेनार्थेन शब्दप्रयोगे व्यवस्थानप्रसिद्धेन [७४] । नान्तं विसर्जयेत् दृष्टिशीलसम्पन्नाभ्यामान्तस्यान्यत्र यथासंख्यं दानमतिरिक्तस्य चालोपाद् यात्राकारिणो ग्रहणम् [७५] । भोगश्च विनिपातनं

श्रद्ध[ा]देयस्य [१०]। मात[ा]पितृग्लानपुत्रस्या(?)पेक्षकुक्षीमतीभ्यो विनेयाकांक्षापिण्डपातं स्पृष्टवते गृहिणे च संप्राप्ताय संविभागश्च ततः करणम् [१०]। आलोपपिण्डां(?) स्थापयेत् [१०]। अव्यवच्छिद्य भोक्तारम् [१०]। तिरश्चे च दद्यात् [१०]। नानवशि(?सि)ते भक्त्यर्थमुपनिक्षिप्ताद् ददीत [१०]। न निमन्त्रणके श्रद्ध[ा]देयत्वेन पात्राधिष्ठानेऽस्योच्छिष्टाशिलां(नां?) यथा सुखकरणम् [१०]। नैवासिकानां बलिदानम् [१०]। तत्कल्पानुगत्या पूर्वाह्णादौ [१०]। भिन्नकल्पत्वे भेदेन [१०]। नावर्धको किलिकभावस्थामात्रं भक्षयेत् [१०]। नाकल्पिकत्वं मूलगण्डपत्रपुष्पफलखादनीयौदनकुल्माषमत्स्यमांसापूपक्षीरदधिनवनीतमत्स्यवल्लूराणाम् [१०]। अनाशङ्क्यमुद्गसार्षपमूलगण्डपत्रपुष्पफलादियवागूनामनिषेध्यत्वम् [१०]। ओजस्करत्वं दू(?धू)तस्योदकेनापि [१०]। नाकल्पिकत्वं इति गतस्य [१०]। कल्पते भाजने भोजनम् [१०]। यार्या(?दार्व्या) [११०]। शिलामये च [११]। कृतभोजनेऽपि निःश्रितव्यापारो निर्मादनम् [११]। भुक्तेऽपि [११]। नापरेण सार्द्धमेकत्र भाजने भुञ्जीत [११]। भुञ्जीताध्वन्यसंभवे भाजनानां भिक्षूणाम् [११]। उद्धृतेऽन्यस्य हस्ते संप्रक्षिपेत् [११]। श्रामणेरे च सार्द्धं परवद(?)योगे कल्पकारकानां पिण्डीकृत्य दानम् [११]। ज्ञातिना सर्वत्र हार्दे(?)न प्रार्थितः [११]। प्रतिगुप्ते प्रदेशे [११]। रक्षत्वमनपेप्(?क्ष्य)प्रतिग्रहध्वस्तेनप्रतिग्राहितसंपृक्तेश्च [११]। न सोपानत्था(?त्को) भुञ्जीत [११]। आक्रम्य ग्लानः [११]। न नग्न एकचीवरो वा [११]। अनापत्तिर्ग्लानस्योपस्थायकोऽस्य गुप्तिं कुर्यात् [११]। संकाक्षिकां शक्तौ संश्रयेत [११]। गुप्तश्च प्रदेशम् [११]। नेदमित्तो वा देहीति भोजनार्थमुपविष्टः परिवेष्टारं बोधयेत् [११]। अनापत्तिर्ग्लानेऽनुक्तय(?युक्त)स्य [११]। तद्यथा, मन्दाग्नौ पक्वस्यामस्य दीप्(प्)ताग्नौ ग्लानसंज्ञाम् [११]। स्वत्रोपस्थाप्य भुञ्जीत भैषज्यसंज्ञामाहारे [१२०]। स्मृतिश्च [१२०]। समुदागमसादृश्यपरिणतप्रत्यर्थिकत्वनिष्यन्दं प्रतीत्य विधिपरीष्टिपराधीनत्वम्म(?)व्यावाधिकत्वप्रत्येकगततात्तिरास्थितप्रातिकूल्यम् [१२०]। उपस्थितस्मृतिः [१२०]। अविक्षिप्तः [१२०]। संप्रजानन्नल्पशब्दः [१२०]। अकुर्वन्नेनम् [१२०]। अनुत्थापयन् यवाग्वाम् [१२०]। अमटमटायमानः [१२०]। मृदुकरणं शब्दकृतामुदकादिना [१२०]। न तद्भुक्त्यर्थं वाद्य(?)मानत्वे [१२०]। न देशनाक्रियमाणतया प्रतिसंवेदितस्य [१२०]। अल्पये कालस्य द्वित्रयोगार्थयोः [१२०]। गाथां भुक्त्वा भाषेत [१२०]। दक्षिणादेशन-धर्मदेशनयोः निमन्त्रणकं भुक्त्वा करणम् [१२०]। निर्शाय भुक्तिवतां(?) सर्वेषाम् [१२०]। अवलोकनेन [१२०]। प्रथमेनानेकत्वे [१२०]। अशक्तावध्येषणं प्रतिबलस्य [१२०]। अकृते चेद् गमनप्रत्ययः परिवारदानं भिक्षूणाम् [१२०]। चतुर्णामन्ततः [१२०]। गमनप्रत्ययेऽत्र दन्तस्याव-

लोक्य [१०]। नन्दोपनन्दयोर्दक्षिणादेशने नामग्रहणम् [११]। निगिलेष्व(?) नाडिकोकालोद्गरान् द्विरानादौ छोरयित्वा मुखं निर्माद्य [१२]। नैतन्नाभिपम् [१३]। तस्मान्मुखमकाले प्रवारितश्चोद्गारारामे निर्मादयेदन्यः [१४]। नाप्रज्ञप्ते प्रदेशे श्लेष्मानं छोरयेत् [१५]। न परिकर्मिते [१६]। नैतत् छन्दं वा स्थविरस्य पुरतष्कुर्यात् [१७]। न मुञ्जानस्य [१८]। न पुनः पुनः शिष्टस्यापि [१९]। अन्येनाशक्तौ प्रक्रमणम् [२०]। नान्यस्यास्पर्शकरणम् [२१]। नक्ताध्यकप्रश्नः [२२]। चंक्रमणे नान्येन वा प्रक्रमणम् [२३]। पात्रमस्य हस्तिपदवुभं साधारकस्य [२४]। तप[ः] स्थापयेदेनम् [२५]। क्षोदकवालुकछायिकानां धारणं मक्षिकाणां प्रतिविधेः [२६]। अदुर्गन्धीभावप्राणकासंभवाय कालेन कालं शोचनं शोषणञ्च [२७]। तत्कालार्थमपरोपस्थापनम् [२८]। अविघातार्थं कोणस्तम्भपार्श्वे विहारस्य [२९]। चतुर्णामपि श्लेष्मकटक(?कानां) स्थापनम् [३०]। न सशब्दं वातकर्म कुर्वीत [३१]। नाधो वृक्षस्योच्चारप्रस्रावम् [३२]। मुक्तानिरवकाशत्वं तैरट्ट(?ट)व्याम् [३३]। कण्टकिनश्च [३४]। करणं वर्चष्कुटेः [३५]। विहारे चेदुत्तरपश्चिमे पार्श्वे [३६]। क्षोमस्य तमङ्गस्य वा [३७]। कण्टकिनामधो वृक्षाणां रोपणम् [३८]। पादकयोरुपछिद्रमुपरि दानम् [३९]। कुण्डिकास्थानकरणम् [४०]। विकर्णाकारया द्वारम् [४१]। कपाटस्य दानम् [४२]। कटकार्गढयोश्च [४३]। शब्दनं प्रविविक्षता [४४]। सूते तत्र च प्रविष्टेन [४५]। सुसंगृहीतचीवरः प्रविशेत् संप्रज[ा]नन् [४६]। मध्ये निषीदेत् [४७]। शनैर्लिंपनकुटिपादुकं कुर्वीत [४८]। नानागतमागमयेत् [४९]। नागतं विधारयेत् [५०]। न तत्प्रतिबद्धकार्यादन्येनर्थ(?न्यर्थेन?) तत्समीपे तिष्ठेत् [५१]। प्रतिदिनं शोचनमुपविचारिकेन [५२]। मृत्पात्रोपस्थापनञ्च [५३]। नाप्रज्ञप्ते प्रदेशे प्रस्रावं कुर्यात् [५४]। नानेकत्र [५५]। प्रोढौ गर्तायां स्थानयेत् [५६]। करणं प्रस्रावकुटेः [५७]। पार्श्वेऽस्याः [५८]। तमङ्गस्य [५९]। प्रनाडिकादानम् [६०]। समानमितरत् [६१]। करणं छिद्रपीठस्य चोदनारोगे [६२]। संवर्तनेन बालस्य [६३]। असंपत्तौ छेदनम् [६४]। सामन्तके दुःखनं चेत् पात्रवैभङ्गकानां दानम् [६५]। रक्ष्यो भूमिनाशस्तस्मादप्कर्य(?)करस्य [६६]। नान्यु(?त्यु)च्चासाधु [६७]। कालेन कालमदुर्गन्धतायै शोचनम् [६८]। शोषणं प्रक्षणञ्च कटुकतैलेन [६९]। तत्कालार्थमपरार्जनम् [७०]। असंपत्तौ पतलिकाधारत्वेनोपयोगः [७१]। कृत्वोच्चारं तत्करणशुद्धेत् (?) [७२]। न तीक्ष्णेप(?न)तृणकुर्वकेन वा [७३]। नतुकपत्तलिकपत्रवैभङ्गकलोष्ठकाष्ठानामत्र साधुत्वम् [७४]। द्वाभ्यां च मृद्भ्यां शोचयेत् [७५]। प्राक् स्थापिताभिः प्रविभागेन मृद्भिरुत्तरः शौचः [७६]। सशनैर्मन्दमन्दमनाशयतावित्कम्भिनाचमनिकापादुकाम् [७७]। सप्तभिर्वामस्य [७८]। सप्तभिरुभयोः बाह्वोः शोचनम् [७९]। पुनः हस्तयोर्मृदा [८०]। अपराया[ः] कुण्डिकायाः पाद-

प्रक्षालनम् [१] । निर्दोषं शू(?)ते कुक्षेः प्रागन्तात् प्रोञ्छनमात्रं कृत्वासनं नातोऽन्यः [२] । सत्युदके नामान्ते निषीदेत् [३] ।

॥ [इति] क्षुद्रकादिभैषज्यवस्तुगतम् ॥ २ ॥

॥ समाप्तं भैषज्यवस्तु ॥ ८ ॥

ॐ

§९, कर्मवस्तु ।

(१) कर्मवस्तु ।

विध्युत्क्रमे कर्मणो रूढिः [१] । नाथाव्यथुतो(?) [२] । नारूढिं कुर्यात् [३] । शक्तिराचनाप्रतिमोक्षोद्देशप्रवारणास्तत् [४] । नाधर्मेण कुर्युः [५] । न व्यग्राः [६] । न गणस्य [७] । नासंघभूताः [८] । विंशतिप्रभृतीनामावर्चने संघत्वम् [९] । उपसंपदि दशप्रभृतीनाम् [१०] । विनयधरपञ्चमादीनां प्रत्यन्तेष्वसंपत्तौ [११] । शिष्टे चतुःप्रभृतीनां हिरुक्त्वं भिक्षुणीनाम् [१२] । कर्मणि प्रवारणं भिक्षुसंघेऽपि [१३] । पोषधसंपन्नसामग्र्याणां तेन [१४] । छन्दपोषधहरणेन तत्संपादनम् [१५] । द्वयोरत्र व्यापृतिः [१६] । प्रतिबलत्वमनयोः [१७] । अभाव एकस्याग्रहीद्वाभि(र्भि)क्षुसंघेन नियोगो भिक्षोः [१८] । द्वारकोष्ठके तेनावस्थानम् [१९] । पलायमानस्य संज्ञपनम् [२०] । तेनास्यैतत् [२१] । न पलायनम् [२२] । अज्ञातो नाम गोत्रप्रश्नः [२३] । मानास्य-वर्त्तणं(?) द्वयोस्साग्रे तयोः [२४] । उपसंपादनञ्च [२५] । द्वादशवर्गोऽत्रासाम् [२६] । सपूर्वसंवृतिद्वयपर्यदनलपर्यदुपस्थानसंवृतिदानेऽन्तः संघस्य [२७] । कल्पिकम-शक्तौ कर्मकारिकायानितीरितं तया भिक्षुणा कृतं वचनम् [२८] । यस्मात् तूष्णीमित्यतः प्राक् [२९] । नासन्निपादस्यस्य पूरकत्वम् [३०] । न यस्य क्रियते तस्मादसत्त्वं पूरकत्वस्य छन्दपरिशुद्धिर्निषेः [३१] । अर्हत्त्वमनयोः [३२] । असम्मतिप्रकारकत्वेन [३३] । नानुपसंपत्कध्यस्ता(?)नन्तर्पकृत्पापदृष्टिभूम्यन्त-स्थनानासंवासिराचम् [३४] । सस्खलितस्य च [३५] । संघरकरणीयेनापि [३६] । भवत्यधिष्ठानेन शुद्धत्वम् [३७] । न शक्यतायाम् [३८] । शक्यत्वं तदानने शुद्धप्रायश्चित्तिकप्रतिदेशनीयदुष्कृतप्रतिकरणस्य प्रतिग्रहीतृसद्भावे देशनामात्र-कत्वात् [३९] । यथा संघमापन्ने प्रतिपद्येत [४०] । न्याय्यमेवं नाशनं चैकस्य [४१] । प्रतिकरणञ्चानेकधा [४२] । नैषां कर्तृत्वम् [४३] । उद्देष्टृत्वं सावशेषं प्रतिक्रियायाम् [४४] । वर्त्तमानस्य नातोऽन्यै(?)भिः सथुतं कुर्युः [४५] । उत्सृज्य वर्जितमनावृत्तम् [४६] । उत्क्षिप्तश्च स्वकर्मणि [४७] । अन्न(?न्त)ः पृच्छार्थं शास्त्रिप्रभृतौ चोपयमानम् [४८] । दर्शनोपविचारस्थातायां सांमुख्यस्य [४९] । निवे(?)दनेनानुधारणस्य तत्करणीये संपादनम् [५०] । असंमुखीभूतस्य विहारो उन्मत्तकानन्दनानालपनासंभोग-

संवृतयः (५) । नाज्ञपिते तदर्थे वाचना (६) । तत्सीमान्तर्गतस्यार्हस्य पूरणे कायतः छन्दतो वा संनिपादेऽननुप्रविष्टत्वं प्रतिक्रोशन्ता च यस्य तत्कर्म ततोऽन्यस्य प्रतिकूलं चेत् धर्मं वाच्युतस्येर्यापथात् प्रकृतिस्थस्य संयतस्य वा चोत्सृज्यानभिज्ञसान्तराद् व्यग्रत्वम् (७) । मृषावादप्रहृत्वमसंयतिर्वाचा (८) । पैशुन्ये पारुष्ये संभिन्नप्रलापे च (९) । अप्रकृतिस्थत्वमत्र चान्यत्र वा करणीये करणीयकृतौ च (१०) । च्युतिरीर्यापथाद् विप्रक्रमणचित्तेन प्रवृत्तस्यास्योत्सृष्टिः (११) । संघे दृष्टिमाविष्कुर्वीत (१२) । नान्यत्र (१३) । नानुपसंपत्क[ः] (१४) । अनर्हे वा पूरणायाम् (१५) । नानवशेषत्वे (१६) । संमन्येरन् साधुतरबहुतरकारिणं संमतमपसार्य (१७) । न नियम्य कालं पौनःपुन्येऽन्यत्र वा (१८) । दध्युरन्यत्र यावदर्थं परिहारम् (१९) । शलाकग्रहणेनाभावे संमतस्य भाजनम् (२०) । यस्य पूरणेऽनर्हत्वं शलाकाचारणेऽपि तस्य (२१) । संघभेदेऽस्य रूढिरनर्हे न चारणे शलाकानाम् (२२) ।

॥ [इति] कर्मवस्तु ॥ १ ॥

(२) कर्मपरिभाषा ।

नाधिक्ये वाचनानामकृतत्वम् (१) । अकृतत्वं हापने (२) । क्रियमाणतायां प्रक्रान्तावपूर्वस्य पर्वणो विकुपितत्वम् (३) । पूर्णस्यानवशिष्टत्वे तत्कर्मसंघपरिमाणामव्युत्थितानाम् (४) । नावशिष्टत्वे (५) । पुनश्चेत्तच्चिकीर्षाधिकोपनं वा च (?) (६) । संघविज्ञपनेन (७) । पुनर्भदन्ताज्ञप्तिं करिष्याम्यनुश्रावणञ्चेति (८) । प्रतिनिःसृष्ट्यर्थाज्ञपननासन(?) तत्स्वभावैपीयशिक्षासामग्रीतत्पोपधतीर्थ्यपरिवासतदन्यमानास्यमूलापकर्षस्मृत्यमूढविन[य]दानोपसंपादनोपसंपादनसीममोक्षप्रणिधिकर्मार्हणेषु त्रिर्वाचना स्वार्थातिरिक्तमंत्रोक्तिः (९) । पुद्गले च परार्थम् (१०) । निषण्णोऽस्योत्कुटुकिकया पुरतोऽतिरिक्तेश्च (११) । रोचनं च (१२) । इष्टके पार्ष्णिभ्यां विरहोऽनुशिष्टानुपसंपदि (१३) । मद्गुरिकादौ स्त्रियाः वृद्धान्तेऽनन्यतन्त्रतायां संघे स्थितस्य परार्थे सप्रणतम् (१४) । अनन्तरमार्गे समनुशिष्टतायां रहसीत्येकम् (१५) । द्रव्याधिष्ठानश्च (१६) । तत्त्वं विकल्पनस्य (१७) । गृहीत्व[ा] तदेतत् (१८) । पात्रभैषज्यं वामे पाणौ प्रतिस्थाप्य प्रतिच्छाद्य दक्षिणेन पाणिना (१९) । अग्रत[ः] स्वस्याग्राह्यतायां कर्म (२०) । असंवृतौ संघैकद्वयोः पुद्गलस्य विज्ञप्यत्वं भिक्षोः (२१) । रोहन्त्यसान्निध्ये चीवरस्य मनसा विकल्प उत्सर्गोऽधिष्ठानश्च नानुत्सृष्टे पूर्वत्र (२२) । वाग्भावे (?) चैकाधिष्ठानं तदाशयोपसंपत्तिपूर्वकम् (२३) । कृतैकांशोत्तरासंगत्वम् (२४) । समागतत्वे भिक्षूणाम् (२५) । सामीच्य तदर्हत्वे (?) वचनीयताया[ः] स्वार्थमन्त्रस्य (२६) । अशिष्टौ च रहसि (२७) । ससांघाटितायामुपसंपत्संनिपादे(पाते?) (२८) । आदौ त्रिःप्रगृहीतांजलित्वं तादर्थ्ये दिवसारोचनं च (२९) । औपयिकमित्यन्ते स्वार्थं विज्ञप्तेन वचनं

पुद्गलश्चेत् [१०] । स्वार्थि तदन्वितरेण [११] । छन्दद्वेषमोहभयगतिविरहितस्य शक्तस्य कृताकृतस्मरणे संमतिरुत्साह्य [१२] । कृताकृतवेदनं स्थिते [१३] । वर्धत्ववर्धव्यमानतायां सीम्नि प्रतिपत्तिः [१४] । गण्ड्याकोटनपृष्टवाचिकासमनुयोगाभ्यां सन्निपादकेन सन्निपाद्यानां बोधनम् [१५] । तस्य तदर्थमासनं प्रज्ञपनम् [१६] । संमतस्य तत्कार्यार्थतायामेतत्त्वम् [१७] । सर्वत्र यथा वृद्धिका (?) [१८] । रुच्याग्राह्येऽग्रत्वम् [१९] ।

[इति] कर्मपरिभाषा ॥ २ ॥

॥ समाप्तं कर्मवस्तु ॥ ९ ॥

§ १०, प्रतिक्रियावस्तु ।

(१) प्रतिक्रियावस्तु ।

नाप्रतिकृताज्ञपनजष्क(?जं क)र्म प्रत्यनुभवेत् [१] । उत्सृज्य पोषधं प्रवारणाञ्च [२] । न सीमान्तरस्थस्य कस्मिंश्चिदङ्गत्वम् [३] । ध्वंसस्तद्वृत्तौ साह्य गतस्य [४] । उभयस्थत्वमेकस्मिन्नेकत्र पादे परस्मिन् परत्र [५] । सर्वस्मिन्नवष्टम्भिनि स्थितस्यावष्टब्धे [६] । रूढिरेवमनेकत्रोपगतेः [७] । अर्हत्वमनेकशयनासनग्राहे [८] । यथेष्टमस्य वस्तव्यता [९] । न व्यग्रकारित्वं जिनस्य [१०] । न पूरकत्वम् [११] । नाकर्मणा तत्करणीयस्योत्थानम् [१२] । कृतत्वं यद्भूयस्कृतत्वे वाक्यस्यानुत्तरस्य [१३] । नाकीर्त्तित्वे निमित्तानां बन्धे [१४] । पारिवासिके नान्तस्योपस्थानसंवृतेः [१५] । उन्मत्तकेन चोद्देशस्य [१६] । ज्ञप्तिभेदानुष्ठानम् [१७] । अनङ्गमत्र भिन्नव्यंजनत्वम् [१८] । न हास्यभावेन कस्यचित् स्थूलमरूढिबुद्ध्या भेदोत्क्षेपयोः [१९] । दुष्कृतमसंघभूतत्वे [२०] । नान्येषां नानासंवासिकेभ्यो वर्हाणां पूरणे गणेन ज्ञप्तिवाचनयोः [२१] । नासंपन्नत्वेऽर्ह[:] स्वसंघेन प्रत्यनुभवस्य [२२] । संपन्नत्वं ज्ञप्तिश्रुतावस्य नाविधिर्भव्यरूपे प्रतिनिधिना दूतेन प्रव्राजनम् [२३] । उत्तरश्चोपसंपादनात् [२४] । नाप्रतीष्टो दत्तत्वम् [२५] । ध्वंसोऽत्र याचनस्य [२६] । विधित्वं मेवकज्ञपनपूर्वकत्वेऽस्य [२७] । उत्क्षेपेऽप्येतत् [२८] । अत्रधानं परेणासमन्वाहाराद्युक्तो तत्रः [२९] । नार्थच्छेदानां क्रमव्यत्या(?त्यया)दरूढिः [३०] । अकरणीयत्वं भ्रे(?)पस्य [३१] । न व्यञ्जनान्तरसंश्रयात् [३२] । न भिक्षुभिक्षुणीत्वयोरन्यकर्मवस्तुप्रतिज्ञपिते चोदकेन कल्पयति सांमुख्यं प्रणिधिकरणम् [३३] । प्रतीतिमात्रेण सन्निपातादाने [३४] । अनङ्गमदर्शने व्याघातित्वात् सत्त्वस्य प्रतिज्ञानम् [३५] । अनकाशां करणे चायोगात् [३६] । संपत्त्यास्वयमनुत्थाने चोदकस्योत्थापनम् [३७] । अ[ा]कोप(?)रोपकपरिभापकतामलाभावासाभ्यां संघस्य चेतकत्वम् [३८] । राजकुलयुक्तकुलज्ञातिपुद्गलप्रतिसरणतामप्रतिसर्द्धतां संघस्याविभ्रतः [३९] । अकुर्वाणस्यास्यागारिकतीर्थिकध्वजधारणतीर्थ्यसेवानाचारचरणान्यशिक्षणञ्च भिक्षुशिक्षायामुत्कचप्रकचस्य

संघे रोम पातयतो निःसरणं प्रवर्त्तयतः समीचीमुपदर्शयतो विरमतो निमित्तादवसारणं याचिते [१] । कर्मदानावर्हणोपसंपादनप्रतिप्रस्रम्भन्नो(?)न्मज्जनञ्च [२] । कलहकारकतस् (?) जयेयुः कर्मणा [३] । निगर्हणमभीक्ष्णसंघावशेषापत्तिकस्याप्रतिकृत्य [४] । कुलदूषकस्य प्रवासनम् [५] । अदानाकरणयोश्च तदर्थं संनिपातावकाशयोः [६] । उद्धावने च तद्दृष्टेः [७] । प्रतिसंहरणमवस् (?) पण्डितागारिकस्य [८] । तत्क्षमणकमत्र कर्मणः स्थानेऽवसारणं प्रति प्रतीतायाम[ा] पत्तावप्रतिकृतायामप्रतिकार्यायां संवरेणादृष्टिमुद्भावयन्तमनिच्छन्तं प्रतिकृतिमनुष्ठातुमनुत्सृजन्तं च पापिकां दृष्टिमुत्क्षिपेयुः [९] । "इहैवैनामापत्तिं प्रतिकुर्वीथा अयमेव त्वासंघः प्रस्रम्भयिष्यति" इत्येवं ब्रूयुः [१०] । नापत्तिं प्रतिच्छादयेत् [११] । नाम्नाऽन्ततः प्रवेद्यत्वम् [१२] । यथाकथंचित् दुष्कृतस्य [१३] । प्रकृतिस्थे [१४] । अनन्यदृष्टौ सोपसंपदि [१५] । तुल्यव्यंजने [१६] । अत्रैवैतत्सोत्तरम् [१७] । कृतत्वमस्यैदंधर्मके [१८] । सीमान्तरस्थे च [१९] । संघे सर्वत्राज्ञापनजानाम् [२०] । "सन्निहिते तत्रास्र(?श्र)मे प्रतिदेशनीयस्य गर्ह्यमायुष्मन्तःस्थानमापन्नो(?न्नः) सात्म्यं प्रतिदेशनीयन्त (?यं) धर्मं प्रतिदे[श]यामि" इति [२१] । नैतन्मन्त्रवत् [२२] । संवरकृतेरतो व्युत्थान मानसीतः [२३] । अन्य (?) तस्मै तदो (?) देशनात् [२४] । एकत्र [२५] । अनन्यदृष्टो(?ष्टौ) तत्र [२६] । असमावन्ये निकायतः [२७] । अभावे आपत्तितः [२८] । निःसर्गवीचनपूर्वकानैः(?)कातः [२९] । संघे स्थूलात् सर्वत्र [३०] । पंचकादौ सशेषागताद् गुरुणः [३१] । अशेषागतादनवच्छिन्ने भूयसि [३२] । लङ्घोर(?)स्माद्यतुष्कादौ [३३] । कृतवदन्ते ऽत्रोद्युक्तस्यासंपन्नप्र(?)यत्वे कर्म [३४] । दुष्कारवत्त्वमूढकृतस्य प्रत्यापत्तौ संज्ञायमानस्य तेन [३५] । नामगोत्रोपसंहितमापत्तित्वात् कीर्त्तनम् [३६] । इयत्कालप्रतिच्छन्नतया वा संघावशेषायाम् [३७] । आवर्हणमतो व्युत्थानकृत (?) [३८] । चरितमानास्यस्य [३९] । षडहमादाय संघात् [४०] । अर्द्धमासं भिक्षुण्याः [४१] । गुरुधर्मातिक्रमेऽप्यस्य चरितत्वम् [४२] । असति प्रतिच्छाददोषे तद् रूढिः [४३] । परिवासेन तदपहतिः [४४] । तावन्तं कालमाद[ा]य संघात् [४५] । क्रियमान्(?ण) तायामनयोस्तत्संघावशेषापदने (?) ध्वंसः कृतादानयोः [४६] । तस्मान्मूलोपक्रमत्वं दानम् [४७] । निर्वाह्य तत्प्रस्तुतम् [४८] । तस्मादरूढस्यास्य पृथक् तदानीमुत्थाप्यता प्रथमं च [४९] । प्रतिकार्यं तदान्तरम् [५०] । तस्मात् तादर्थ(?र्थ्य)स्यापि संश्रयत्वम् [५१] । अवरोध्यता चातिरिक्तस्य तत्प्रतिच्छादकालस्य [५२] । कर्मणा न्यो(?)दानम् [५३] । आवर्हणाच्च [५४] । तर्जनं चात्र ज्ञप्तिप्रथमवाचनान्तराले [५५] । निपतितस्य तृणप्रस्तारकेण [५६] । समुद्रे(?द्वे)जनञ्च [५७] । कृततोत्कीर्त्तनान्तरम् [५८] ।

॥ [इति] प्रतिक्रियावस्तु ॥ १ ॥

(२) क्षुद्रकादिगतम्।

निष्काश(?स)नं दुःशीलस्य [१०]। संघस्यात्र प्रगमः [११]। नासावेनदव्युपेक्षेत [१२]। अवसार्यत्वं नाशितस्य [१३]। नासां मन्ये प्रणिधादृणामवसारणस्य प्रणिहितौ रूढिः [१४]। अवस्तव्यता दूषितस्थाने प्रवासितस्य [१५]। सर्वत्रोत्क्षिप्तके संवासत्वासंभोग्यत्वे [१६]। संज्ञयात्र व्यवस्थानम् [१७]। अधर्मपक्षस्थै(?)तिभिन्नतायामितरेण [१८]। नान्यस्य [१९]। नान्यत्रैत(?) प्रणिहिते [२०]। अपाश्रयेणास्य वस्तव्यता सप्रेमकस्य [२१]। विकृतेः क्रियमाणप्रणिधिना ध्वस्तेन चं निष्कास्य मानेन भजने भाण्डस्य छोरणम् [२२]। वला(?)निष्काशः(? सः) [२३]। अवलम्बनस्य छेदनम् [२४]। अपतनधर्मणा तत्रोत्पाटनम् [२५]। संघेन तस्य प्रतिसंस्करणम् [२६]। संप्रदास्य (?) [२७]। असंपत्तौ वैहारात् [२८]। न कलहकारकं निष्कास्यमानन् (?नं) वारयेत् [२९]। अनिवृत्तौ कलेरुपशान्त्यै प्रयत्नादुत्क्षेपः [३०]। विनिश्चयगते व्युपशमनेन [३१]। निःश्रिते निःश्रयः प्रयतेत [३२]। निमित्तस्यापि कलेरुपसंहारिणोत्क्षेप्यता [३३]। संसृष्टविहारिणमपि भिक्षुणीभिरुत्क्षिपेयुः [३४]। अवन्दनार्हसंवृतिमत्रोत्क्षिप्तस्य भिक्षुण्याप्(?ः) कुर्युः [३५]। उद्धचोऽन्यस्य प्रणिधिः निमित्ते तदर्थाभिसन्धिनान्यप्रकृतौ [३६]। अरूढिरन्यथात्वं परत्र [३७]। अनुत्थानमुत्क्षेपे [३८]। स्थूलं ज्ञातमहापुण्यसूत्रविनयमातृकाधरबहुश्रुतपक्षमनिवारणां निर्दोषनागारिकभिक्ष्वादिपञ्चकावस्पण्डनेऽपि प्रतिसंहरणम् [३९]। नाक्रोश्येनावस्पण्डनम् [४०]। अनाशंक्यं स्वसाधारण्यम् [४१]। अनुपसंपत्कस्यैषां प्रव्रजिते कर्तव्यता [४२]। न गृहिणि [४३]। पात्रस(?)स्याख्यातारं प्रति भिक्षोरभूतेन पाराजयिकेन [४४]। क्रोशकं परिभाषकं च निकुब्जयेरन् [४५]। व्यवस्थाकरणतः [४६]। प्रज्ञप्त्या [४७]। न निकुब्जितया तस्य गृहान् गच्छेत् [४८]। नासनं परिभुञ्जीत [४९]। न प्रज्ञप्तान् देयधर्मं(?) [५०]। न पिण्डपातं प्रतिगृह्णीयात् [५१]। न धर्मं देशयेत् [५२]। यत् कर्म करणं तद्गतानां निकुब्जितत्वम् [५३]। अनुत्थानमस्यास्वपक्षकुलं प्रत्योत्क्षिप्तकात् [५४]। तेत(?)नमस्य केनचित् [५५]। क्षमितवत्युन्मज्जनं ज्ञपनेन [५६]। भवत्युत्थानमनुत्पन्नप्रतिच्छादचित्तस्यान्तिमातः [५७]। शिक्षाचरणेन [५८]। तद्भावायाः संघतः [५९]। कर्मणा दानम् [६०]। यावज्जीव[म्] [६१]। शुद्धिरेकस्य पुरतो देशनेन संघावशेषतो हीमतः [६२]। सूत्रधरस्य विनयस्य मातृकायाः [६३]। ज्ञातस्य च [६४]। अशयतापत्तिव्युत्थानेन दण्डकर्मतः [६५]। निकायतो नामापत्तेर्नाम [६६]। समुत्थानं गोत्रम् [६७]।

॥ समाप्तं प्रतिक्रियावस्तु ॥ १० ॥

§११, कालाकालसम्पातवस्तु ।

(१) कालाकालसम्पातवस्तु ।

अप्रतीतत्वे संघावशेषान्तर्धानेऽन्तास्थितप्रतिच्छादचित्तस्याशक्तवत्तायां कृतं ने वा किं वा कीदृश्यं चेति स्मर्तुमनुपसंपत् कृतोत्क्षिप्तपोश्चानुत्थानं प्रतिच्छादस्य [९] । भ्रष्टस्यावहारिकसंज्ञतायामापत्तेरस्यापराजयात् [१०] । अप्रज्ञप्ततायां च [११] । नाज्ञातत्वेन स(थ?)द्वितत्वे वा [१२] । अनभिज्ञतासंज्ञिनोऽपि [१३] । भूम्यन्तरस्थितायां प्राचोऽपि [१४] । ज्ञानवत्प्रतिच्छादे विमतिः संघावशेषत्वम् [१५] । अ[ा]चरणस्यापि साभूति (?) या प्रतिच्छादानुत्थानस्य [१६] । दुष्कृतमनादृत्यैः (?) चरणोत्सर्गे [१७] । तन्नैकायिकाद्या(?)चारे चात्र [१८] । संभवे चाप्रतिकृतौ [१९] । तदवस्थत्वं प्रत्यागतावचरणभूमेः [२०] । शोधिते वस्तुनि सा(?)पानुष्ठानमनिर्ज्ञाने प्रतिच्छादकालस्यासंख्यमान(?)न्यूनत्वस्य संश्रयणम् [२१] । चरितव्यतायां शुद्धान्तिकत्वोत्तरस्य [२२] । चतुरो मासां(?सान्) शुद्धान्तिकमिति [२३] । अपरिमात्वस्याप्रतिच्छादे [२४] । संचिन्त्य शुक्रविसृष्टिसमुत्थानपरिमाणामिति [२५] । यावतीष्वप्रायस्तावत्कीमित्रमत्रानुष्ठितैः [२६] । अपरिमाण इत्यनिर्ज्ञानेऽस्य संश्रयसंबहुलाः परिमाणवत्य इति प्राभृत्ये [२७] । अतिरिक्तेन कालानाम् [२८] । प्रभू(?)तिमत्वेन नाम्नाम् [२९] । गुरुत्वतीव्राशयकृतत्वाभ्यामादित्वेन [३०] । चरतोऽपरप्राक्सम्पन्नप्रतिचिकीर्षोत्पत्तौ पृ[र्वा]ग् दानमेकं चरणम् [३१] । नास्य प्रतिच्छन्नतायां मानास्ये संभवः [३२] ।

॥ [इति] कालाकालसंपातवस्तु ॥ १ ॥

(२) पृच्छागतम् ।

नानन्त्येन्से(?ऽंशेऽ)होरात्रस्य प्रतिच्छादोत्थानम् [३३] । नामावेऽह्नगस्योद्भावनायात्मचित्तानां प्रतिच्छादः [३४] । अभावत्वममत्यपक्रान्तिवशस्य [३५] । तदर्थवशतयापि कृतौ [३६] । विनार्थेन दुष्कृतम् [३७] । प्रात्कान्ह्या(?)त् [३८] । अनुत्सृष्टत्वं प्रतिच्छादचित्तस्य तद्(?चि)त्ततानदोर्प(?)मापत्तेः पराजितस्याप्रकृतौ [३९] ।

॥ समाप्तं कालाकालसंपातवस्तु ॥ ११ ॥

§१२, भूम्यन्तरस्थचरणवस्तु ।

(१) भूम्यन्तरस्थचरणम् ।

पारिवासिकमानास्यचारिभ्यामभिवादनवन्दनप्रत्युत्थानांजलिसामीचीकर्मणां प्रकृतिस्थाद् भिक्षोरस्वीकरणम् [१] । यस्याभ्यामकरणमितरैरपि तत्र तद्गतस्य [२] ।

यदपरिहाणिकातोऽन्यथाऽनेन सार्द्धमचंक्रमणम् [१] । नीचतरासनकत्वादनिपादः [२] । पश्चाच्छ्रमणात्मकतातप्(?)कुलानुपसंक्रमणम् [३] । अकल्पनमेकछदने शय्यायाः [४] । प्रव्राजनोपसंपादननिःश्रयदानश्रमणोद्देशोपस्थापनानामकरणम् [५] । प्रज्ञप्तिवाचनयोश्चाप्रतीष्टिः [६] । कर्मकारकभिक्षुण्यववादकसंघवैश्वासिकसम्मतेः [७] । अव्यापारण(णं) प्राक्सम्मतेनापि [८] । अनववदनश्च भिक्षुणीनाम् [९] । अनुद्देशः पोषधे प्रतिमोक्षस्य सत्यन्यत्रोद्देष्टरि [१०] । अचोदनं विपश्यां भिक्षोः [११] । अनपसारितस्य संघात् [१२] । अकरणं सवचनीयतासकीलत्वयोः [१३] । अस्थापनमववादपोषधप्रवारणाज्ञप्तिवाचनानाम् [१४] । असंप्रयोगोऽनेन [१५] । वर्जनं कृतदण्डनिमित्तस्य [१६] । अन्यस्य चापराधस्य [१७] । नापराध्यता सब्रह्मचारिषु [१८] । व्रतस्य (?) निःसारः प्रवर्तितो भवतीति मनसि करणम् [१९] । काल्यमुत्थाय द्वारमोक्षो दीपस्यालकोद्धरणविहारसेकसंमार्गसुकुमारिगोमयकार्ष्यानुप्रदानानि [२०] । धावनं प्रस्रावोच्चारकुट्याः [२१] । पोच(?प्रोंछ)नमृतकालानुरूपपानीयोपस्थापनम् [२२] । प्रणाडिकामुखानां धावनम् [२३] । आसनप्रज्ञापनम् [२४] । कालं ज्ञात्वा धूपतत्कटच्छुकयोरुपस्थापनम् [२५] । प्रतिबलता चेच्छास्तुर्गुणासंकीर्तनम् [२६] । न चेद् भाषणकाध्येषणम् [२७] । उप[ा]न्वाहृते गण्डीदानम् [२८] । घर्मश्चेद् भिक्षूणां वीजनम् [२९] । अन्त्यत्वमस्य सर्वोपसंपन्नानाम् [३०] । कृते भक्तकृत्ये शयनासनस्य छन्ने गोपनम् [३१] । पात्राधिष्ठानछोरणम् [३२] । कालं ज्ञात्वा स्तूपानां संमार्जनम् [३३] । सुकुमारिगोमयकार्ष्यनुप्रदानम् [३४] । सामग्रीवेलायां प्रज्ञपनाद्या(?)गुणगतात् [३५] । प्रतिबलता चेद् दिवसारोचनम् [३६] । न चेदन्यस्य भिक्षोरध्येषणम् [३७] । पादशोचनं भिक्षूणां चैकालिकं कालानुरूपेणाम्बुना [३८] । प्रश्रणश्चानिच्छायां स्नेहोपसंहारः [३९] । विहारेऽस्य प्रत्यन्तेऽर्हत्वम् [४०] । अर्हत्वं सर्वत्र लाभे [४१] । प्रतिजाग्रियात् कुशलपक्षे [४२] । तद्वदत्र तत्प्रभावैपीयशिक्षाचरणानाम् [४३] । असंघे च [४४] । परिच्छिन्नेषु च तदाश्रमपदोपगेभ्यः [४५] । न बहुतां परिहरेत् [४६] । स स्थविरप्रातिमोक्षतायै प्रयतेत [४७] । न यत्रान्ये त्रिःप्रभृतयः सर्वथा तदाख्यचरणास्तत्र तच्चरेत् [४८] । नान्यत्र प्रथमावरणेणा(?)नुद्गमयेत् (?) [४९] । वर्षर्त्वद् पृत्तमारोचयेताम् [५०] । संनिपाते संघस्य [५१] । प्रत्यहं न चेच्चिरं चरितव्यत्वम् [५२] । अत्र त्रिचतुरैः [५३] । नैवानेनार्थेनावस्पण्डयेत् [५४] । कलहकारकागमनश्च श्रुत्वा भयश्चेदतः प्रतिनि[ः]सृजेतां संघसन्निधौ पुद्गले वा [५५] । अपगतौ भीतेरादानं तत्रैव [५६] ।

॥ [इति] भूम्यन्तरस्थचरणवस्तु ॥ १२ ॥

(२) पृच्छागतम् ।

छेदस्तदहोरात्रस्य प्रकृतिस्थेन सार्धमेकछदने प[ा]रिवासिकमानास्यचारिणोः शय्यायां बहि[ः]सीम्नि च [१०] । अनारोचने च [१०] । नासन्निधौ तत्सीम्नि श्राव्याणामस्योत्थानं निर्दोषं तदहरागतौ सीमान्तरे गमनम् [१०] । न प[ा]रिवासिकेन सार्धमेकछदने पारिवासिकः शयीत [१०] । न तीर्थ्युपनिवासस्थस्य तेन सार्धमत्र दोषः [१०] ।

॥ [इति] भूम्यन्तरस्थचरणवस्तुपृच्छा ॥ १२ ॥

§१३. परिकर्मवस्तु ।

नाप्राप्तिद्विकस्य मूलत्वम् [१] । अरूढिरवसितप्रवारणोक्तौ प्रवारणास्थापनस्य [१] । तथा ग्लानकर्तृकतायाम् [१] । दूतेनापि [१] । ग्लानगतायाञ्च [१] । नैतत् प्रतीच्छेयुः [१] । आगमय त्वमायुष्म(?ष्मन्)ग्लानस्त्वमप्रयोज्यम (?) इत्यायुस्मं (?ष्मन्) भूतेति ग्लानोऽसावनुज्ञा इति प्रतिवेदयेयुः [१] । अनवगतस्वरूपतायां कृतस्य कर्तुर्वा चोदनस्य [१] । शिष्टेऽपि नाकाले प्रवर्तेत [१] । नानुपस्थास्य स्मृतिसंप्रजन्ये [१] । नानेकान्ते [१] । नाकारितावकाशे [१] । तत्त्वं प्रवारणस्य [१] । अस्मृतौ स्मारणम् [१] । अकरणेभ्यः वचनीयतामस्य कुर्यात् [१] । सवचनीयं त्वायुष्मन् करोमि न त्वं योऽस्मदादावासादनवलोकय अक्रमितव्यमस्ति मे आयुष्मति प्रणिहितं वचनायेति [१] । आगच्छत्येव दमनथमन (?) चोद्यताम् [१] । आलपनादेरस्यनुविनिवर्तनम् [१] । तथापि पोषधस्थापनम् [१] । ततोऽपि प्रवारणायाः [१] । करणमस्य त्र(?)स्थापकैः स्थापितस्य तेन सार्धमुपसारणम् [१] । कृतत्वेऽवकाशस्यामृदुत्वं चेत् सकीलकरणम् [१] । वक्ष्याम्यत्रामुत्र वा वसेऽमुत्र वा वस्तुनि यत्र चेष्टमित्यारोप्य चाम(प?)त्तिं दर्शयित्वापराधमुत्सृजनेन [१] । शीलदृष्ट्या चाराजीव वियत्या सर्वस्यास्य चोदनादेः क्रियायां रूढिः समूलकम् [१] । न दुर्दू(?)लेन कुर्यात् [१] । अकरणमत्र वस्तुनः सत्यत्वम् [१] । क्रियानिमित्तानां परसंलापस्य सानुश्रावणस्येति त्रिविधं श्रुतम् [१] । अमूलत्वमश्रद्धितस्य [१] । कामोऽनेकत्वे ज्ञातुश्चोदनादौ [१] । नाप्रवारणे तत्स्थापनम् [१] । नापोषधे तस्य न न कृतौ कृतत्वे वा स्त्रीत्वे स्थापकस्यै[कै]तरस्य पुंस्त्वे स्थापितत्वं स्थापितता [१] । न नष्टप्रकृतिना [१] । नाशीलैक्येन [१] । नानपोः [१] ।

॥ [इति] पारिकर्मण(?)वस्तुपृच्छा ॥ १३ ॥

§१४. कर्मभेदवस्तु ।

(१) कर्मभेदः ।

न नानात्वाय संघस्य प्रमा(?म)विष्णुमकामं चोदयेदुन्मोटयेद् वा चोद-

यत्वम् [७] । न यत्र प्रतिविरोधस्तेन सार्धमभिनमने समासीत [७] । द्वित्रासनान्तरिमन्यत्र [७] । एवमितरस्तेन [७] । अन्तरितस्थानयोर्विहारस्य देयत्वं ग्राह्यता च [७] । धर्मे विनये चैतद्वतामधर्मे चेदभिनिवेशो ज्ञात्वा संघसामग्रीन्न विद्यते [७] । तस्मान्न तदन्यानां संभूय कृतौ कर्मणो रूढिन्न परस्परेणाव्यग्रत्वम् [७] । कलिपरायणत्व एषा तद्विपक्षस्य चावन्धत्वमिदं धर्मभिः [७] । प्रत्युत्थानासनोपनिमन्त्रणासंलपनालपनसंमोदनव्यवलोकनालोकनानामप्यकरणम् [७] । लूहशयनासनानुप्रदानं हस्तसंव्यवहारकेन(?ण) [७] । वचनेनान्यत्र सद्वतमित्यपरम् [७] । प्रत्यन्ते विहारस्य [७] । मृद्वद्वा(?) वयमिति वदत्सु यूथ(?वय)मपि श्रमणाः शाक्यपुत्रीयाः स्म इत्यात्मानं प्रतिजानीध्वे [७] । येषां चेदं वृत्तमियं वार्ता कारुणिको वः शास्ता येनैतदनुज्ञातमेतदपि वो न प्रापद्यत इति प्रतिवदेयुरन्यत्र [७] । न भिक्षुण्यासनमोक्षं हापयेत् [७] । ददीतोपासकपिण्डपातम् [७] । नापसारितानामेषां सामग्र्यस्य विना सामग्रीलाभेनोत्थापनम् [७] । न विना पोषधेन प्रकृतिस्थताप्राप्तिः [७] । दत्वापिनं (?) कुर्युः [७] । कर्मणैतत् [७] । पूर्वं च [७] । कल्पते सामग्रीमङ्गलार्थमापदि पोषधः [७] । तस्यैव चात्र कालस्य निमित्तत्वम् [७] ।

॥ [इति] कर्मभेदवस्तु ॥

(२) पृच्छागत ।

कर्मणः कृतावधर्मवादिभिरन्तःसीम्नि पृथक् तद्भेदोऽतद(?)चित्तेन [७] । रूढिरस्मिन् प्रतिस्वं कर्मणः [७] । नास्वपक्षं प्रति [७] । धर्मवादि कृतता संघस्य कृतत्वम् [७] । स्थलस्थैरत्र सन्नि (?) चेद् भिक्षुणीनामचोद्यत्वम् [७] । व्यग्रत्वमेषां धर्मपक्षैः [७] । ध्वंसोऽनुविधौ तत्त्वस्य [७] । नैनं कुर्यात् [७] । अचोद्यत्वं पक्षापरपक्षव्यवस्थितस्य भिक्षुणीसंघस्य [७] । नैवं भिन्नस्य [७] । समग्र्य(?)याचमानानां नियोज्यत्वम् [७] । धर्मवादिनि गामित्वं वार्षिकस्य [७] । उभयसन्निपाते चाविभज्याप्रतिपाति(?दि)तस्य संघे वैभाज्यस्य [७] । संघपरिमाणता चेत् तत्र तेषाम् [७] । जनता चेति रे(?)षाम् [७] । तत्तदा यदीयस्योत् (?) संघे प्रतिपादनं द्वयोश्चेदुभयत्र [७] । पुद्गलो(?शो)ऽत्रांशित्वं न संघशः [७] ।

॥ [इति] कर्मभेदवस्तुगते पृच्छा माणविके ॥ १४ ॥

§१५. चक्रभेदवस्तु ।

ज्ञपनतो वा पृथग्भावस्य धर्मात् संघभेदः [७] । शलाकाग्रहणतो वानेनार्थेन [७] । अरूढिरस्यासंघपरिमाणत्वे भिद्यमानानामसत्त्वे चान्येषामन्तःसीम्नि संघपरिमाना(?णा)नामधर्मधर्मयोः तथात्वेन प्रत्यनगतावानन्तर्यम् [७] । धर्मसंज्ञिनोऽपि भेदे [७] ।

॥ [इति] चक्रभेदवस्तु ॥ १५ ॥

§१६. अधिकरणवस्तु ।

(१) अधिकरणम् ।

चत्वारि संक्षो(ऽघो)पकरणानि [१] । पदार्थतथात्वे विप्रतिपत्तिर्वर्जनं सापत्तिका सामग्र्यदानं कर्मणि [२] । प्रथमनिमित्तस्यैकोतीकरणेन व्युपशमनम् [३] । अनेन च शुद्धिदाने च द्वितीयनिमित्तस्य [४] । तृतीयनिमित्तस्य प्रतिकरणे निवारणनियुक्तत्वादानेन च [५] । दापनेनान्त्यस्य [६] । सभ्यै(ः ऽ)स्वयमशक्तौ विवदित्रोः संप्रतिपादनम् [७] । भिक्षुभिरभिरुचितैः [८] । तयोरेकतः स्थलस्थानारोचनम् [९] । सम्मतिरेषां संघेन साततिकानाम् [१०] । अनुत्(ऽ त)योजिनष्कलहेऽत्र संमन्तव्यता [११] । लज्जिनः शिक्षाकामस्य [१२] । सुविनिश्चितस्य विनये [१३] । कुशलस्याधिकरणवृत्तेऽध्याचारे च [१४] । विनिविष्टस्य [१५] । धीरस्यासंरब्धव्यं प्रस्थानस्य [१६] । समस्य [१७] । अवगन्तुः [१८] । प्रत्यायकस्य [१९] । विदुषः [२०] । अनुपशमने तैः [२१] । संघे निक्षेपः [२२] । असक्तौ तेन व्यूढानां संमतिः [२३] । अन्यूनानां संघपरिमाणात् [२४] । समन्तु(ऽ)त्वं वर्गस्य स्वतोऽसक्तौ व्यूढकेषु [२५] । अक्रि(ऽ कृ)तावुत्तरस्यासक्तौ यत आदानतत्रनिक्षेपः [२६] । प्रत्यागते मूलसंघे नाधिकरणसंचारकसंमतिः [२७] । तेन सस्थविरे सप्रातिमोक्षेऽन्यत्र संघ उपनिक्षेपः [२८] । त्रिमास्यात् कालस्य दानं वृत्तारोचनपूर्वकम् [२९] । य(ऽअ)स्यैतत् [३०] । प्रत्यर्पिते तेन सूत्रधरविनयधरमातृकाधरेषु [३१] । षण्मास्याः [३२] । तैः प्रभाविते स्थविरे अपर्यन्तस्य [३३] । वर्जयेदसौ ततः स्वीकरणं कस्यचित् [३४] । ओपाडुकदन्तकाष्ठात् [३५] । एकासननिषदनैकचंक्रमणालापसंलापाश्च [३६] । अनुप(ऽ)धृत इदं वदेत् तेषां च आयुष्मन्त अलाभानालाभाद्दुर्लभो न सुलभा ये यूयं [स्वा]ख्याते धर्मविनये प्रव्रज्य कलहजाता विहरत भण्डनजाता विगृहीता विवादमापन्नामायुष्मन्तः कलहो मा विग्रहो मा विवादः । नास्ति द्वयोर्युध्यतो जयः । एकस्य जय एकस्य पराजयः । नास्ति द्वयोर्धावतो जयः । एकस्य जय एकस्य पराजय इति [३७] । बहुतरमतेन संस्थापनमित्यपरः संप्रतिपादनप्रकारः [३८] । धर्मविनिश्चितावश्यसंभवो न वृत्तिविनिश्चितौ [३९] । विवदितृगतत्वात् तद्गतायाः प्रत्यवगतेः [४०] । खरमर्थिप्रत्यर्थिकैर्गृहीतत्वे प्रगाढं च व्याह(ऽ)त्वे तेषां भेदाशंकितायामस्य संस्रयणम् [४१] । असंवरणकरणीये(ऽ य)त्वेऽर्थस्य [४२] । परिक्षिप्तेषु स्थविरपर्यन्तेषु [४३] । मूलसंघेन [४४] । शलाकाग्रहणेनात्र मतस्य गृहीतव्यता [४५] । शलाकाचारकसंमतिः [४६] । शलाकानां तेनोपस्थापनं द्विप्रकाराणाम् [४७] । अजिह्मावङ्काकुटिलसुवर्णसुगन्धस्पर्शवत्त्वे धर्मशला[का]खिह रस(ऽ) विपर्ययः [४८] । सन्निपातायारोचनं "संघे सर्वैः सन्निपति[त]व्यं

शलाकाश्चारयिष्यामि" इति [४४] । तथा चेद्धर्मशलाकाधिक्यसंपत्तिं मन्येत न छन्दानुप्रदानेन सामग्र्ये(? म्) चारयेत् [४५] । दक्षिणेन पाणिना धर्मशलाकानां चारणकाले ग्रहणं वामेनेतरासाम् [४६] । प्रतिच्छाद्यैनाम्(? म्) पूर्वाः प्रकाशि-(? शी)कृत्योपयाचनम् । स्थविरेण धर्मशलाका अजिह्मा अवंका अकुटिल[ा] सु[व]र्णा सुगन्धा सुखसंस्पर्शा गृहाणेति द्वयोर्वाचोरितरां मृगय तेन प्रय-च्छेत् [४७] । यथा धर्मोद्भवं मन्येत तथा चारयेच्छन्नं वावृतं वा [४८] । "आयुस(? ष्म)न्, उपाध्यायेन ते धर्मशलाका गृहीता आचार्येण समानो-पाध्यायेन समानाचार्येण । आल[प्त]केन न संलप्तकेन संस्तुतकेन सप्रेमकेन त्वमपि धर्मशलाकां गृहाण । मा ते एतैः सार्धं विरुक्षणं भविष्यति" इति वा कर्णमूले तन्तुनायम् [४९] । नाप्तधर्मशलाकां गृह्णीयात् [५०] । नापृष्ट्वा सूत्रधर-विनयधरमातृक[ा]धरान् [५१] । न भेदोद्भवक्षान्त्या नाधर्म्यस्य न जानन्नयो भविष्यत्ताम् [५२] । समत्वे महाश्रा[व]कमुद्देश्यैकधर्मशलाकाग्रहणम् [५३] । नाध-र्मेणाप्येवमुपशान्तं स्फोटयेत [५४] । निरवद्यचोदनशुद्धिदानम् [५५] । चतुर्धा तच्चोद-नावस्तुमन्यानुष्ठानवशात् प्रतिकृत्यनपेक्षणादुन्मत्तकृतेन च [५६] । त्रिष्वाद्येषु स्मृतिविनयदानम् [५७] । अमूढविनयस्यान्ते [५८] । त्रयः सापत्तिकत्वात् संक्षोभाः [५९] । निर्विक्रियसविक्रियश्च द्विप्रकारः प्रादेशिकः सकलसंघगतश्च [६०] । पक्षापरपक्षव्यवस्थानेन [६१] । प्रथमतः प्रतिकरणं प्रतिज्ञाकारकः [६२] । संमुख-विनयो द्वितीयस्मात् [६३] । तृतीयस्मात् तृणप्रस्तारकः [६४] । बहूनामर्थेऽत्रासंघे देश्यानामेकेन प्रतिकरणम् [६५] । सह चानेकासाम् [६६] । यामिति चो(?)लिङ्गनतो ज्ञानोद्भासनेन [६७] । पक्षान्तरे च समेते [६८] । नाप्रतिज्ञातस्य वृथा वा प्रति-देशनायारूढिः [६९] । कल्पते सद्भेन चोद्यत्वम् [७०] । तथा चोदकत्वम् [७१] । अनियमोऽत्र संख्याविशेषाणाम् [७२] । संवृतत्वं कायवाग्भ्यां पिटकानां वेत्तृत्वम-र्हीयत्वम् [७३] । विपर्ययतो धर्मविनयतद्विपर्ययाणां संघमध्ये संचिन्त्येति त्रिकान्वितं चोदकमाद्द(? द्वि)येरन् [७४] । उन्मोटनदुःशीलविपर्य[य]दीपिनोः [७५] । संज्ञपनमवे(?) संज्ञपनमरे(?)न्तः पिटकानां धारयितुरनेवंविधस्य समनुयुञ्जीर-न्नेनं भावः प्रतिबोधाय स्थानस्थापनेन [७६] । कालदेशेर्यापथानुष्ठानानि स्थानम् [७७] । अरूढिस्थानान्तरसंचारे कालस्यो(स्यो?)पसंपत्तौ च चोदनस्य [७८] । प्रतिज्ञानं चोदितेन निष्ठा दृष्टसत्यत्वे प्रकृष्टतरत्वे च गुणतोऽन्यस्य चतुष्प्रमाणीकरणं गृहिणोऽपि [७९] । संवादनं सात्य(?)त्वे [८०] । न संदिग्धतायापत्तौ ज्ञातत्वम् [८१] । प्रतिज्ञानवदतो निश्चयः [८२] । अप्रत्यवगतिरवज्ञानम् [८३] । प्रतिज्ञापय संघेऽप्रजानता निर्धारणनियोगदानम् [८४] । तत्स्वभावैपतत(? पित)त्वादस्य तत्प्रभावैपि(? पी)य-त्वम् [८५] । प्रणिधिकर्मरूपेणास्य के(कै?)श्चिदाज्ञातम् [८६] । असाधु तन् (? त्) सत्र-

विरोधात् [११]। अनिष्टेस्वव्युपशमधे(?मार्थे)नापवर्गीकरणस्य [१२]। तर्जनीयादीनामेतत्त्वेनाव्यवस्थापनात् [१३]। प्रतिपतो(?)ऽस्यैतदवज्ञानमिति च प्रत्यवगतावदर्शकत्वप्रतीतायाजातत्व(?)भावात् [१४]। न व्युपशमार्थमौत्सुक्यं नापधेरन् [१५]।

॥ [इति] अधिकरणवस्तु ॥ १ ॥

(२) पृच्छागतम्।

सर्वशमथानां कृत्याधिकरणेऽवतारः [१६]। नानर्हस्य पूरणे संघव्यवहृतौ सभ्यत्वम् [१७]। सोपसंपत्कानामितरे(? मेतैर)धिकारः [१८]। अर्हत्वं पुंसां स्त्रैणे [१९]। व्युपशान्तत्वं च्युतौ जीविताद्युपसंपदो वा [२०]। वर्ज(?र्ज्य)तापत्तावान्यपक्ष्यता (?त्वा)त् [२१]। प्रक्रान्तावन्येन दीर्घरोगजातस्य स्पृष्टौ वा [२२]। अर्थादायिनोऽभियुक्तस्य वा [२३]।

॥ [इति] अधिकरणवस्तुपृच्छा ॥ २ ॥

॥ समाप्तश्चाधिकरणवस्तु ॥ १६ ॥

§१७. शयनासनवस्तु।

(१) शयनासनवस्तु।

(१) वन्द्याः।

परः प्रातिमोक्षसंवरेण प्रव्रजितस्य वन्द्यः [१]। समानश्च वृद्धः [२]। अनन्यव्यंजनः [३]। पुमांश्चाहीन[:] स्त्रियाः (? यः) [४]। भूम्यन्तरस्थ्वस्तभिक्षुणीदूषकाधर्मपक्ष्य नानासंवासिकानन्तर्यच्छयितसमापन्नव्यग्रान्यचित्तपृष्ठाभिमुखान्तर्गृहभक्ताग्रस्थवर्जम् [५]। आगारिकस्य प्रव्रजितः [६]। बुद्धः सर्वस्य [७]।

(२) विहारकरणम्।

कुर्वीत विहारम् [८]। एकस्य गन्धकुटेर्मध्ये पक्षस्य कर्तव्यता [९]। तदभिमुखं द्वारकोष्ठकस्य [१०]। चतुरस्रस्य साधुत्वम् [११]। त्रिशालस्य च [१२]। प्रतिगृहीत [१३]। वसेद् विहारे [१४]। अनुजानीयुरन्येषां सांघिके वस्तुनि संघाय पुद्गलाय वा भिक्षवे वासवस्तुकरणम् [१५]। संघे(?)द् दानपतिरनुज्ञातेन [१६]। कल्पन्ते प्रतिक्रमणकबहिरन्तर्वा नगरस्य [१७]। व्यवध्यर्थ(र्थे) भित्तिकरणेन स्वरूपे संरागप्रत्ययं विहन्युः [१८]। अंजलिपूरणिकया पायनेन मातृग्राममनुगृह्णीत नाच्छिन्नधारदानेन [१९]। अर्हस्तु कालत्वेऽन्तर्वर्षमागतो लाभे [२०]। बहुतरत्वं वर्षाकालस्य तल्लाभकालः [२१]। न कर्मण्यलाभो भोक्ता [२२]। देयत्वमप्राप्तवल्लाभे भक्तस्य [२३]। नान्ये लाभे सन्निपत् (?) [२४]। निर्दोषमतदर्थं गतस्य वेलाप्राप्तौ विहारान्तरे भोजनम् [२५]। दुर्भ(?र्भि)क्षे चानन्तस्य स्वे [२६]। अतिरिक्ततायां भिक्षु[:] मात्रर्थाद् ग्रहणन्न विहारमव्युपेरन् (?) [२७]। दानपतेः प्रति-

संस्करणायोत्सारणम् [८८] । असंपत्तौ सांघिकस्य यावच्छक्तिविनियोगः [८९] । स्वयञ्च प्रतिसंस्करणम् [९०] । लाभग्राहिणो विहारस्य सम्मार्जनम् [९१] । न प्रसादलाभस्य वैहारत्वम् [९२] । बद्ध्वा द्वारं विहारात् प्रवरे(?से)युः [९३] । पालञ्च स्थापयित्वा [९४] । पिण्डकस्यासत्त्वोऽस्मै दाना(?न)म् [९५] । नानिर्याय चौरतत्त्वाभावं सद्वारमनुप्रयच्छेत् [९६] । दर्शनमतिरुक्षशरणपृष्ठं मा त्वं ज्वरित इति संज्ञया ख्यापनमित्यत्रोपायः [९७] । निवासानामपितृमात्रादेः प्रत्यभिज्ञाने [९८] । नाप्रत्यभिज्ञाताय सभयताया(यां) द्वारं दद्युः [९९] । धारयेदारण्यकप्कुक्करम् [१००] । उत्थायैवासौ काल्यमवलोकयेद् विहारं चैत्याङ्गनं च [१०१] । उच्चारश्चेत् तत्कृतः छोरयेत् प्रस्रावश्चेदुद्धपेन्नखरिकाभिलिखितं चेत् समं कुर्यात् [१०२] । मण्डलकमेषां स्थानेषु [१०३] । पात्रशेषस्यास्मै दाने(?नम्) [१०४] । बहिश्चैत्यविहारोपविचारतः [१०५] । यथेष्टमीर्यापथा उद्देशदाने [१०६] ।

(३) सामीच्यादि ।

धातुसाम्यं पृष्ट्वा सामीचीकरणपूर्वकं नवकस्य ग्रहणायेर्य[ा]पथभजणं (?नं) [१०७] । बद्धक्रतोः [१०८] । अनवनतकायचित्तस्य [१०९] । रि(?क्र)जोः [११०] । चंक्रम्यमाणे पदपरिहाणिका चंक्रम्यस्य [१११] । स्थानस्य तिष्ठति [११२] । निपण्णे निपन्ने च निषादस्य [११३] । नीचतरासने [११४] । उक्ते नवकस्य [११५] । उक्ते तु (?) किकयासुक्ते [११६] । बहुत्वे ग्राह्यस्यावलोकनम् [११७] । मुक्त्वो(?क्त्वा)श्रमणोपविचारं स्वाध्यायनम् [११८] । दर्शनोपविचारे स्थित्वा [११९] । अववादमेकान्ते प्रक्रम्य संवादयेत् [१२०] । सुस्वाध्यायितं सुपरिमृष्टं निःसंदिग्धं कृत्वोद्देश(?)धारणं च [१२१] ।

(४) भक्तोद्देशकादिसम्मतिः ।

संमन्येरन् विहारभक्तौ(?क्तो)द्देशकयवागूखाद्यकफलभाजकम् [१२२] । अवरमात्रकस्य [१२३] । शिष्टमन्येद्य(?)श्चर्यं तदाख्यम् [१२४] । भाण्डगोपकम् [१२५] । वर्षाशाट्याः कठिनस्य चीवराणां भाजकञ्च [१२६] । उपधिवारिकप्रेषकौ [१२७] । भाजनवारिकम् [१२८] । चारणेऽस्यैषां व्यापारो भुक्ते च गोपने [१२९] । पानीयवारिकम् [१३०] । प्रासादकवारिकम् [१३१] । अवलोक्य तेनाच्छटाशब्दकरणपूर्वकमुं संस्था(?)भजमानानां प्रव्रजितानाम् [१३२] । संस्थायां विनियोजनम् [१३३] । तद्यथा अन्यशब्दतया भोजने सुसंवृततया सुप्रतिच्छन्नतया चैत्यवन्दने यथावृद्धिकया च [१३४] । परिपण्डाधा(?वा)रिकम् [१३५] । तत्प्रथ[म]तो भुक्त्वा वंस(?श)मादाय काकचटकपार[ा]वतादीनां भुञ्जनेषु तेन वारणम् [१३६] । शयनासनवारिकम् [१३७] । मुण्डशयनासनवारिकम् [१३८] । लोकप्रवेशसकल्पिकतयोः भोजने [१३९] । छण्डिक (?) वारिकम् [१४०] ।

॥ [इति] शयनासनवस्तु ॥ १ ॥

(२) पश्चिमशयनासनवस्तु ।

(१) वन्दनम् ।

सप्रणामां वच[न]मन्धकारवन्दनस्थाने निश्चारयेत् [१] । लोपचारप्राप्तप्रसृतोऽन्यस्य वन्दनेन वन्देत [२] । कृतत्वमस्य ब्राह्मया सामीच्यम् [३] । न सान्तरस्य सामीचिं कुर्यात् [४] । न वन्दमानं नारोग्ययेत् [५] । नावन्द्यत्वमतीताया[त]तत्प्रत्ययाः [६] । न पलिगुधं वन्देत [७] । न पलिगुध(धं) चरेत् [८] । नैनां स्वीकुर्वीत [९] । न पलिगुधम्(?) [१०] । द्वयं पलिगोधो भक्ष्यमाणेन वा दन्तकाष्ठादशुचिना वा तद्भूमिपरिकर्मणात् [११] । पलिगोधतद(?)त्र नाम्यमेकचीवरता चदे(?चेद)वन्दने पञ्चमण्डलकेन जंघप्रपीडनिकया च [१२] । न क्षद्वन्तं जीवेद्य(?) भिवन्देदु(? तो)त्सृज्यान्त्यावयसमागारिकां च [१३] । नवकमेनमारोग्ययेत् [१४] । वन्देद्(? त) वृद्धम् [१५] ।

(२) नामगोत्राग्रहणम् ।

क्षुत्वा च [१६] । नायुष्मन् नामगोत्रनादेन तथागतं समुदाचरेत् [१७] । नास्य निरू(?रु)पपदं नाम गोत्रं वा गृह्णीयात् [१८] । न वृद्धस्य [१९] । प्रतिरूपमत्र स्थविरायुष्मतोरुपपदत्वम् [२०] । न पूर्वत्र [२१] ।

(३) नवकर्म ।

गमनागमनसपन्नवस्तुनि नवकर्मिको विहार प्रति स्थापयेत् [१] । वृक्षवापीचंक्रमैः [२] । उपविचारेण [३] । अव्याकीर्णविलापशब्दनिर्घोषे [४] । कारणमनुज्ञाते दात्राविहारकरणार्थाद्(?) वस्तुनस्तत्करणभाण्डस्य [५] । लयनस्यास्य स्थापनाय दानम् [६] । क्रयस्तदुपयोज्यस्य तैलादेः मात्रया [७] । भोजनं नवकर्म-(? मि)केण तादृशस्य यादृश्य यवने [८] । निर्विहारस्य तस्य स्थानस्य [९] । प्रग्रहणं स्नेहलाभस्य [१०] । सामन्तकविहारे पञ्चपुरत्वं विहारेषु पर्यन्तः [११] । त्रिपुरत्वं भिक्षुणीनाम् [१२] । अतिरेचन गन्धवुटिवाताग्रपोतिकयोः पुरद्वयेन [१३] । निरवद्यमेषा पुरोजित्वे भरस्य पुरोद्वेष्टनम् [१४] । प्रारब्धस्य च वृहत्तो(? तो)ऽल्पस्य वा करणार्थं भञ्जनम् [१५] । वृहत्त्वार्थं स्तूपप्रतिमयोः [१६] । सी(? शी)र्णतानिमित्तं तुल्ययोरपि निष्ठितयोश्च [१७] । प्रदेशस्य च प्रतिसस्करणार्थम् [१८] । अवतारणं च कत्रादीनाम् [१९] । अन्यारोपना(?ण)यापि [२०] । नैतदर्थमनुष्ठापितानयेत् [२१] । जातकादिचित्रबुद्धवचनलेखयोश्च [२२] । भंग्यस्यैव विशेषस्य क्रियायै [२३] । करणमकृतावारभ्यान्येन शेषस्य [२४] । देयत्वमर्घोत्थितं सघार्थश्चेदुत्थानकस्य [२५] । पश्चाद्भक्तं तद्दाने कालो हेमन्तश्चेद् ग्रीष्मश्चेति पूर्वभक्तम् [२६] । भक्तकरणीयकालस्य शेषणम् [२७] ।

(४) यात्राप्रवर्तनम् ।

नासज्जीभूय ततो यत्रायां प्रवर्त्तेत [१०]। प्रक्षालितं(? त)हस्तपाच्चं तदन्तः[११]। पुरोभक्तिकमुत्थानकारकः समादापयेत् [१२]। पश्च[ा]द्भक्ते पानकहस्तपादाभ्यंगम् [१३]।

(५) द्वारादिकरणम् ।

नयनानां द्वारकरणम् [१४]। कवाटदानम् [१५]। आयामकटकचर्मखण्डिकयोः [१६]। वातायनकरणम् [१७]। मध्येबहिःसंवृतस्याभ्यन्तरे विशालस्य समुद्राकृतेः [१८]। जालिकादानम् [१९]। कवाटिकायाश्चक्रिकाघटिकाशू(? सू)चीनाम् [२०]। अजपादकदण्डधारणम् [२१]। अरामथैन(?) वाननम् [२२]। करणं प्रासादस्य व्य(?)यनाग्रतः [२३]। सप्ताष्टेष्टकास्तरदानम् [२४]। तदुपरिन्यासपट्टस्य [२५]। तस्य स्तंभपंक्तेः [२६]। तेषां त्रिकटपत्राणाम् [२७]। तेषां सिकानाम् [२८]। तासां धरणीनाम् [२९]। तासां पट्टानाम् [३०]। तेषामिष्टकास्तरस्य [३१]। तस्य क्षोदकस्य [३२]। अप्रपातार्थं वेदिक[ा]करणम् [३३]। अकम्पनायामस्यामवसंगदानम् [३४]। लोहकीलकैरस्य संपर्वणम् [३५]। सोपानस्यातिरोहार्थं करणम् [३६]। अधःशैलमयस्य [३७]। मृन्म(? ण्म)यस्य [३८]। मध्ये [३९]। उपरि दारुमयस्य [४०]। अधिरोहेन्निःश्रयण्या [४१]। दाहवंसं(? श)रज्जुमय्यामपि [४२]। इष्टकास्तरणपुष्करिणिकायां द्वारकोष्ठके चाकर्दमीभावाय दानम् [४३]। तदुपरि क्षोदकस्य [४४]। सुधायास्तस्य [४५]। अभावे काष्ठपङ्कस्य पदत्राणार्थम् [४६]। अन्तरेऽन्तरे वेष्टकायाः [४७]। चैत्येऽप्येतत् [४८]। कृतत्वमस्याव्याममात्रे कृततायाम् [४९]।

(६) सिंहासनादिकरणम् ।

सिंहा[स]नस्य करणञ्चतुरस्रकस्य [५०]। सिंहमुखत्वं पादकेषु [५१]। ग्रहणाय संचारणे लोहकण्टकानां चतुष्केऽप्येषु दानम् [५२]। पट्टिकाभिः दानम् [५३]। मसुकर(रक ?)स्यादानम् [५४]। उपरि वितानस्य [५५]। लम्बनानां सोपानकस्य करणमिष्टकामयस्य स्थिरे [५६]। संचार्ये काष्ठमयस्य [५७]। असंपत्तौ निःश्रयणिकायाः [५८]। पादपीठस्य करणम् [५९]। पत्रवैभङ्गकानामुपरि दानम् [६०]। कक्षपिण्डकस्य वा [६१]। पादयोरालम्बनमत्रार्थः [६२]। संपत्तिरस्य शिस्पा(?)काकचटकयोः [६३]।

(७) जालादिदानम् ।

पारावतेभ्यो भुञ्जानानामि(म ?) विहेठाय जालदानम् [६४]। चातुर्विध्यमस्य [६५]। मौञ्जे(ञ्जो) वाल्वजः साणकः कार्पासिक इति [६६]। चक्रिकाणां चतुःषु कोने(? णे)षु दानम् [६७]। तासु बन्धः [६८]। स्फुटनं छेदश्च काष्ठस्य तस्मादयोम-

यीनाम् [८८]। छिद्रस्यासैकदेशे करणम् [८९]। भुक्ते प्रवेशाय [९०]। वेलायामस्य पिधानम् [९१]। पानीयेन प्रासादस्याप्लवनाय वर्षासु पट्टानां दानं स्तम्भान्तरेषु [९२]। आलोकाय प्रदेशमुत्सृज्य [९३]। अभावे कि(?की)टकानां किलिञ्जानां वा [९४]। वार्षिकमासचतुष्टयान्तेऽपनयनम् [९५]।

(८) मण्डलवाटादिकरणम्।

करणं मण्डलवाटस्य [९६]। सीतलस्थानतायै बहिः भित्तिदानम् [९७]। स्तम्भपंक्तेः [९८]। वात[ा]यनमुक्तिः [९९]। आसनोत्तमसमानकक्ष्यापरिमाना-(? णा)न्तानाम् [१००]। जालिकाकवाटिकयोः दानम् [१]। करणं भक्ताभ्युपस्थापनचंक्रमणशालानाम् [२]। अवच्छादनकानाञ्च कण्ठादेशपरिक्षिप्तानाम् [३]।

(९) भूमिगृहककरणम्।

कल्पते भूमिगृहकम् [४]। प्रासादवदत्र वेदिकागतम् [५]। वेष्टिकत्वञ्च कन्थायां प्रव्रजितारामस्य [६]। मुक्तोदकभ्रमत्वञ्च भित्तेः [७]। वाटपरिखाभ्यां च [८]। पुद्गलस्य च विहारः सपरिकरः [९]। करणं नीलादिकृत्स्ननिमित्ताभुखीभावाय नीलादिचतुर्विधस्य लयनभित्तीनाम् [१०]।

(१०) चित्रणमारामस्य।

कल्पते चित्रितत्वं प्रव्रजितारामस्य [११]। द्वारे यक्षाणां चित्रणं वज्रधरादिहस्तानाम् [१२]। द्वारकोष्ठके संसारचक्रस्य [१३]। गण्डपञ्चकस्य करणम् [१४]। ऊर्ध(? र्ध्वं) देवमनुष्याणाम् [१५]। चतुर्णां द्वीपानाम् [१६]। औपपादुकानां सत्त्वानां घटि(? टी)यंत्रवच्चयवमानानामुपपद्यमानानां च रागद्वेषमोहानां पारावतभुजंगसू(? शू)कराकारेण [१७]। ग्रस्यमानयोर्मोहेन पूर्वयोः [१८]। प्रतीत(?त्य)समुत्पादस्य सामन्तके द्वादशाङ्गस्य [१९]। सर्वस्यानित्यतया ग्रस्तस्य [२००]। ऊर्ध्वं बुद्धस्य शुक्लं निर्वाणमण्डलमुपदर्शयेत् [१]। गाथयोरारब्धमिति द्वयोरधस्तात् [२]। आख्यातुरस्य स्थापनम् [३]। सामन्तकेनास्य महाप्रातिहार्यमारभङ्गयोः [४]। प्रासादे जातकानाम् [५]। मालाधराणां यक्षाणां गन्धकुटिद्वारे [६]। उपस्थानशालायां स्थविरपंक्तेः [७]। गन्ज(?)द्वारे[ऽ]ङ्कुरहस्तानां यक्षाणाम् [८]। खाद्यहस्तानां भोजनमण्डपे [९]। जेन्ताका(?क)शालायामङ्कुरक(?कु)शहस्तानां कु[म्]भाण्डानां चाग्निद्वी(? ग्नि दी)पयताम् [१०]। अग्निशालायां मेचकादि कुर्वतामग्निं च ज्वालयतां कुम्भाण्डपुत्राणाम् [११]। दानपतेर्दीपं धारयतो देवदूति (?) यस्य च [१२]। नानालंकारविभूषितानां कलशहस्तानां नागकन्यकानां चोदकं धारयन्तीनां पानीयमण्डपे [१३]। ग्लानकल्पिकशालायां तथागतस्य ग्लानमुपतिष्ठतः [१४]। वर्चःप्रस्रावकुट्योः शिवपथिकायाः शिरस्करोटेर्वा [१५]।

(११) विहारसम्मार्जनादि।

न विहारे न[ा]भ्यवकाशे सधूममग्निं कुर्याद् धारयेद् धारकुट्टिमे सर्वम् [५६]। धारयेत् तदर्थं भ्रष्टिकाम् [५७]। समावर्तनार्थश्चायोमयं दण्डतपकम् [५८]। ढिंसुकेनापि (?) दारुमयेनैतत्कार्यसम्पत्तिः [५९]। विहारमुपधिवारिकः संमृज्यात् प्रत्यहम् [६०]। असक्तावुपयुज्यमानं प्रदेशम् [६१]। अवशिष्टमष्टम्यां चतुर्दश्यां च सर्वसंघे गण्डीमाकोट्य धर्म्यया वा कथयार्येण वा तूष्णीम्भावेन [६२]। धर्मोत्सवे सेकः सुकुमार्याश्च गोमयकार्पासप्रदानम् [६३]। स्नानमन्तरे (?) [६४]। हस्तपादप्रक्षालनं वा [६५]। गात्रस्योदकदिग्धेनानुपरिमार्जनम् [६६]। स्नेहलाभस्य करणम् [६७]। स्नानार्थं संमृष्टामृष्टयोर्गन्धकू(?कु)टिप्रतिमाचैत्ययष्टिच्छयानां चार्यां गाथां पठता लंघणं(?नं) [६८]। शयनासनस्थानयोरेवाह्नोः प्रत्यवेक्षणं संस्करणं निःसृतैः [६९]। सेकसंमार्गसुकुमारिगोमयकार्पासप्रदानानि वासवस्तूनि कुर्वीत [७०]। शयनासनं मलिनं प्रस्फोटयेत् [७१]। अतीव चेद् धावेत् [७२]। ऊर्ध्वं(?र्ध्वं) सेकात्संमृष्टिः [७३]। ततश्च प्रज्ञपनम् [७४]। न प्रस्फोटिते सरजस्कतायामाधारे [७५]। प्रज्ञपनीयेभ्यो वस्त्रस्यैकस्य प्रस्फोटने विनियोगः [७६]। लूहस्य [७७]। प्रतिसंस्करणमस्य [७८]। अशक्यतायां चीरीकृत्य यष्ट्यामुपनिवध्य प्रस्फोटनम् [७९]। तथाप्ययोग्यत्वे गोमयमृदास्तम्भसुशि(?पि)रे कुण्य(?)स्य वा लेपनम् [८०]। पुण्याभिवृद्धिचिरतायै दात्रः (तुः?) [८१]। न द्वारकोष्ठके प्रासादे वा शय्याप्रज्ञप्तिं कृत्वा वा धारणं कुर्यात् [८२]। कुर्यादशद्रव (?) प्रतिपक्षेणार्थमष्टमीचतुर्दशी(?श्योः) प्रासादे [८३]।

(१२) मंचपीठादिधारणम्।

धारयेत् मंचपीठम् [८४]। कुटिमाविनाशार्थं मण्डलमधःपादकच्छेदं कारयेनु(?)पमुटके चैनं स्थापयेन्नतुकेन वा वेष्टयेत् [८५]। नासंघो लेख्यपादकपीठकास्वीकृतं भजेत [८६]। न भद्रासनमाषाङ्गासनयोः [८७]। न दीपवृक्षस्य [८८]। अनेकलतकस्येत्यन्यपरम् [८९]। धारयेच्चतुरस्रकं वृषीम्बोपधानकं च [९०]। चतुर्द्विगुणद्विगुणीकृत्य सेवनम् [९१]। तूलेन पूरणम् [९२]। नाकृतं प्रत्यवेक्षणे शय्यां कल्पयेत् [९३]। नानुपस्थाप्य स्मृतिम् [९४]।

(१३) सहानिपीदनम्।

नापरेण सार्द्धमेकत्र मंचे संस्तरेऽन्यत्र वा [९५]। कल्पयेदसंभवे लज्जी पृथक् प्रत्यास्तीर्योन्तरे वृषिकापात्रस्थाविकादि दत्त्वा स्मृतिमुपस्थाप्य [९६]। न त्रयादूर्ध्वं(?र्ध्वं) प्रचितिः साद्येन मंचरूढतां भजेत [९७]। न द्वया (?) दीर्घपीठि [९८]। नासंत्यामनेकः [९९]। न त्रिवर्षाः परेणान्तरितेन सार्धमासनस्य [१००]। मञ्चे-

दान्तर्गृहे उपाध्यायेनाप्यासनाभावे स्मृतिमुपस्थाप्य [८]। न क्वचिद् गृहिणानुपसंपन्नेन वा [९]। न पण्डपण्डकमातृघातकादितीर्थ्यतीर्थ्याक्रान्तकस्तेयसंवासिकनानासंवासिकासंवासिकैः [१०]। न शिक्षादत्तकः [११]।

(१४) सांघिकपरिष्कारेषु वर्तनम्।

शिक्षादत्तकेनासनत्वं चिलिनिमि(मिनि?)कायाः सोपसंपत्संघसन्निपातादन्यत्र [१२]। न स्थलिकायाः संकटसंवाधप्राप्तावनापत्तिः [१३]। संचारणे शयनासनस्य द्वौ चेदेकेन मंचपीठस्य वा ग्रहणमपरेण वृश्या(?प्या)देः [१४]। नैतत्सांघिकमदयमार्कपेन्निष्कर्षेदधीन(?) तथा कुर्याद् यथास्य धून(?त)मलरजोभियोगः संपद्येत्(?त) [१५]। नास्याशुचिकुड्योः सान्निहित्यम्भजेत [१६]। न विनस्य (?) छोरयेत् [१७]। आतपनं स्ये(?) शोषणं प्रस्फोटनं छिद्रेर्गडकदानम् [१८]। दण्डकस्य स्फोटो (?) [१९]। क्षीणमध्यस्यान्तयोर्मध्यताकरणम् [२०]। रंजनं तदर्हस्य [२१]। अशक्यप्रतिसंस्करणतायां दीपेषु विनियोगो वर्तिकात्वेन रत्नोपयोगेषु पुद्गलदातृकेष्वपि [२२]। अनुपय(?यु)ज्यमानस्यात्र कर्दमेन भित्तिस्तम्भकवाटसुपिरेषु रत्नेषु लेपनमित्यनुप्रतिपत्तिः [२३]। अदेष्टस्ये(?)गृहीत्रा [२४]। शिष्टस्य संघेन संनिपत्य गण्ड्याकोट्टनेन [२५]। न शक्यं सांघिकमपहरन्तं दृष्ट्र(?) न निवारयेत् [२६]। नो त्रासे सांघिकमव्युपेक्षेरन् [२७]। असंप्राप्तस्य स्थानम् [२८]। नेतरूपत्रै(?)योज्यत्वम् [२९]। परिभुक्तिरसंभवे स्वस्थानोपनयनस्य स्थानान्तरे परिभोगेन [३०]। न स्थानान्तरीयं भक्तोपकरणलाभं स्थानान्तरे परिभुञ्जीत [३१]। तेनम(?)न्यस्मै दद्युः [३२]। दास्यत्वं ग्रहीतुः [३३]। दातुरप्रगमे [३४]। निरवद्योंसिभिः सांघिकस्य स्वस्यैव निरुपयोज्यस्य तृणकाष्ठस्योपयोगः [३५]। यथागतिकानुद्दिष्ट अवृत्त्योपयोज्येन यथावृद्धिका [३६]। साद्ये याचनस्यैषाम् [३७]। नातो विप्रयुक्तं वियोजयेत् [३८]। शुद्धत्वमुदकेन पादस्यैतत् तद्भावने [३९]। प्रविष्टत्वं कुटौ तत् [४०]। न निपद्यायोनिपद्यापण्ण(?)मुपस्थापयेत् [४१]। नास्यां यथावृद्धिका [४२]। न कर्दमामिषपरिशुद्धं भिक्षुम् [४३]। नागव्या निषीदेत् [४४]। न सत्यर्थिनि कृतकृत्य आवृद्धि भोज्यं धारयेत् [४५]। अकृतकृत्यत्वमन्तरालार्थतन्त्रतायां मुक्तावासनस्य [४६]। चीवरेणैनदायपट्टेन वा तदधिष्ठितं कुर्वीत [४७]। नार्थिसद्भावे सत्यां गतौ सांघिकस्य पलिगुद्धतां भजेत [४८]। निरवद्यमेवंविधाद् वियोजनं सत्यर्थे [४९]।

(१५) नापितभाण्डादिधारणम्।

धारयेत् संघो निषदां पुत्रकं(?) चा(वा?)स्याः [५०]। नापितभाण्डञ्च सु(?)त्तयां प्रक्षिप्य भित्तौ(?त्तौ) स्थापनम् [५१]। वासी च सपरशुनखादनादि तद् भाण्डम् [५२]। दानमनेनामृन्म(?ण्म)यस्य भिक्षोः याचितकत्वेन [५३]। न

भिक्षुणीकाचभाण्डं धारयेत् [१७] । धारयेत् सर्वं तैलभाजनम् [१८] । कौर्ड(ड्ड)वात् प्रभृत् (?)त्यर्धकौडवात् [१९] । स्थालीमामसीञ्च [२०] । अस्याः पर्यङ्किकाम् [२१] । मृन्म(ण्म)यञ्चेद् धानम् [२२] । लब्धसंवृतिः दण्डां (?) [२३] । सिक्यं चैकवर्णम् [२४] । दद्युरेने (?) [२५] । जीर्णग्लानयोः [२६] । संभवत्यनयोरेकेन वचसा दानम् (?) [२७] । धारणं सशब्दस्य श(?स)रीसृपादिप्रतिक्रियार्थं दण्डस्य [२८] । बन्धनं यष्टे[र्]मूलास्फोटे कूटेन [२९] । प्रान्तादङ्गेन [३०] । धारयेच्छत्रं वा रूढं वर्णमयम्वा [३१] । पञ्चरत्रप्रमाण(णं) दण्डम् [३२] ।

(१६) ग्रामादिचर्या ।

नानेक (?) ग्राममध्ये गच्छेत् [३३] । मार्गवशत[:] चेत् पार्श्वावनतेन [३४] । प्रचरेत् प(पि)ण्डाय वर्षत्तायां देवस्य [३५] । नाकल्पिकत्वम् [३६] । दण्डे निलीनस्य [३७] । स्थिते गृहेषु स्थापनम् [३८] । निर्गच्छता ग्रहणम् [३९] । न घोषवेशपानागारराजकुलचण्डला(?ण्डाल)कठिनस्थतां भजेत [४०] । नाशुचिकुटिसमीपेऽवस्थानम् [४१] ।

(१७) आरण्यककरणीयम् ।

न रत्नभूतेन वस्त्रेना(?णा)रण्ये निवसेत् [४२] । न मेरुकाचचूर्णेन प्रणाकासं(?) जातः [४३] । हिंगोः [४४] । निम्बावासकप्रत्रा(?)णाम्वा [४५] । तत्पुटस्य तत्रोपकरणतद(?)त्वम् [४६] । शोषणमस्ये(?स्ये) तदर्थम् [४७] । दिग्मार्गतिथिदिवसनक्षत्रेष्व[?]रण्यक[:] कुशलः स्यात् [४८] । नित्य[म्] सन्निहिताग्निपानीयः [४९] । सकृत् (?कृत्) संनिदध्यान्नतुकानि मधुसर्पिष्पि (?र्पिपि) यथाशक्ति [५०] । शेषं भोजना (?) ज्ञायते चेत् [५१] ।

(१८) भिक्षुण्यकरणीयम् ।

न भिक्षुण्यरण्ये वसेत् [५२] । करणं वर्षकस्य नगराभ्यंतरे [५३] । नासैपाय (?) द्वारे तिष्ठेत् [५४] । नावलोकनके [५५] । न चतुष्पथे [५६] । नाप्राप्तवती [५७] । प्रावरणत्वमत्र संकक्षिकायाः [५८] । नापिधायिनो वाश्रेद् (?) गृहिसंनिधाने [५९] । अर्धपर्यङ्कोऽस्याः पर्यङ्कस्थाने [६०] । ददीत प्रस्रावकरणद्वारे प्राणकाप्रवेशाय वस्त्रप्रभृति [६१] । न प्रवेशावरणं विहारे भिक्षुणीनाम् [६२] । भिक्षवष्कुर्युः [६३] । अनालापाने अववादपोषधप्रवारणास्थापनैरेनाः परिदमयेयुः [६४] । नाननुज्ञाप्ये(?स्ये)पा भिक्षुं विहारं प्रविशेत् [६५] । सत्यसिनसा(?)न्तरेऽभ्यनुज्ञानम् [६६] । प्रस्ते (?) निर्जयोऽप्रदुष्टताम् [६७] ।

(१९) सूच्यादिसमायोजनम् ।

शू(?सू)चीघटिकाचक्रिकताटकाकुञ्चिकानां बन्धनाय. विहारे समायोजनम् [६८] ।

(२०) उपधिवारककरणीयम् ।

प्रदोषवध्वा (?) प्रत्यवेक्षणमुपधिवारिकेन विहारस्य [illegible] । जागरणं सभयतायां आ(?प्र)हरिकत्वेन [illegible] । तव्यू(?ह्यू)तेन वर्जनं स्वप्नसमापत्त्योः [illegible] । कृततामत्र संविधानस्य उपधिवारिकं संघस्थविरः पृच्छेत् [illegible] । विहारमोषे न चेद् बद्धत्वं समायुक्तैरुपधिवारिकस्य दास्य (?) [illegible] । हापने यावतामेतत्तावतामंशानाम् [illegible] । धारयेत् कुञ्चिकां ताडकं च [illegible] । नाबद्धा यावद् भावं बन्धनैः द्वारं प्रक्रामेत [illegible] । शून्यावासं चेत् प्रविशे[त्] सेकाद्यनुकुर्यात् [illegible] । भाण्डं विप्रकृतं प्रतिशमयेत् निर्मृज्य(ज्ये ?) दक्षमं चेत् [illegible] । सं(?)श्चेत् कल्पकारोऽल्पहरिततां कारयेत् [illegible] । गृहिणश्चेदत्रागच्छेयुर्धर्म्यमेभ्यष्कथामन्यच्च शक्यधर्मः कुर्यात् [illegible] ।

(२१) वृक्षरोपणम् ।

नाकल्पिकं वृक्षरोपणम् [illegible] । नैनमुत्वा न पालयेत् [illegible] । आयुष्मणा(?)न्तर्वृक्षम् [illegible] । अन्यमाफलनात् [illegible] । चिरत्वे पंचकं वर्षाणाम् [illegible] । स्वत्वनियुक्तस्यात्र भिक्षोः [illegible] । हस्तयोः श(?शो)चनम् [illegible] । पादयोः दन्तकाष्ठविसर्जनम् [illegible] । पात्रनिर्मादनं स्नापनमिति यापनम् [illegible] ।

(२२) गर्भगृहकरणम् ।

गर्भगृहस्य शीतवारणार्थं करणम् [illegible] । गवाक्षानां(?णा)मस्योच्छ्वासाय मोक्षः [illegible] । अवच्छादनदानम् [illegible] । गृ(?ग्री)ष्मेऽस्याच्छेदार्थमपनयः पूर्वस्यापि वर्षास्वक्लेदान्तम् [illegible] । निर्वाहस्य चाम्भस(? सः)करणम् [illegible] । न मूलवृत्तिमव्युपेक्षेरन् [illegible] । वर्षद्विभागेन विभज्य परिकर्मणाम् [illegible] । क्वचिद्दन्तकाष्ठभक्ष्य(?क्ष)णं क्वचिन्मुखशोचनं क्वचित् पादयोरित्येवं न तत्प्रसृततया [illegible] ।

(२३) पुष्पफलादिरक्षा ।

पुष्पफलरक्षणाय भिक्षूणामुद्देशः [illegible] । भक्तकालाध्वमपरेषाम् [illegible] । प्रथमतरं भुक्त्वा तैर्गमनम् [illegible] ।

(२४) पठनम् ।

पृथक् प्रवृत्त्यापि पाठको बहुतरोपस्थापनकारिणामशक्त(?) सानुकम्पेत् (?) [illegible] । अनुकम्पेतोद्गृह्य तद्विनयं तदुद्देशस्याध्यायनिकपरिपृच्छानिकदानैः भिक्षुणीः [illegible] ।

(२५) लेखनम् ।

लिखेल्लेखम् [illegible] । असमर्थश्च स्मर्तुं धारणाय विनयम् [illegible] । अलेख्यत्वमस्य [illegible] । तद्वदत्र प्रातिमोक्षः [illegible] । तत्प्रतिसंयुक्तम् [illegible] । पैङ्गलिकस्य च [illegible] ।

(२६) परिष्कारेषु निमित्तकरणम् ।

अदोषं निमित्तकरणम् [१०] । सांघिके नाम्नः शयनासने लेखनम् [१०] । देयधर्मोयममुकस्येदंनाम्नि विहार इति [१०] । वस्त्रेषु च [१०] । अन्यत्र चैवंविधे [१०] ।

(२७) बुद्धवचनस्य छन्दस्यनारोपणम् ।

न बुद्धवचनं छन्दसि पदे क्रमे वा तत्परायणतयाऽऽरोप्य पठित उद्गृही(ह्णी)त द्वहिः (?) शास्त्राणि समर्थः परसंज्ञपने अनुत्सृजन् बुद्धवचनाभियोगम् [१०] । तृतीयो दिवसभागस्तत्कालो [?s] प्रणा(?भा)तः [१०] । रात्रेश्च [१०] । उद्गृहीतानुग्रहिणो मन्त्रान् [१०] । प्रयुञ्जीत [१०] । नोपघातिनः [१०] ।

(२८) रत्नत्रयभिन्ना नमस्यता ।

रत्नत्रयस्यैषु नमस्यस्थाने व्याहारः [१०] । नान्यदेवतां नमस्येत् [१०] । न पूजयेत् [१०] । नासत्कुर्यात् [१०] । आर्पा(र्पा) गाथां भाषणेनैनामभिमुखं स्थित्वा संबोध्य(?)छटाशब्देनायनप्राप्तो न गृह्णीना (? त) [१०] ।

(२९) शिल्पानुग्रहणम् ।

न शिल्पमनुतिष्ठेत् [१०] ।

(३०) उपस्थानादिकरणीयता ।

शिक्षेयुरुपस्थापयेद् (?) वा [१०] । तद्भाण्ड[म्] समुत्सृज्य शस्त्रकोशं सूचीगृहकं मेलंदुकं च [१०] । उपतिष्ठेत् कुशलश्चिकित्सया (?) तीर्थ्यं पुण्य[ा]भिप्रायेना(?णा)नभृतिकया [१०] । न विवेकं दत्त्वान्यत्र गच्छेत् [१०] । गच्छेत् तद्रूपेषु प्रत्ययेषु प्रतिविहारेऽसावुपद्रवे व्यपदिश्य [१०] । कुर्यान्नापितकरणीयं सब्रह्मचारिणस्तुल्यव्यञ्जनस्य प्रतिगुप्तप्रदेशे [१०] । घटनं च भग्नं मञ्चाङ्गस्य [१०] । ग्रन्थ(?थ)नञ्च रत्नार्थं मालागुणानाम् [१०] । लेखनञ्च रत्नपूज[ा]भूतस्यासत्त्वकृतेरालेख्यस्य [१०] । तत्त्वं तदर्थलेखायाः [१०] ।

(३१) मृतक्रिया ।

मृतस्य सब्रह्मचारिणः शरीरपूजाकरणम् [१०] । दहनमस्य न चेत् सप्राणकव्रणत्वम् [१०] । प्रत्यवेक्षणेन निश्चयः [१०] । निखन[न]माप्लावनम्वा नद्याम् [१०] । अयुक्तो दवमध्ये स्थापनम् [१०] । निषद्ययोदकथिरसो (?) दक्षिणपार्श्वेन [१०] । कक्षपिण्डकस्य शिरसि दानम् [१०] । तृणैः पत्रैः वा प्रतिच्छादनम् [१०] । धर्मश्रवणदक्षिणादेशनयोः करणम् [१०] । स्पृष्टपद्भिः सचेलस्नानस्य [१०] । अन्यैर्हस्तपादप्रक्षालनम् [१०] । चैत्यमभिवन्द्य प्रवेशः [१०] ।

(३२) स्तूपनिर्माणम् ।

द्वैविध्यं स्तूपे [१०] । सहगतत्वं स्तम्भभूतता च [१०] । अर्हत्वमस्य प्रव्रजि-

तानां कल्याणश्चेत् [५८] । सर्वाकारस्य बुद्धानाम् [५९] । जगतीचतुष्कं जङ्घ[ा]-ण्डकहर्मिकायष्टयस्त्रयोदश छत्राणि वर्षस्थालकनित्याकाराः [६०] । विवर्षस्थालकस्य प्रत्येकबुद्धानाम् [६१] । फलपरिमाणैः छत्रैरेकाधिकैरस्य श्र[ा]वकानाम् [६२] । तथागतपार्श्वदेशवैवृत्तता चेत् तस्यां दिशि करणं यत्रैषां तत्परिवारदाने च स्थानमभूत् [६३] । नान्यस्मिन्न यथावृद्धिका [६४] । मुण्डकस्य पृथग्भ[ा]जनानाम् [६५] । बहिरेषां संघारामात् कर्तव्यत्वम् [६६] । अर्हत्यार्षस्तूपमहम् [६७] । सब्रह्मचारिणां श्र[ा]वस्तूपे निर्यातितस्येसि(? शि)त्वम् [६८] । धर्म्ये बुद्धस्य लोहमयं स्तूपकरणम् [६९] । सुवर्णरूप्यवैदूर्यस्फटिकमयानां केशनखस्तूपानां च [७०] । अनुपरिवारस्यात्र करणम् [७१] । तुषितभवनवासादिपरिनिर्वाणान्तं वृत्तं तदाख्यम् [७२] । सुधादानम् [७३] । श्वेतनम् [७४] । दीपप्रतिग्रहणम् [७५] । वेदिकया वेष्टण(?नम्) [७६] । तोरणस्योत्स्त्रयणम् [७७] । ध्वजानां दानम् [७८] । चातुर्विध्यमस्य [७९] । सिंहध्वजो मकरध्वजो नागराजध्वजो वृषभध्वज इति [८०] । गहनेऽपि करणम् [८१] । तोरणस्योत्स्त्रयणम् [८२] । चैरकस्य करणम्वेदिकयास्य परिक्षेपः [८३] । स्तम्भानां गे(?गै)रिकेन(?ण) लेपनम् [८४] । भित्तिः(? त्तेः) लाक्षया चित्रणं गन्धाभिषेकदानम् [८५] । तैलालचन्दनकुंकुमशे(?)कानाञ्च [८६] । न कण्टकानां रोपणं नागदन्तकानां माससंयोजनाय दानमुत्तिष्ठति [८७] । न छिद्रणां (?) [८८] । नोपरिदीपदानं आगारिकैष्पूजनार्थमधिरोहणमभावे श्रमणोद्देशैष्पादो(? दौ) प्रक्षाल्य गन्धोदकेन [८९] । न चेदनेन गन्धैरुद्वर्त्य वस्त्रेण वा वेष्टयित्वा शास्तु[ः] संज्ञामामुखीकृत्यार्थमभिधाय स्मृतैः [९०] । तेषामपि भिक्षुभिरेवमेव [९१] । तदर्थं रज्वासंजनम् [९२] । अवच्छेदनगर्भेण नासकं(?) प्रतिबन्धाय छादनम् [९३] । द्वाराणामनन्धकारायास्य मोचनम् [९४] ।

(३३) बुद्धप्रतिमाकरणम् ।

बुद्धप्रतिकृतै(?ते)स्करणम् [९५] ।

(३४) बुद्धप्रतिमामहः ।

महस्यास्याष्प्रस्थापनम् [९६] । जातिजटाचूडाबोधिमहानाञ्च [९७] । नगरप्रवेशे चास्याष्करणम् [९८] । कल्पतेऽत्र भिक्षोस्तद्वहनम् [९९] । नवकेष्वस्य प्राप्तिः पंचभिः निकायैः परिवारदानम् [१०] । आर्षेयस्य वृद्धेर्ग्रहणम् [१०१] । वादित्रेणैतद्वाद्यमानेन च महता सत्कारेण निरा(?र)वद्यं वादनाय कुरु कुरु भोप् (?भोः) पुरुष! शास्तुः पूजामित्युदीरणम् [१०२] । उद्घोषणं रथ्यावीथिचत्वा(?त्वर) सृ(?सृ)ङ्गाटकेषु श्वः परश्वो वा भविष्यत्तायां लिखितस्य इति बुद्धप्रवेशो भविष्यतीति भुजादावारोपितस्य हस्तिस्कन्धे छत्रध्वजपताकापरिवृतस्य [१०३] ।

(३५) बोधिसत्त्वप्रतिमाकरणम् ।

धर्म्यं बोधिसत्त्वप्रतिमाकरणम् ।[६] ध्वजैरस्याः परिवारो वेदिकावेष्टनं लोहस्तम्भे (? म्भै) श्च ।[७] पताकानां तेषु बन्धः ।[८] अनुमानकरणम् ।[९] आभरणप्रतिमुक्तिरुत्सृज्य पादाभरणं कर्णपूरं च ।[१०] गन्धाङ्गददानम् ।[११] शिविक (का)याम्वा हिण्डनम् ।[१२] रथेन च ।[१३] छत्रध्वजपताकानां तत्रोत्सपन (? ण) म् ।[१४] । पुष्पन्ततन्स (? पुष्पावतंस)कस्य शिरसि दाने ।[१५] अर्घपाद्ययोश्च ।[१६] अभिसारस्य निःश्रितैस्तरुणवृद्धैश्च नपनम् ।[१७] चक्षण (?) स्थविरैः ।[१८] पालसमुद्रकस्य रथे करणं गन्धसमुद्रकेन सम्विधानम् ।[१९] मालामुक्तिः ।[२०] समाप्तायां पूजायां निर्वृतेषु वाद्येषु विप्रक्रान्ते जनकाये मण्डनापनमनम् ।[२१] नात्रौ (? न रात्रौ) ।[२२] धर्म्यं प्रव्रजितवासमर्हं (?) प्रस्थापनं ।[२३] भक्तकल्पिकस्य कल्पिकस्य प्रतिबोद्रि (? मोद्रु) त्य कल्पिकसमासः ।[२४] उत्तरस्य भक्तु (?) प्रतिपूर्वस्येति कल्पिकस्य ।[२५]

॥ (इति) शयनासनवस्तु क्षुद्रकादिगतम् ॥

॥ समाप्तश्च शयनासनवस्तु पञ्चिमम् ॥ १७ ॥

विनयकर्मसंग्रहकारिकाः ।

धारणं विप्रवासं च स्पर्शमग्नेर्निवारिते ।
भोजनं बीजाघातं च देशे च हरिते शुचिः ॥
उत्सर्गं वृक्षारोहश्च शैक्षा उद्देशयोस्सह ।
रत्नस्पर्शनभुक्त्या च जातस्सांनिध्यानान्तयोः ॥
भूमिप्ररोहघाताभ्यामुत्सृज्यान्त च सूत्रगतं (?) ।
प्रवृषे (प्रावृष्ये?) कत्र वसनं पोषधस्सप्रवारणाः ॥

इत्यायस्यान्तभाग लिङ्ग याश्चा भाण्डोपभुग्द्रव कामोपभोग संवासानादराशोधकवस्तुकम् ।

स्पर्शपञ्जरनिक्षेपौ प्रतिछा(च्छा)दो निवारणम् ।
त्रयं किंचित्कृचतुष्टयं गणमृतसीन्नि रत्नतः ॥
छन्दसंमृष्टसंस्पर्शाचतुष्टयं भवति पश्चिमम् ।
विधारणं सप्तकं द्वे चान्ये धारणाधिष्ठानोद्धारानुद्धार इति ॥

हिरण्यान्यचीवरासनवर्षकजनसंघार्थं वचनपलसंचतः निष्प्रयोजने हित्वानुद्धृतो नानुशाटी च द्वादशपर्य्य (?) नलपट्टकं चीवरं संक्षेपस्यान्वननुव्यभिशोकभण्डनम् ।

अन्वयाशिक्षणानुस्या (?) नात् ।

जत्वङ्गुलितलरोमछ(च्छ)न्नौ च कर्णकग्रहणे भिक्षोश्च विद्यापाठनमोचन संतन्न(?)धारणं ।

गृहे छन्ने लयने मञ्चे उद्वर्त्तनमंचक उन्मुरोटिका गन्धपिण्याकतः ।

स्नानोशीरफलकुर्वत्रिशीर्षाणं कार्णङ्कारवृद्धादि ।

छत्रोपानह आसन्दी निषादारिकर्त्तनं । चोडा विक्रयगृहपतिक्युत्वा लसुन रजादक धावन दानपरिवर्त्तनतः । वर्णकुलानिष्कासनन्तरुद्दष्ट स(?श)पथ व्यथनावस्यण्डनकोशनसेकाव्युपशयनतः ।

छन्दाववादपोषधवर्षप्रावरणकठिनोद्धारभाजनवर्षाका[ल?]चर्याचरणवादः ।

पृच्छा वहिश्छोरणे तिरः ।
॥ भिक्षुणीविभङ्गोद्दानम् ॥
ज्ञपनं सेकवाक्यञ्च सत्यवाक्यञ्च तद्यथा ।
रोहन्तः प्रस्रयोरर्थपोपधस्यात्र सा यदि ॥
संघे वैमतिके चास्यां (?) विवादनिष्ठितत्वयोः (।)
प्रवारणगते चात्र सर्वस्मिन्नर्धपञ्चके ॥
वर्षोपगमने चैव मृतार्थे प्रतिवस्तुना ।
दाने कठिनवस्त्रस्य दुष्टुलारोचने पि च ॥
दाने वस्त्रस्य गणन् (ने ?) चतुष्के कुलसम्वृति ।
तत्प्रस्रब्ध्यौ(?) कुब्जे च सोन्मज्जे ज्ञप्तिमात्रकं ॥
मुखसीमद्वयाविप्रवासोन्मत्तप्रवारक (?) ।
शय्यासनगृहगाणां कल्पभूमेश्च सन्मति ॥
कठिनस्य तदास्तर्तुरुद्धारो स्यावसारणं ।
विहारो देशिकादीनां स्थलस्यव्यूढनायकं ॥
शलाकम्वारकानां विहारकुटिदेशने ।
चोदकस्याप्रवासाय सन्मेतप्या (सम्वेतस्या ?) च चारिणः ॥
अप्रसादप्रवेदावदित्रोर्वनवेदिनः ।
अवन्दनानलार्थं च दण्डशिक्षार्थमेव च ॥
एकलाभक्रियायाश्च शिक्षणा न समुपस्थिते ।
पुत्रे ज्ञातौ वहिर्याने ज्ञपनं शैक्ष्यावासनं ॥
उपसंपादनं तीर्थ्यवासदानं [च] मोचनं ।
सीम्नः साम्र(?म)ग्र दानं च पोपधस्य च सप्तकं ॥
षट्कं च स्मृत्यसंमूढ तत्स्वभावगमष्टकं ।
आज्ञप्तध्वस्तदानं च ज्ञपनं सन्निवाचनं ॥

॥ विनयकर्मसंग्रहकारिकाः समाप्ताः ॥

॥ समाप्तं विनयसूत्रम् । कृतिराचार्यगुणप्रभस्य ॥

॥ अनेन पुण्येन सर्वेषां लोकपिटकभाजनम् ॥

शाक्यभिक्षु धर्मकीर्त्तिना सत्त्वार्थे लिखितं श्रीमद्विक्रमशिला-माश्रित्य फाल्गुणमासे ॥

ग्नुर्-छोस्-क्यि-ग्रग्स्-पस्-त्रिस्-प । द्पल्-ल्दन्-ऽ-व्रि-क्रम-शि-ल्र्-दप्ये ऽस्ल र-ब-ल (=ग्नुर्-धर्मकीर्त्तिना श्रीमद्विक्रमशिलायां फाल्गुणे मासे)

प्रथम मुखपत्रे–

शी-ल-अ-क-र-स-त्रिस-प (= शीलाकरेण लिखितम्)

विग्रहव्यावर्त्तनी पुस्तकान्ते–

ग्नुर्-ध-र्म-किर्-तिस-त्रिस-प-ज्ञो-च-म्पिङि-मखन बुयिन् ।

एतस्य धर्मकीर्त्तेर्वर्णनं देब्लेर-स्रो-पो ग्रन्थे ।

* * *